॥ श्री चित्रा ॥

# THE Sanskrit College Magazine

## TRIVANDRUM.

License No. 399. Dated 29th March 1940.

| Vol. I | 1940 | No. 1 |
|---|---|---|

### *THE MAGAZINE BOARD*

*Chairman :—*

Sri N. GOPALA PILLAI M. A.

*Staff Editors :—*

Sri A. PARAMESWARA SASTRI, Mahopadhyaya.
Sri C. K. NARAYANA KURUP M. A.

*Student Editors :—*

Sri K. KESAVAN POTI
Srimati M. SARASVATI AMMA

# MESSAGE

FROM

**Sachivottama Sir C. P. Ramaswami Aiyar,**

K. C. I. E., LL. D.,

DEWAN OF TRAVANCORE.

---

The Prastavana commencing the first issue of the Sanskrit College Magazine displays a laudable resolve to combine the old and the new and to encourage the study of the Sanskrit Classics as well as to stimulate the re-orientation of the cultural heritage of India which is to a great extent founded in Sanskrit language and literature.

The wellknown scholar Mr. Ulloor S. Parameswara Aiyar leads off with extracts illustrative of the continuity of Indian ideals and the importance of our traditions; and one of the humorous passages which he has brought to light indicates the value attached by women, in the palmy days of Indian civilisation, to learning and accuracy of language

The Magazine is very comprehensive and deals with subjects ranging from Advaita Sastra and Mimamsa to certain recondite linguistic researches.

I read with special pleasure the poem on Kerala which conveys elevated and patriotic thought in very simple language. As is natural in the first issue, there is a great deal that is devoted to eulogistic and commendatory references which do not however travel into hyperbole.

I gladly welcome the appearance of this Magazine and trust that it will help in the revival of a working knowledge of the Sanskrit language which is a key to the unlocking of the treasure chest of our racial culture. I wish the venture all success.

Bhaktivilas, Trivandrum,<br>8th March 1940 (Sd.) **C. P. Ramaswami Aiyar.**

## कृतज्ञतां प्रकाशयामः।

श्रीचित्रानाम्न्या अस्याः पत्रिकाया विषये सचिवोत्तमस्य सर्. सि. पि. रामस्वाम्यार्यस्य संजातां दयादृष्टिमासाद्य वयं धन्यधन्या भवामः। यतोऽयं महानुभावः कार्यान्तरसाहस्र्यां जाग्रत्यामपि प्रार्थनयास्माकं मुद्रितान् पत्रिकाभागान् सर्वानप्यवलोक्यापादमस्तकमहो महान्तमुपदेशं प्रोत्साहनं च प्रशंसावचनं विलिख्य प्रेषयन् पत्रिकामिमामन्वगृह्णात्। तस्य विषये वयं सुबहु धारयामस्तमाम्।

किञ्च सर्वकलाशालाधिकृतैः प्रकृतपत्रिकायाः कृते कृतमर्थसाहाय्यमधिकृत्य वयमतिमहतीं कृतज्ञतां वहामः।

## अस्माकं नूतनास्समारम्भाः।

१. **संस्कृतनाटकाभिनयः :—**

महनीयगुणस्य श्रीचित्रावतारस्यास्मन्महाराजस्य जन्मर्क्षदिनमहोत्सवावसरे तदनुबन्धितया, पाठशालाध्यक्षस्य एन्. गोपालपिळ्ळ एम्. ए महाशयस्याध्यक्ष्येण पण्डितैश्छात्रैश्च सोत्साहं नागानन्दं नाम संस्कृतनाटकं जूबिलिटौण्हाल् मन्दिरे समुचितनेपथ्यादिविधानेन सम्यगभिनीतम्। नाटकाभिनयदिदृक्षया समागतैर्निरवधिकैस्सामाजिकैः प्रकाशितानि श्लाघावचनानि। समाप्तेऽभिनये विज्ञाननिधिर्न्यायाधिपतिः श्रीशङ्करसुब्बार्यः पाठशालाध्यक्षमन्यांश्च तत्सहकारिणः प्रशंसावचनैरनुगृह्य नटानां प्रोत्साहनं पारितोषिकं तेषु प्रशस्तेभ्यो दत्तवान्।

२. **सरस्वतीविजयसमाजः—**

अस्मिन् वत्सरे कन्यामासस्य षष्ठे दिने सरस्वतीविजयनाम्नोऽस्मत्पाठशालीयसमाजस्य समारम्भयोगं राव् साहेब्, विद्याभूषणः, महाकविः, उळ्ळूर् परमेश्वरार्यः सदयमध्यक्षपदमलङ्कृत्य प्रावर्तयत्। गैर्वाणीपारम्यमधिकृत्याध्यक्षवदनादमृतभारतीमयः कोऽपि सुधाप्रवाहो निरर्गलो निर्गलितस्सामाजिकानानन्दाप्लावितानतानीत्।

तदनन्तरं सरस्वतीविजयसमाजस्य बहवो योगास्तत्तन्मासेषु सम्मेलिताः। महोपाध्यायः ए. परमेश्वरशास्त्री, सि. के. नारायणकुरुप् एं ए, महोपाध्यायः एस्. पद्मनाभशास्त्री, महोपाध्यायः एन्. पद्मनाभप्पणिक्कर्, महोपाध्यायः रविवर्मन् तम्पान्, इत्येते तेषु योगेष्वध्यक्षतामावहन्।

पाठशालावत्सरस्यास्य सन्निहिते समापनसमये सरस्वतीविजयसमाजस्य वर्षान्तिमयोगः कुम्भमासस्याष्टाविंशे दिने विद्याभ्यासशाखापरमाध्यक्षस्य ए. गोपालमेनोन्, एं. ए. बि. काम् महाशयस्याध्यक्ष्ये प्राचलत्। तस्मिन् सम्मेलने कार्यदर्शिना वार्षिकचरिते वाचिते, पाठशालाध्यक्षः एन्. गोपालपिळ्ळ एं. ए महाशयः सरसया मधुरया च संस्कृतभाषयान्वर्थया स्वागतमवोचत् समागतेभ्यः। ततश्चाध्यक्षस्य वदनाद् बहिर्भूता सरसमधुरा वचनपरम्परोपक्रमोपन्यासरूपा संस्कृतभाषोपजीविनां प्रोत्साहनाय सचिवोत्तमेन समादृतां बद्धकङ्कणतां सुतरां प्राकाशयत्। ततश्च महोपाध्यायः के. साम्बशिवशास्त्रिमहाशयः संस्कृतभाषामयं, आर्. नारायणप्पणिक्कर् बि. ए. एल्. टि महाशयः, पि. के. नारायणपिळ्ळ, एं. ए महाशयश्च कैरळीमयञ्चैकैकं प्रभाषणं सरसं सारगर्भञ्चाकुर्वन्। ततोऽध्यक्षमहाशयः समुचितेन संस्कृतभाषैकशरणानां समाश्वासकेनोपसंहारोपन्यासरूपेण वचनेन सम्मेलनं परिपूर्णतां प्रापयत्। तदनु सि. के. नारायणकुरुप् एं. ए महाशयो हृदयङ्गमां कृतज्ञतां प्राकाशयदध्यक्षस्य उपन्यासकानां मान्यसामाजिकानाञ्च विषये। समापितश्च समाजोऽयं सायं सार्धसप्तम्यां होरायाम्।

---

# ॥ विषयसूची ॥


Page

1. प्रस्तावना—अध्यक्षः ... 1

2. गैर्वाणीपारम्यम्
   Rao Sahib, Mahakavi, Sahitya Bhushana
   Ulloor S. Parameswara Aiyar M. A., B. L. ... 3

3. अस्ति तारतम्यम्—Mahopadhyaya A. Parameswara Sastri 13

4. अद्वैतसूत्रभाष्यहृदयम्—तोल्लूर् राघवेन्द्राचार्याः ... 15

5. मीमांसाशास्त्रमधिकृत्य यत्किञ्चित्प्रास्ताविकम्—
   महोपाध्यायशिरोमणिः एस्. परमेश्वरशर्मा ... 21

6. वर्णानामाभ्यन्तरप्रयत्नाविवेकः—
   Dr. K. Godavarma M. A. Ph. D. (Lond.) ... 24

7. प्रपञ्चस्य किं कारणम् ?
   Mahopadhyaya, Ravi Varma Tampan ... 27

8. पूर्वाङ्गपराङ्गचिन्ता—
   V. Venkatarama Sharma, Vidyabhushana ... 35

9. अहो! सुप्रसन्नः कालः—एस्. पद्मनाभशास्त्रिणः ... 38

10. प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधसमर्थनम्—
    महोपाध्यायः के. महादेवशास्त्री ... 42

11. कैरलीप्रणामः—C. K. Narayana Kurup M. A. ... 45

12. न्यायामृतं जीवनम्—न्यायमीमांसामहोपाध्यायः वि. रामशर्मा ... 47

13. पत्रिकाप्रशस्तिः—पण्डितशङ्करसुब्रह्मण्यशास्त्री ... 51

14. कालिदासस्य नाटकत्रयम्—M. Madhavan Unni,
    (Vyakarana Siromani, Class III) ... 53

15. भारताम्बिका—
    (K. Kesavan Poti, Sahitya Siromoni, Final) ... 56

Page

16. खण्डकाव्यानि—
N. Raghava Panikar, (Sahitya Siromoni, Final) ... 58

17. महोन्नतमहामहिम श्री सचिवोत्तम सर् सि. पि. रामस्वाम्यार्य षष्टिपूर्त्तिपञ्चदशी—
Mahakavi Ulloor ... 62

18. श्रीमतां एन्. गोपालपिल्ल एं. ए. महाशयानां अनुमोदनम्—
वे. वेङ्कटरामशर्मा ... 66

19. श्री कृष्णन्तम्पिमहाशयानां किञ्चिदनुकीर्तनम्—
Pandit N. P. Paniker ... 67

20. संस्कृतनाटकानि, आधुनिकरङ्गवेदिश्च—
एन्. ई. विश्वनाथशर्मा (व्याकरणशिरोमणिचतुर्थभागाध्येता) ... 69

21. चित्प्रकाशः—
N. Gopinathan Nair. (Sahitya Siromani Final) ... 71

22. श्रीवञ्चिराजप्रशस्तिः—
Mahopadhyaya, A. Parameswara Sastry ... 79

23. किमपि विमर्शनम्—
Mahopadhyaya, S. Neelakanta Sastry ... 83

24. തിരുനാൾ—
ടി. എസ്. രാഘവൻ ... 85

25. കാമവും പ്രണയവും—
എ. കുമാരൻ (ശിരോമണി IV) ... 86

26. പ്രണയഗാനത്തിൻെറ ആത്മകഥ—
ശിവശങ്കരൻ (മഹോപാധ്യായ II) ... 89

27. മൂകനായ മുങ്ങ—
കെ. ആർ. നായർ ... 91

# श्रीचित्रा।

## अनन्तशयनस्थराजकीयसंस्कृतमहाकलाशालातः

प्रकाश्यमाना चातुर्मासिकी पत्रिका।

सञ्चिका १ ॥ १११५ तमे कोळम्बवर्षे तुलामासः ॥ सम्पुटः १

## प्रस्तावना

श्रीमूलकराजर्षिवर्याणां राज्यभरणारम्भे पल्लवितो ज्ञानाभरण-वितरणारम्भः पुष्पितश्च फलितश्च विभात्यस्मदीयसंस्कृतमहाविद्यालयरूपः। बुधजनसम्भाविते परार्थे स्वजीविते प्रविविक्षत्यधुना नः कलाशालाऽपरार्ध-मब्दशतकस्य। पुरातनी गुरुकुलविद्यापरिपाटी चिराय प्रायः प्राचरदस्याम्। महावैदिकैर्बहुश्रुतैः सुब्बादीक्षितैरलमकारि प्रथममस्या अध्यक्षपदम्। विज्ञ-लोकसुविश्रुतानां वैदुषीविजितजगतामनेकेषां विदुषां नामरत्नपरम्परा लाल-सीत्यनन्तराध्यक्षगणनागुणनिकायाम्। शब्दानुशासनपारदृश्वा कविकुल-चूडामणी राजराजवर्मदेवः, विततवैदुष्यविभूषितो विमर्शकवरेण्यो दिगन्त-विश्रान्तकीर्तिर्गणपतिशास्त्री, सौजन्यधनः सहृदयाग्रणीः कविकर्ममर्मज्ञः कृष्णनताम्पिमहाशय इत्येतैरन्यैश्च महानुभावैः परिचारितचरी कलाशाला-स्माकम्।

कालानुकूलां सरणिमनुसृत्य, पुरस्कृत्य परिष्कृतिं नूतनीं, स्वाशय-माविष्कर्तुं क्रान्तदर्शिनां पुरातनचिन्तकानां लोकसंग्रहकरीं महनीयां महाशय-गतिं विशदयितुञ्चोत्सहते सेयमधुना पत्रिकारूपया रसनयानया। शुभावहोऽय-

मवसरः। श्रीचित्रातारावतारे स्वप्रजाक्षेमैकदीक्षे महाराजे रक्षति वञ्चिक्षिति-भुदित्वरी भाति भूविभागेऽस्मिन् कलावपि सकलसुकृता कृतयुगकला। कोमळकलापोषणविचक्षणा प्रतिभागुणसुदक्षिणा प्रजावात्सल्यमयी श्रीसेतु-पार्वतीभायी महाराज्ञी वरीवर्त्ति समश्रेयोजागरूका। समस्तविज्ञाननिधिः सर्वतन्त्रस्वतन्त्रो भारतसंस्कारसमुल्लासनसमुत्सुको गीर्वाणवाणीरसिकः सचिवोत्तमः सर्. सी. पी. रामस्वाम्यार्यो मन्त्रिपदमधितिष्ठति। किं बातः परमाशास्यमस्माभिः। सर्वथा विजयिन एव वयम्। अनुगृह्णन्तु तत्र भवन्तः सहृदयधुरीणा अस्माकमिमं समुद्यमम्।

---

# गैर्वाणीपारम्यम्

RAO SAHIB, MAHAKAVI, SAHITYABHUSHANA,

**ULLUR S. PARAMESWARA AIYAR, M. A., B. L.**

*अयि भोः सौजन्याधाराः समाचान्तसाहितीपारावाराः सभास्ताराः !

अस्मिन् सम्मेळने प्रवक्तृपदवीमधिरोढुं नाहं यया कयापि विधयाऽलङ्कर्मीण इति सुविदितमेव सर्वेषां युष्माकम्। केयं सभा विबुधभारतीवरिवस्यारहस्यवेदिभिर्विद्वत्प्रकाण्डैरध्युषिता? क्व वायं जनः साहितीसौधस्य बाह्यालिन्दे चङ्क्रूर्यमाणः सरस्वतीदासपरमाणुः? इत्थम्भूतायामपि वस्तुस्थितौ यदहं भवद्भिरीदृशं स्थानमधिष्ठातुमादिष्टस्तन्मन्ये "न सा सभा यत्र न सन्ति वृद्धाः" इत्याभाणकं सत्यापयितुम्। तथापि यत्सत्यं बहु धारयामि भवद्भ्यः; न च पारयामि हृदयसम्भूतां प्रभूतां कृतज्ञतां वचसा प्रकटीकर्तुम्। अस्या महापाठशालाया अध्यक्षस्य श्रीगोपालपिळ्ळमहाशयस्य निर्मलः स्नेहप्रकर्षो मामुपसर्गो धात्वर्थमिवार्यहलं गृहीत्वात्रानैषीदिति परमार्थोऽपि वक्तव्योऽवशिष्यते।

भारतवर्षाभिख्यायां परमप्रख्यायां प्रार्थितकल्पवल्लिकायामस्यां जनपदमतल्लिकायां सञ्जाताः सर्वे वयं जन्मनैव धन्यतमाः। अखिलवर्षालङ्कारभूतामिमामस्मज्जननीमधिकृत्य सञ्जयो धृतराष्ट्रमेवमवददिति महाभारतं गमयति—

"अत्र ते वर्णयिष्यामि वर्षं भारत! भारतम्।<br>
प्रियमिन्द्रस्य देवस्य मनोर्वैवस्वतस्य च॥<br>
पृथोश्च राजन्! वैन्यस्य तथेक्ष्वाकोर्महात्मनः।<br>
ययातेरम्बरीषस्य मान्धातुर्नहुषस्य च॥<br>
तथैव मुचुकुन्दस्य शिबेरौशीनरस्य च।<br>
ऋषभस्य तथैलस्य नृगस्य नृपतेस्तथा॥<br>
अन्येषां च महाराज! क्षत्रियाणां बलीयसाम्।<br>
सर्वेषामेव राजेन्द्र! प्रियं भारत! भारतम्"॥

---

* प्रभाषणमिदमस्या महापाठशालायाः साहित्यसमाजस्यैषम उद्घाटनावसरे कृतम्।

पूर्वोक्ताः सर्वे सार्वभौमा महारथमहाभागा यदा सागराम्बरां क्ष्मां पर्यपालयन् तदा पाश्चात्या यवनरोमकाङ्गलेयादिजनाः केवलं श्वापदोपपन्नां चर्यामङ्गीकृत्याश्रुतसंस्कारकथाः सर्वथा शोचनीयं जीवितमयासिषुः । अद्यापि शर्म्मण्यादिविषयवास्तव्याः श्वापदनिर्विशेषा एव वर्त्तन्त इति सम्प्रति प्रवृत्ताद्युद्धयङ्करात्साम्परायिकात् स्पष्टीभवति । तत्तिष्ठतु तावत् ।

"सर्वेषामेव भूतानां प्रियं भारतमुत्तमम् ।"

इति पाद्मपुराणेप्युद्घुष्यते । तथाच विष्णुपुराणे—

"अत्र जन्मसहस्राणां सहस्रैरपि सत्तम ! ।
कदाचिल्लभते जन्तुर्मानुष्यं जन्मसञ्चयात् ॥
गायन्ति देवाः खलु गीतकानि
धन्यास्तु ये भारतभूमिभागे ।
स्वर्गापवर्गास्पदमार्गभूते
भवन्ति भूयः पुरुषाः सुरत्वात् ॥
कर्माण्यसङ्कल्पिततत्फलानि
सन्यस्य विष्णौ परमात्मरूपे ।
अवाप्य तां कर्ममहीमनन्ते
तस्मिन् लयं ये त्वमलाः प्रयान्ति ॥"

इति पुळकोद्गमकारीणि वचांसि श्रूयन्ते ।

ब्रह्मवैवर्त्ते च जागर्त्यधोलिखितः श्लोकः—

"हिमालयादासमुद्रं पुण्यक्षेत्रं च भारतम् ।
श्रेष्ठं सर्वस्थलानां च मुनीनां च तपःस्थलम् ॥"

मार्कण्डेयपुराणेऽपि—

"सर्वाः पुण्याः सरस्वत्यः सर्वा गङ्गाः समुद्रगाः ।
विश्वस्य मातरः सर्वाः सर्वाः पापहराः स्मृताः ॥"

इत्थमुक्तम् । केचिज्जल्पन्त्यस्मत्पूर्वपुरुषाः स्वदेशाभिमानिनो नासन्निति । शान्तं पापम् । "सोपद्रवापि सुखदैव हि जन्मभूमिः" इत्यपि तैरेवोच्चैस्तरां प्रख्यापितम् ।

नेदमनवगतं केनापि यद्रत्नगर्भारत्नभूतायाः सर्वाङ्गीणरामणीयकशालिन्याः कर्मभूमेरस्मन्मातुरुत्कर्षाधायकेषु निरवधिषूपाधिशेवधिषु समस्तसुमनस्तामरसनारङ्ग-

ध्यासिका संस्कृतभाषैव सिंहासनासिकामभ्यर्हतीति ! अस्तु शङ्करश्वशुरः सकलधराधराधीश्वरो मेनाकौमारहरः ; तिष्ठतु च त्रिपुरहरस्य कपर्दगर्भान्निस्सरन्ती विश्वपावनी बर्हिर्मुखधुनी । स यशःकेतुः, सापि कीर्त्तिवैजयन्ती तस्या एव देव्याः ; नापरस्याः । तयोरप्यधिकेन समञ्जासामञ्जस्येन दश दिशः श्वेतीकुर्वती त्रिदशसरस्वती काचन वाभात्यत्रैवेति भारतीव्यर्या महिमातिशयः ।

देवाः कां भाषामाश्रित्य संव्यवहरन्तीति न श्रोत्राभ्यां ज्ञातुं शक्यमस्माभिः । सुकृतिनस्ते तु सुधामभ्यवहरन्ति । शुक्रशिष्यान् संहरन्ति । सुमधुरं संस्कृतं व्याहरन्तीति चाप्तवाचो वदन्ति । तत्र प्रमाणमस्माकमिति यस्य कस्यापि शङ्का प्रादुर्भवति चेत्, यदि ते नैडमूकास्तर्हि तैः काचन वाणी वक्तव्या श्रोतव्येति च सिद्धे, सा वाणी संस्कृताभिख्यैव भवितुमर्हतीति निश्चप्रचम् । तादृशस्तस्याः सर्वातिशायी प्रभावः ।

संस्कृतज्ञं हनूमन्तं दृष्ट्वा हर्षाश्रुपरिप्लुतः श्रीरामचन्द्रो लक्ष्मणमेवमवोचदिति गायति परमानन्ददाता सचेतसः प्राचेतसः ।

"नानृग्वेदविनीतस्य नायजुर्वेदधारिणः ।
नासामवेदविदुषः शक्यमेवं प्रभाषितुम् ॥

नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम् ।
बहु व्याहरतानेन न किञ्चिदपशब्दितम् ॥

न मुखे नेत्रयोर्वापि ललाटे वा भ्रुवोस्तथा ।
अन्येष्वपि च गात्रेषु दोषः संविदितः क्वचित् ॥

अविस्तरमसन्दिग्धमविलम्बितमद्रुतम् ।
उरःस्थं कण्ठगं वाक्यं वर्त्तते मध्यमे स्वरे ॥

संस्कारक्रमसम्पन्नामद्रुतामविलम्बिताम् ।
उच्चारयति कल्याणीं वाचं हृदयहारिणीम् ॥

*अनया चित्रया वाचा त्रिस्थानव्यञ्जनस्थया ।
कस्य नाराध्यते चित्तमुद्यतासेररेरपि" ॥

*पद्येनानेनापि महाकविः श्रीचित्रां पत्रिकामनुगृह्णाति ।

श्रीरामस्य सुग्रीवेण सह सख्यम्, तद्द्वारा रावणस्य निधनम्, भारतवर्षभागधेयस्य पुनः संस्थापनं च संस्कृतभाषैवाकारयदित्यनुमीयते। अन्यत्रापि चाख्याति सुविज्ञातकविधर्म्ममर्म्मा वल्मीकजन्मा—

"दुःखेन बुबुधे सीतां हनूमाननलङ्कृताम्।
संस्कारेण यथा हीनां वाचमर्थान्तरं गताम्॥" इति।

"न म्लेच्छितवै नापभाषितवै" इत्युपदिशति भगवान् पतञ्जलिरपि।

दैवी वागेव प्रकृतिप्रत्ययरूपेण संस्कृतभाषा संवृत्तेत्याचार्य्याणां मतम्। पुरा किलेयं भारती सर्वसंव्यवहारोपयुक्ता समवर्त्ततेति श्रूयते सुतरामनुमीयते च भाषाचरित्रगवेषणपटुभिः पण्डितप्रकाण्डैः। दमयन्तीस्वयंवरकथामुपवर्णयितुमुद्युक्तो वितीर्णविद्वज्जनहर्षप्रकर्षः श्रीहर्ष एवं प्रस्तौति।—

"अन्योन्यभाषानवबोधभीतेः
संस्कृत्रिमाभिर्व्यवहारवत्सु।
दिग्भ्यः समेतेषु नृपेषु तेषु
सौवर्गवर्गो न जनैरचिह्नि॥"

अयमस्य महाकविमूर्धन्यस्याशयः—भारतवर्षे प्रचलन्तीषु विविधासु देशभाषास्वनभिज्ञाः कुण्डिनपुरे सम्मिलिता राजानः परस्परावबोधमिच्छन्तः संस्कृतमेव प्रयुञ्जाना आसन्। संस्कृतस्य तु देवमनुष्यसाधारणत्वात् तत्र समागता इन्द्रानलयमवरुणा दिक्पाला देवत्वेन न तत्रत्यैर्जनैर्ज्ञाताः। सर्वे नृदेवा देववदेव संस्कृतभाषायां संव्यवहर्तुं शक्ता अतिष्ठन्तेति भावः।

न केवलं भारतवर्षे, परन्तु जम्बूद्वीपस्येतरेषु विभागेष्वपि पुराकल्पेऽनया भाषया दिग्विजयोऽकारीति तत्तद्देशस्थाशिलाशासनादिरेखाप्रपञ्चमवलम्ब्य वक्तुं शक्यते। चम्पायां क्रिस्तीयसप्तमशतके लिखितं किञ्चन राजशासनं वर्वर्त्ति। तस्मिन्नादिकविरेवं स्तुतः—

"कवेराद्यस्य वाल्मीकेः"

"यस्य शोकात्समुत्पन्नं
श्लोकं ब्रह्माभिपूजति।
विष्णोः पुंसः पुराणस्य
मानुषस्यात्मरूपिणः॥"

काम्भोजविषये क्रिस्तीयदशमशतके कवीन्द्रपण्डित इत्येको विपश्चित्प्रवेको रामायणं महाभारतं चाधिकृत्य प्रवचनमकरोदिति ज्ञायते ।

केरलेष्वपि बहोः कालात् संस्कृतभाषाप्रचारः समीचीनः सर्वपथीनश्चासीत् । केषां नाम रोमाञ्चपरम्परां नाङ्कूरयन्ति श्रीशङ्करावतारः श्रीशङ्करभगवत्पादः, शेषांशसम्भवः श्रीनारायणभट्टपादः, गोविन्दलीनमतिः कोदण्डमङ्गलयतिर्मीमांसादर्शनवियत्प्रभाकरः प्रभाकरः, तीर्णविद्याम्बुधिः पूर्णसरस्वती, यमकप्रपञ्चपरमेष्ठो वासुदेवभट्टश्च । तथान्येऽपि महनीयाप्रतिभा महाकवयः पदवाक्यप्रमाणपारावारपारीणाः पण्डितमूर्धन्याश्च शतशः सहस्रशोऽपि स्वजन्मना जामदग्न्यभूमिं कृतार्थयामासुरिति मधुरान्मधुरतरं मनस्संवननं स्मरणम् । राजानोऽपि महात्मान इमां भाषां बहुधा पोपुषति स्म ।

"कर्णौ नः कालिदासप्रविहितरचनाः कर्णपूरीक्रियास्ताम्" इति प्रार्थयामास तपतीसंवरण—सुभद्राधनञ्जयकर्ता हर्षदेवसमानधर्मा श्रीकुलशेखरवर्मा । स्यानन्दूरपुरपरमेश्वरास्तु सर्वेऽपि विद्यासु व्यसनिनः, कलासु कुशलाः, पण्डितेषु पक्षपातिनः, कविषु कारुण्यवर्षिणश्चासन् । अत्रैवावतीर्णा नामान्तरकर्णः प्रद्युम्नाभ्युदयाभिख्यस्य प्रत्ननाटकरत्नस्य रोहणगिरिर्महाधीरः संग्रामधीरः, बालरामभरतवेधाः सुमेधा बालरामकुलशेखरः, महाकविमुख्य आश्विनेयरामवर्म्मयुवराजः, भक्तिमञ्जरीसुधासिन्धुश्चतुष्षष्टिकलाबन्धुः सरस्वतीस्तनद्वयप्रस्रवत्पयःपानपूतः स्वातिजातश्चित्ररथश्चित्ररथावतारः क्षितिपुरन्दरः, परेऽपि पराकृतभोजाः प्रविकासितप्राज्ञमुखाम्भोजा महाराजाः । इमान् पण्डितमण्डलीपारिजातान् कविमयूरकालमेघान् न केवलमनुहरति परं त्वनुहरत एवास्मत्स्वामी श्रीचित्रोदयश्चिन्तातिवर्तिदयहृदयः श्रीबालरामवर्म्मवसुन्धराधुरन्धरः ।

आधुनिककालेऽप्यलमकुर्वन् पुरीमिमाम् इलत्तूर् रामस्वामिशास्त्रिणः, तेषां सर्वतन्त्रस्वतन्त्राणां साहितीविनेयाः श्रीकेरळवर्म्मदेवमहाकवयश्च ।

पाटीरद्रवसिक्तचन्दनलतावाटीलसन्मालती-
कोटीनिर्यदरीणमाधवधनीशौटीर्यभृन्माधुरीम् ।
घोटीनामनुकुर्वतीं स्ववशयन् धाटीं जवात्साहितीं
कोटीराहतगोमखीचरणभागाटीकतायं कविः ॥"

इत्यात्मानं यत् कीर्तिविलासकाव्ये शास्त्रिणः शश्लाघिरे, न तत्र विचकत्थिषा स्वल्पाप्यारोपणीया, भूतार्थमेवोक्तवान् स कविमूर्धन्यः ।

श्रीकेरळवर्मदेवस्तु शैशव एवाकवयीत् । प्राप्तषोडशहायन एव श्रुतिमतिमधुरं जन्मर्क्षप्रबन्धं नाम चम्पूकाव्यमरचत् ।

"दृप्यत्प्रत्यर्थिपृथ्वीपरिवृढमदसन्दोहनीहारधारा-
संहारार्कप्रकाशायितबहुळभुजागौरवाटोपशाली ।
क्षीराम्भोराशिवीचीविसृमरकरुणातुन्दिलापाङ्गवीक्षा-
माधुर्योद्रेकदूरीकृतनतकदनो राजते रामराजः ॥
कल्पान्तोन्नृत्तचण्डीश्वरविकटजटाजूटदोलायमान-
प्रेंखत्कल्लोलवल्लीजटिलसुरधुनीपाण्डिमौन्नत्यहारी ।
उद्भ्राम्यन्मन्दराद्रिप्रसभविमथितक्षीरसिन्धुप्रकाश-
प्रागल्भ्यच्छेदशौण्डो विमलयति जगत् कीर्तिपूरोऽदसीयः ॥

वैमानिकाधिपतिधामा, मनोज्ञगुण-
धामाखिलाम्बुजमुखी–
कामार्त्तिदायकनिकामाभिरामरुचि-
सीमातिमोहनतनुः ।
श्रीमानमेयतमभूमा, समेत्य खलु
रामालयं रघुपतिं
श्यामाब्जसुन्दरमथामानुगैरपि न-
नामावनीपरिवृढः ॥"

एते हृदयहारिरीतिपाकाः श्लोका अस्मिन् प्रबन्धे दरीदृश्यन्ते । केवलमदृष्टश्रुतचरो महामहिमौन्नत्यशालिनाममीषां सरस्वतीप्रसादः। येषां प्रेरणेन राजर्षिः श्रीमूलकमहाराज इमां पाठशालां प्रातिष्ठिपत्, ते कथं क कदा वास्माकमाराधनीया न भविष्यन्ति ?

स्त्रियोऽपि बहून् प्रबन्धान् केरळेषु रचयामासुः। यथा बिल्हणः कर्णसुन्दरीनाटिकायाम्—

"बिन्दुद्वन्द्वतरङ्गिताग्रसरणिः
कर्त्ता, शिरोबिन्दुकं
कर्मेति क्रमशिक्षितान्वयकथा
ये केऽपि; तेभ्यो नमः ।

ये तु ग्रन्थसहस्रशाणकषण-
त्रुट्यत्कळङ्कैर्गिरा-
मुल्लेखैः कवयन्ति, बिल्हणकवि-
स्तेष्वेवे सन्नह्यति ॥”

इत्यवोचत्, तथा नातिचिरात् प्राग्वर्मराजस्य समकालिकी कुक्कुटक्रोडराजन्यान्वयसम्भूता मनोरमा राज्ञी,

“यस्य षष्ठी चतुर्थी च विहस्य च विहाय च ।
अहं कथं द्वितीया स्यात् द्वितीया स्यामहं कथम् ? ॥”

इत्यात्मानं परिणेतुकाममनाघ्रातसंस्कृतसौरभं कञ्चन राजकुमारमुद्दिश्य विललाप ।

कियता कालेन बहुभिर्हेतुभिर्भाषेयं सुकृतक्षये काचन देवतेव स्वपदाच्च्युता भूपृष्ठपतिता तपस्विनी कृच्छ्रेण प्राणान् धारयन्ती कतिपयश्वासावशेषजीवितेवाभूत् । वैयाकरणखसूचिभिः कविचैरैर्मीमांसकदुर्दुरूढैः पाठकमूर्खैश्चाक्रान्ता पण्डितगोष्ठी । अत्रान्तरे पाश्चात्याः केचित्संख्यावन्त अस्मद्भाषाभ्युदये बद्धश्रद्धा अस्माभिरनादृतानस्मृतांश्चासंख्यान् ग्रन्थतल्लजान् महता प्रयत्नेन विचित्य साधु संशोध्य विश्वाकर्षके पत्रे स्फुटाक्षरं मुद्राप्य प्रकाशयामासुः । बहूपकृतं तादृशैर्मोक्षमूलमहाशयप्रभृतिभिर्महापुरुषैरमरभारत्याः पुनरुज्जीवने । नमोऽस्तु तेभ्यः पूर्वसूरिभ्यः पाश्चात्येभ्यः पौरस्त्येभ्यो वा यैर्भाषेयं समुत्थापिता । कर्म्मैव पूजास्थानं न देशो न वा वर्णः । “कृतघ्ने नास्ति निष्कृतिः” इति न विस्मर्तव्यमस्माभिः स्वाभिमानान्धहृदयैः ।

यः कश्चिदियं मृतभाषेति जजल्पीति स न प्रज्ञावान् प्रत्युत प्रज्ञाचक्षुरिति मे प्रतिभाति । यदन्धः सहस्रकिरणं न पश्यति तन्न त्रयीतनोस्तस्य देवस्य वैकल्यम्; यद् बधिरो हृदयद्रवीकरणप्रवीणाया वीणाया निक्वाणं न शृणोति स न तस्या वादित्रमतल्लिकाया दोषः । अयं विमर्शकम्मन्यो मन्ये भागुरेरल्लोपविधिमेवावलम्ब्यामृतभारतीं मृतभारतीति ब्रूते । स न किञ्चिदपि जानाति; सर्वमप्यवजानाति; न वदते शास्त्रे किन्त्वपवदते शास्त्रम्; वेदं नोद्यच्छत्यबोधभाण्डमेवोद्यच्छते; मान्यान्मानयेति भर्तृहरेर्नीतिवाक्यं मा अन्यान् मानयेति पदच्छेदं कृत्वा पठति । धिगेतादृशान् कुलाङ्गारानेबीसीडीतिचतुर्वेदाध्ययनचरितार्थान् समम्मदर्पानल्पान् देवानांप्रियान् । प्रत्याहारभीरवोऽपि ये पतञ्जलिमाक्षिपन्ति, ब्रह्मशब्दोच्चारणासमर्था अपि बादरायणमपहसन्ति ।

संस्कृतपक्षपातीति यत्ते मामवमन्यन्ते तन्मे भूषणमेवेति निश्चिनोमि । गुणाद्भुते वस्तुनि पक्षपातः स्वभावसिद्ध एव साधूनाम् । अहं तु हूणभाषायां सम्यग-

धीत्यपि, विविधापरिहार्यकार्यभारपारतन्त्र्यनियन्त्रितजीवितोऽपि, यथा कथञ्चित् संस्कृतनिबन्धतीर्थेषु स्नायं स्नायं, तत्साहितीरसनिष्यन्दं पायं पायं, तदपरिमेयाश्चर्यजनकं महिमानं गायं गायं क्षपितवासरोऽस्पृष्टभवक्लेशलेशो भवामि। सर्वप्रयोजनोपनिषद्भूतं विगलितवेद्यान्तरं ब्रह्मानन्दं तत्सहोदरं साहित्यसम्मदं च पर्याप्तया रीत्या प्रदातुममरभारत्या एव प्रकृष्टं पाटवं प्रकटीभवतीति ममासन्दिग्धोऽभिप्रायः। ऐहिकमभ्युदयं पारत्रिकं निःश्रेयसमपि वितरीतुं सैव देवता सर्वभाषासवित्री प्रभावपरिपूर्णेति वक्तुं न मे विशयलेशोऽपि वर्तते। क संस्कृतग्रन्थसमुच्चयादन्यत्र तत्त्वमसीत्यादिमहावाक्यानि लभ्यन्ते? क रामायणमहाभारतादिमहाग्रन्थकल्पा दृश्यन्ते? क वा सनत्कुमारसन्निधौ सर्वविद्यापारीणस्यापि विषण्णतां गतस्य नारदस्य वाक्यं श्रूयते?— "सोऽहं भगवो मन्त्रविदेवास्मि नात्मवित्" इति।

अद्यापि केरळमण्डले निवसन्ति विरळा विपश्चित्प्रवेका घटदीपा इव, सागरान्तःस्थमणय इव। प्रायशस्ते दरिद्रा भग्नमनोरथा हृदयदौर्बल्याभिभूता निरुन्मेषा जीवन्ति, एते यत्रकुत्रापि कृच्छ्रेण देहयात्रां कुर्वाणा, आत्मानमुपालभमाना व्यर्थमतिक्रान्तं कालमवेक्ष्य दूयमाना 'निन्दामि च करोमि च' इति न्यायेन स्वस्वविद्यां पोषयमाणाः शोचनीयामिमां दशासन्धिं तरीतुं भगवन्तं श्रियःकान्तं प्रार्थयमाना वर्तन्ते। अपि ते नानुकम्पामर्हन्ति? न वा सर्वसाहाय्यं लब्धुमुत्तमाधिकारिणः सन्ति? यदा संस्कृतपण्डिता न प्रोत्साहितास्तदास्मज्जननी भारतभूमिरविच्छिन्नामश्रुधारां वर्षिष्यति, तस्या माहात्म्यमस्तङ्गतप्रायं भविष्यति। दिष्ट्या सात्त्विकानां राजभक्तानाममीषां विषये दत्तदृष्टिरास्ते प्रकृष्टप्रभावः प्रकृतिरञ्जनपटुः प्रत्युत्पन्नमतिः सकलकलानुजिघृक्षुरनेकधा चित्रावतारोऽस्मन्महाराजराकासुधाकरस्तस्यान्वर्थसचिवोत्तमबिरुदालङ्कृतः सर् सि. पि. रामस्वाम्यार्य अमात्यवर्यश्च। तावतैवाङ्कुरितमेषां भागधेयबीजं कालेन पल्लवितं कोरकितं कुसुमितं फलितं च भविष्यतीति निस्सन्देहं निश्चिन्वन्तु भवन्तः।

भोः संस्कृतभाषानदीष्णाः! भाग्यवन्त एव यूयं ये शक्नुवन्ति स्थिरीकर्तुं समुचितेन नवीकरणेन भारतभूमेः प्राक्तनं धर्मसेतुम्, न्याय्येन मार्गेण प्राप्तुमत्यल्पमप्यर्थम्, धर्मार्थयोरविरोधेन सुखमैहिकमनुभोक्तुम्, आयुरन्ते पुमर्थमुत्तमं च सम्पादयितुम्। पर्याप्ताय विभवार्जनाय न प्रयोजकीभवति विद्येति बहुधोक्तमाचार्यैः—

"उपशमफलाद्विद्याबीजात् फलं धनमिच्छतो
भवति विफलो यद्यायासस्तदत्र किमद्भुतम्? ।
न नियतफलाः कर्त्तुर्भावाः फलान्तरमीशते
जनयति खलु व्रीहेर्बीजं न जातु यवाङ्कुरम् ॥"

इति स्मर्त्तव्यमस्माभिः । शान्तिरेव सर्वसम्पत्तिषु गरीयस्तमा । सा वशवर्तिनी भविष्यति युष्माकम् । "मनसि हि परितुष्टे कोऽर्थवान् को दरिद्रः?" इति न्यायमनुसृत्य सुखं शेरतां सुखं च प्रतिबुध्यन्तां भवन्तः । समेषां युष्माकमुत्तरोत्तरं श्रेयोऽभिवृद्धिर्भूयादिति नक्तन्दिवं प्रार्थये भगवतीं प्रार्थिताधिकप्रदां पयोजासनप्रेयसीम् ।

अयि वत्सला विद्यार्थिनः! सर्वे भवन्तोऽध्ययनाय क्रमन्ते; सर्वा विद्या युष्मासु क्रमिष्यन्ते; न केवलमुत्तिष्ठन्ति पाठशालायामासनादाचार्यैर्दण्डिताः, परन्तु उत्तिष्ठन्त एवेति तर्कयामि । पुराकल्पेऽध्येतॄणां गुरुकुलवास आसीदिति नाविदितं युष्माकम् । श्रूयते महाभारते—धौम्यः शिष्यमारुणिं केदारखण्डं बन्धुं प्रेषयामास । स तत्कर्त्तुमशक्तः समनन्तरमेव तस्मिन् खण्डे शयानस्तदुदकं न्ययन्त्रयत् । एवं तेन गुरुणैव प्रतिषिद्ध उपमन्युः क्षुत्पिपासार्तो वने पर्यटन्नर्कपत्राणि भक्षयन्नन्धोऽभवत् । द्वौ तौ छात्रावनन्तरमतीव तुष्टस्य तस्य महोपदेशकस्यानुग्रहाद्विदितवेद्याववाप्तसर्वकामावभूतामिति । मातापित्रोरपि महीयानाचार्यः! "स हि विद्यातस्तं जनयति तच्छ्रेष्ठं जन्म; शरीरमेव मातापितरौ जनयतः" इत्याह स्म भगवानापस्तम्बः । गुरुशिष्ययोरभिन्नं योगक्षेमं "सह नाववतु सह नौ भुनक्तु; सह वीर्यं करवावहै; तेजस्विनावधीतमस्तु, मा विद्विषावहै" इति शान्तिपाठोऽप्युद्घोषयति । यौनसम्बन्धाद्विद्यासम्बन्धस्य गरीयस्त्वमधुनापि द्रष्टुकामा वरीवृतीत्येव भारतभूमिः । इतरभाषाः पठन्तु, वा न पठन्तु भवन्तः । हिन्दी राष्ट्रभाषा भविष्यति, न वा भविष्यति । सा कदापि न संस्कृतभाषायाः प्रातिनिध्यं वोढुं यत्किञ्चिदपि स्वरूपयोग्यतां सम्पादयिष्यति । को वा दिनमणौ देदीप्यमाने दिनदीपमाश्रयति प्रकाशलिप्सया? न व्यावहासी व्यावक्रोशी वा युष्मानपन्थानं गमयतु । यतध्वं सर्वथा विजयाय । भौतिको विजयः सिध्यतु वा मा वा, विजयमात्मीयं विश्वोत्तरं स्वायत्तीकुरुत । उपनिषदि श्रूयते पुराकल्पे जनकोऽवदत् "याज्ञवल्क्य! किमर्थमचारीः पशूनिच्छन्नण्वन्तानिति । 'उभयमेव सम्राड्' इति प्रत्यवोचद्याज्ञवल्क्यः । उदरपूरं भोक्तव्यम्; उदधेः शास्त्राभिधस्य पारमपि गन्तव्यं विस्मृतलक्ष्यान्तैरव्यवसायसहायैर्भवद्भिः ।

"धर्मे मतिर्भवतु वः सततोत्थितानाम्
स ह्येक एव परलोकगतस्य बन्धुः ।
अर्थाः स्त्रियश्च निपुणैरपि सेव्यमाना-
नैवात्मभावमुपयान्ति न च स्थिरत्वम्" ॥

संवर्धतां धर्मः । अपेतेतिरुपेतसकलसस्या भवतु वसुन्धरा । भान्तु सविभवाः सानुभावाः सायुष्याः सवैदुष्याश्च सर्वे वञ्चिमण्डलवासिनः । सार्वभौमोऽस्मन्महाराजः सर्वजनमैत्रश्चैत्रः पवित्रः स्वप्रजाहृदयप्रतिष्ठितस्वकीयदिव्यमङ्गलविग्रहः सजननीकः सानुजः सबान्धवः ससचिवोत्तमः सपरिबर्हो विजयताम्, विजयताम्, विजेजीयताम् ।

एतस्य समाजशिशोर्यथोत्तरमविघ्नमुपचयं कालोपनीयमानां कल्याणपरम्परां चाशासानोऽद्य विरमामि ।

"सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु ।
सर्वः काममवाप्नोतु सर्वः सर्वत्र नन्दतु ॥"

# अस्ति तारतम्यम् ।

(ए. परमेश्वरशास्त्री, न्यायाध्यापकः)

"रासविलासविलोलं भजत मुरारेर्मनोरमं रूपम् ।
प्रकृतिषु यत् प्रत्ययवत् प्रत्येकं गोपिकासु सम्मिलितम्" ॥

अतिरोहितमिदममरभारतीरसिकानां भारतीयानाम्, यदुपरि समाहरं किमपि मधुरमधुरं पद्यम् । तदिदमनितरसाधारणनैपुणीकेन काव्यसरणौ, कुण्ठेतरपाण्डित्येन शास्त्रार्थबोधने, श्रीनारायणभट्टपादेन निर्मिते प्रक्रियासर्वस्वे सुनिबद्धं मङ्गलपद्यम् । एवं हि श्रूयते प्रकृतपद्यमधिकृत्य यथा— वैयाकरणधुरीणः श्रीभट्टोजिदीक्षितः कदाचित् काशीमधिवसन् नारायणभट्टपादस्य शिष्यं कश्चिदपश्यत्तत्रैवागतं देशाटनकौतुकेन । तयोर्मिथस्संभाषणावसरे प्रासङ्गिकं प्रक्रियासर्वस्वमधिकृत्य भट्टपादशिष्यो भट्टोजिदीक्षितमबोधयत् । ततो दीक्षितचोदनया भट्टपादशिष्यः पूर्वोक्तमङ्गलपद्यस्य पूर्वार्धमश्रावयत् । श्रुते तस्मिन् दीक्षितोऽब्रवीत्— अलमायासेन, अयं तु ग्रन्थकारः कश्चन शृङ्गाररसिकः कविः, नासौ शास्त्रकार इति । तदानीमुत्तरार्धमपि भट्टपादशिष्योऽपठत् । तस्य श्रवणमात्रेण दीक्षितेन्द्रो महता तोषेण भट्टपादपाण्डित्यं बहमन्यत । प्रतस्थे च काशीतः केरळाभिजनं द्रष्टुं नारायणभट्टपादम् इति । एवं भट्टोजिदीक्षितेनापि प्रशंसितमिदं पद्यमित्येतावता प्रत्यपादि । आस्तामिदं प्रासङ्गिकवस्तुकथनम् । प्रकृतमधिकृत्य विवक्षितं वक्ष्यामः—
उदेत्यत्र काचन शङ्का । तथाहि—

"ता नराधिपसुता नृपात्मजैस्तेऽपि ताभिरगमन् कृतार्थताम् ।
प्रत्ययप्रकृतियोगसन्निभः सोऽभवद्वरवधूसमागमः" ॥

इतीदं कविसार्वभौमस्य कालिदासस्य रघुवंशान्तर्गतं पद्यमस्ति । श्रीसीतारामयोः, ऊर्मिलालक्ष्मणयोः, माण्डवीभरतयोः, श्रुतकीर्तिशत्रुघ्नयोश्चोद्वाहमङ्गलमङ्गीकृत्य प्रतिपाद्यं वस्तु प्रस्तुतेन पद्येन प्रत्यपादि कालिदासेन । अस्मिन् पद्ये— 'प्रत्ययप्रकृतियोगसन्निभः सोऽभवद्वरवधूसमागमः' इत्यंशस्य, 'प्रकृतिषु यत् प्रत्ययवत् प्रत्येकं गोपिकासु सम्मिलितम्' इत्यंशेन प्रक्रियासर्वस्वकारेण नारायणभट्टपादेन किमनुकरणमेवावलम्बितमित्यापाततो

जायते काचन शङ्का। सा च न केवलं भट्टपादस्य, किन्तु भट्टोजिदीक्षितस्यापि श्लाघितवतस्तं श्लोकमपकर्षमाश्लेषयति। कथं नाम संघटेत, यद् भट्टोजिदीक्षितमहाशयेन रघुवंशघटकं पूर्वोक्तपद्यं नैव विदितमासीदिति। कथञ्च साधीयसीमुपपत्तिमासादयेद् यदसाधारणेन पाण्डित्येन श्लाघनीयेन कविताकौशलेन च महतीं प्रथामधिगतवता नारायणभट्टपादेन—"छायामपहराति कविः पदमेकं पादमेकमर्धं वा। सकलनिबन्धनहर्त्रे साहसकर्त्रे नमस्तुभ्यम्" इत्युद्घुष्यमाणमनुकरणमपहरणं वा मन्दमतिसाधारणमपवादकारणमभिलषितमिति। नैवं सम्भाव्यम्। तस्मादस्मिन् विषये विचक्षणानां विचारचातुरी प्रसरति। तथाहि—'न केवला प्रकृतिः प्रयोक्तव्या नापि प्रत्ययः' इत्यनुशासनमनुसृत्य प्रकृतीनां प्रत्ययानाञ्च मिथो योगेनैव सार्थता सम्भवतीत्यावेदयन् सीतारामादियोगस्य तद्वत् परस्परसार्थक्यसाधकत्वं सरससरसमभासयत् कालिदासः। नारायणभट्टपादस्तु ततो विभिन्नमेव किमपि शास्त्रतत्त्वं समुदाहरत्। विविधासु प्रकृतिषु सम्मिलित एक एव प्रत्ययो नानारूपेण प्रतीयत इतीदं तत्त्वं भट्टपादेन प्रोद्घाटितम्। गोपिकासु नैकासु प्रत्येकं सम्मिलितमेकमपि भगवतो रूपमनेकमिव दर्शनीयतासम्पन्नमजनीति प्रकृतमाविष्कृतं चमत्कृतिं करोति सुतरां सहृदयानाम्। किञ्च—परस्परकृतार्थताकारिणं प्रत्ययप्रकृतियोगं निदर्शयन्नुपमानविधया, धर्मार्थकाममोक्षरूपपुरुषार्थसाधने दम्पत्योरनुपेक्षणीयामन्योन्यसापेक्षतामुपदिशति कालिदासः। भट्टपादस्तावत्—वस्तुत एकमेवाखण्डसच्चिदानन्दघनात्मकं भगवद्रूपं गोपिकासु प्रत्येकं सम्मिलितमनेकमिव भासमानमुपवर्णयन् प्रकृति (माया)सम्बन्धेन परब्रह्मणो नानाप्रकारेण भानं प्रातिभासिकमवबोधयंश्च परममेव वेदान्ततत्त्वमुपमेयांशेन व्याकरणसरणिमुपमानभागेन चातिरमणीयमवगमयतीत्यहो!! गहनवस्तुप्रस्तावनायां भट्टपादमहाशयस्य ललितमधुराणि रसनिष्यन्दीनि च पदगुम्भनानि कस्य वा सचेतसो मनसि नोत्पादयेत् प्रमोदम्। एतावतानुकरणापवादोऽपि विदूरीकृत इति सर्वमवदातम्।

# अद्वैतसूत्रभाष्यहृदयम् ।

(तोल्लूर् राघवेन्द्राचार्याः, न्यायपण्डिताः)

जातो यदुकुलाम्भोधौ कोऽपि कल्पमहीरुहः ।
भैष्मीभामालताश्लिष्टो वाञ्छितं मे प्रयच्छतु ॥
तोल्लूरुवंशसंभूत "राघवेन्द्रा"ख्यसूरिणा ।
अद्वैतसूत्रभाष्यस्य हृदयं संप्रकाश्यते ॥

## वासुदेववामदेवौ

**वामदेवः**—वयस्य! वासुदेव! चिराद्दृष्टोऽसि । अपि कुशली भवान्? ।

**वासुदेवः**—(स्मरणमभिनीय सविस्मयम्) अजातश्मश्रुणाऽनाकुञ्चितगात्रयष्टिना अनालंबितदण्डहस्तेनास्खलद्वातिनाऽपलितशिरोरुहेण वयसा दृष्टः पुरा, स एवेदानीं सर्वथा विपरीतरूपेण दृष्टोऽसि, यत्पुरा तरुणीभिः स्पृहणीयं मृदुलैर्विरलैश्च श्मश्रुवङ्कुरैर्विलसितं वदनांभोरुहं, तदेव हन्त! इदानीं निशितक्रकचाग्रतीक्ष्णैः पलितैः सान्द्रैः श्मश्रुभिः वृद्धशार्दूलवदनमिव भयावहं, यानि च पुरा प्रेयस्याः करकमलसंस्कृतानि नवनीरदश्यामलानि प्रपदपरिचुम्बीनि शिरोरुहाणि तान्येव हन्तेदानीं कुसुमितकाशसंकाशानि कण्ठदेशविश्रान्तानीत्यहो कालस्य प्रभावः! । चिरकालव्यवहितेन प्रमोदावहेन प्रियसंदर्शनेन शिशिरितानि सर्वाण्यङ्गानि । प्रसीदति च मानसम् ।

**वाम**—वयस्य वासुदेव! निसर्गस्निग्धेन समुचितेन त्वदीयेन वचनपीयूषवर्षेण पीनाङ्ग इव संवृत्तोऽहम् । किं चिरकालीनभूरिपरिश्रमार्जिताऽनल्पकल्पनावैभवव्युदसितवादिव्यूहा यशसा धवलीकृतदिगन्तराला कर्कशकणभक्षाक्षचरणसमयवैदुषीकल्पलता संपादितछात्रप्रपञ्चेन कुसुमिता? किं वेदान्ततत्त्वाकलनोपयोगेन फलिता? केन चोपायेन दिनान्यतिवाहयसि? । का च कृतान्तविषयपरिपन्थिनी पद्धतिः समाश्रिता?

**वासुदेवः**—अस्ति, पश्चिमपारावारतीरे पूगपुन्नागपनसनारिकेलकदल्यादिवनैर्निरन्तरच्छाया धिषणतुल्यैर्न्यायव्याकरणादिशास्त्रनिष्णातैः पण्डितवर्यैर्महाराजोपलालितैर्महाराजक्षेमैकचिन्तापरायणैः कृतनिवासा, हाहाहूहूनिभैः कुशीलवेन्द्रैः सान्द्रा, विविधकलाकुशलाभिः प्रजाभिः परिपूरिता, तडिद्दीपप्रभाभिर्दिवसनिर्विशेषाभिर्निशाभिर्नवनवाभिर्विशालरथ्याभिर्नीरनलिकाभिश्चापरपुरन्दरपुरीव प्रजानां प्रमोदावहा स्यानन्दूरपुरापराभिधानाऽनन्तशयनाभिधाना राजधानी। यत्र च सरीसृपपर्यङ्कशायी नाभिसरोरुहासनेन वेधसा संस्तुतसच्चरितः कमलाकरकमलोपलालितपदपङ्केरुहो भगवान् मुकुन्दो योगनिद्राभिषेण निमीलितनयनोऽपि निखिलजगद्रक्षणैकजागरूको वरीवर्ति।

यत्र च मान्धातेव महितचरितो, हरिश्चन्द्र इवाप्रच्युतसत्यवचनः, सुग्रीव इवोग्रशासनः, दमन इव दुरात्मनां शासिता, धर्म इव सतां त्राता, प्रह्लाद इव परमभागवतः, श्रीचित्रावतारःपृथिवीपतिरनिर्विशेषं प्रजाः परिपालयति।

यस्य च नृपवर्यस्य सुमन्त्र इव दशरथस्य, सुरगुरुरिव शुनासीरस्य, सी. पी. रामस्वम्यार्यनामा सचिवोत्तमः न्याय्येनैव पथा राष्ट्रकार्याणि निवर्हन् यशसा दिगन्तरालं धवळयति। यस्य चामात्यवर्यस्य सन्निहितसमय एव षष्ट्यब्दपूर्त्तिमहोत्सवः संप्रवर्तितः। यस्मिंश्च महोत्सवे एकत्र वसिष्ठवामदेवादितुल्या भूदेवाः घृतोपभृताभिराहुतिभिर्हव्यवाहनमुखेन पुरन्दरप्रमुखानमरान्प्रीणयन्तो वेदघोषेण दिगन्तान्मुखरीकुर्वन्ति स्म। अन्यत्र च गन्धर्वकल्पाः कुशीलवाः श्रोत्रमधुरं गायन्तस्सचेतसां चेतांस्यपाहरन्।

किं बहुना, यस्मिंश्च महोत्सवे सकला अपि प्रजाः स्वस्वयोग्यतानुगुणमशनवसनादिभिः संमानितास्सन्तुष्टाश्चास्य सचिवोत्तमस्य भूयांसि श्रेयांसि प्रार्थयन्ते स्म।

तस्यां राजधान्यां संस्कृतविद्यामन्दिरे प्रधानन्यायशास्त्राध्यापकपदोपलब्धेन रूप्यशतकेन दिनान्यतिवाहयामि।

**वामदेवः**—वयस्य वासुदेव! एतादृशजीवितसाधनश्रवणेन न तृप्यति मे मानसम्। पारलौकिकश्रेयःसाधनं चिकीर्षितं श्रावय।

**वासुदेवः**—साधूदितं प्रियतमेन। दुर्लभेन मानुषजन्मनाऽमुष्मिकं श्रेयो हि सम्पादनीयम्। उक्तञ्चाभियुक्तैः प्राज्ञैः।:—

"बाल्ये वयसि तत्कुर्यात्
 येन वृद्धः सुखी भवेत् ।
सर्वदैव हि तत्कुर्यात्
 येन प्रेत्य सुखी भवेत् ॥" इति ।

उक्तञ्च भगवता बादरायणेन भागवते :—

"तरवः किं न जीवन्ति,
 भस्त्राः किं न श्वसन्त्युत;
न खादन्ति न मेहन्ति
 किं ग्रामपशवोऽपरे ॥

श्वविड्वराहोष्ट्रखरैः
 संस्तुतः पुरुषः पशुः ।
न यत्कर्णपथोपेतो
 जातु नाम गदाग्रजः ॥" इति ।

उद्घोषयन्ति चोपनिषदः :—

"अन्यच्छ्रेयोऽन्यदुतैव प्रेयः,
 ते उभे नानार्थे पुरुषं सिनीतः ।
तयोः श्रेय आददानस्य साधु भवति
 हीयतेऽर्थात्, य उ प्रेयो वृणीते ॥

श्रेयश्च प्रेयश्च मनुष्यमेतः,
 तौ संपरीत्य विविनक्ति धीरः ।
श्रेयो हि धीरोऽभिप्रेयसो वृणीते
 प्रेयो मन्दो योगक्षेमान्वृणीते ॥" इत्याद्याः ।

उक्तं च यदुनाथेन भगवता गीतायाम् :—

ये हि संस्पर्शजा भोगा
 दुःखयोनय एव ते ।
आद्यन्तवन्तः कौन्तेय !
 न तेषु रमते बुधः ॥" इति ।

उक्तश्च भागवतोत्तमेन प्रह्लादेन दैत्यबालान्प्रति :—

रायः कळत्रं पशवः सुतादयो
गृहा मही कुञ्जरकोशभूतयः ।
सर्वार्थकामाः क्षणभंगुरायुषः
कुर्वन्ति मर्त्यस्य कियत् प्रियं चलाः ॥" इति ।

बाल्येऽधीतन्यायशास्त्रो हि भवता सह, तदनु गुरुवर्यानुग्रहासादितवेदान्ततत्त्वरत्नः शास्त्रविहितेन वर्त्मना स्ववर्णाश्रमोचितैर्नित्यनैमित्तिकादिभिः सत्कर्मभिस्सकलकर्मफलप्रदं जडजीवादिभ्योऽत्यन्तविलक्षणमबाधितसर्वजगन्नियन्तारमनन्तानवद्यकल्याणगुणविग्रहं सच्चिदानन्दस्वरूपिणं श्रीरमणं सर्वोत्तमं वासुदेवं प्रीणयन्, तत्प्रसादसमाधिगम्यं स्वस्वयोग्यतानुगुणस्वरूपानन्दानुभवात्मकं परमं पुमर्थं प्रेप्सुरनवरतं श्रीवेदान्तश्रवणमननादिभिः कृतान्तं कान्दिशीकं कुर्वन्, दिनान्यतिवाहयामि । उदाहृतं हि भगवता बादरायणेन भागवते षष्ठस्कन्धे यमदूतान्प्रति यमोक्तं वचनम् :—

"ये वेदशास्त्रपरिगीतपवित्रगाथा
ये साधवस्समदृशो भगवत्प्रपन्नाः ।
तान् नोपसीदत हरेर्गदयाभिगुप्ता-
न्नैषां भयं न च वयं प्रभवाम दण्डे ॥" इति ।

**वाम**—(शिवशिवेति कर्णौ पिधाय, सरोषप्रस्फुरिताधरम्) वासुदेव, विपश्चितोऽपि ते मतिः कथमित्थं विपर्यस्ता ? केन वा गुर्वपसदेन वेदान्तोपदेशमिषेण प्रतारितोऽसि ? । प्रियवयस्य, किं बाढं ब्रूषे ? किं वाऽन्यथाकथनेन मां परीक्षसे ? ।

"क भेदः, क विश्वस्य सत्यत्ववार्ता
क वा निर्गुणे सन्ति धर्मा गुणाद्याः ।
सच्चिदानन्ददिव्याकृतिर्वा कथं
कथं वासुदेवस्य सर्वोत्तमत्वम् ? ॥"

**वासु**—सशपथं बाढं ब्रवीमि । अयमेव सकलशास्त्राभिप्रेतोऽर्थः । स्वीयसमयवासनया भाषते भवान् । आदौ विना मताभिनिवेशं सत्यत्वमधिकृत्य विचारयावः । स्वप्रपन्नानां मायानिरसनसमर्थेन मायागन्धविधुरेण भगवता सृष्टस्य चराचरप्रपञ्चस्य "याथातथ्यतोऽर्थान् व्यदधात् शाश्वतीभ्यः समाभ्यः" ।

इति श्रुत्याद्युद्घोषमप्यविगणयन् मिथ्यात्वं वक्तुं कथं न त्रपते भवान् ? ।

"किमु भवति दरिद्रः कल्पितैः कल्पवृक्षैः
कनकगिरिसहस्रैर्वाऽपि लोके धनाढ्यः ।
श्रवणमननपूर्वैः कल्पितैः साधनौघैः
कथमिव कथयान्ति ब्रह्मभावं पुमर्थम् ? ॥"

**वाम**—किमेतदद्भुतम् ? असतः साधकत्वं हि आस्माकीनं प्रमेयमूर्धन्यम् । तेनासत्यभूतैरेव साधनैरविद्यानिवृत्त्युपहितमखण्डाद्वैतब्रह्मभावात्मकं परमार्थं परमं पुमर्थं संपादयामः । 'तत्त्वमस्या'दिमहावाक्यानीममेवार्थं प्रतिपादयन्त्यद्वैतशाब्दापरोक्षज्ञानोत्पादनेनोपकुर्वन्ति । अयमेव हि त्रिपुरान्तकावताराणां शङ्करभगवत्पादानां परिव्राजकाचार्यवर्याणां परमः सिद्धान्तः ।

**वासु**—'स्वयं नष्टः परान्नाशयती'ति न्यायमनुरुध्य सुधाकरशेखरावताराणामाचार्यपादानां भावमविज्ञाय मुधा स्वाभिप्रेतार्थे तान् प्रमाणयसि ? । सूत्रभाष्यस्य सम्यग्विमर्शनेन सर्वथा तेषां जगदसत्यत्वे न तात्पर्यमित्यवसीयते ।

**वाम**—किन्तद्भाष्यशकलं जगत्सत्यत्वबोधकम् । आपादचूडं भाष्ये जगन्मिथ्यात्वं प्रतिपादयति कोऽयमंशः सहकारकदम्बे विषवृक्ष इव संवृत्तः ? ।

**वासु**—अलमलमत्यावेशेनाचार्याभिप्रायानवबोधविजृम्भितेन ।

"ओं वैलक्षण्याच्च न स्वप्नादिवत् ओम्" इति सूत्रस्य भाष्यं पश्य । तत्र चेत्थं वाक्यस्थितिः "वैधर्म्यं भवति स्वाप्नजागरितयोः । किन्तद् वैधर्म्यं ? । बाधाबाधाविति ब्रूमः । बाध्यते हि स्वप्नोपलब्धं वस्तु प्रतिबुद्धस्य । न चैवं जागरितोपलब्धं स्तम्भादिकं कस्यांचिदप्यवस्थायां बाध्यते" इति । भाष्यग्रन्थेनानेन बाध्यत्वरूपमिथ्यात्वविरुद्धमबाध्यत्वं स्तम्भादिप्रपञ्चस्य स्फुटमवगम्यते ।

**वाम**—किमित्थं भाष्यशकलं बाढमस्ति ? ।

**वासु**—मुद्रितं भाष्यपुस्तकं पश्य ।

**वाम**—(सपदि पुस्तकमानीय यथानिर्दिष्टं वाक्यं पश्यन् आत्मगतम्) किमेवमस्ति भाष्यपङ्क्तिः । अस्तु गतिं चिन्तयामि । (सशिरःकम्पं) अस्ति किलास्माकं व्यावहारिकं नाम सत्यत्वमद्वैतिनां भागधेयम् । तेन समाबास्याम्यमुं वासु-

देवहतकम् । (प्रकाशम्) वासुदेव, वासुदेव, नेदं वाक्यं भवदाभिमतं पारमार्थिकं सत्यत्वं ब्रूते । किन्तु, व्यावहारिकम् । तच्चास्माभिरङ्गीकृतमेव प्रपञ्चस्य । किं भाष्यखण्डेन बिभीषयसि मां? ।

वासु—अलमलमाटोपेन । गुणे दृष्टिर्निधीयताम् । उक्तं हि प्रत्नैः—

"गुणे निधीयतां दृष्टिः किमाटोपैः प्रयोजनम् ।
विक्रीयन्ते न घण्टाभिर्गावः क्षीरविवर्जिताः ॥" इति ।

सम्यग्विचिन्तया निधेहि दृष्टिं भाष्ये । तत्र 'कस्यांचिदप्यवस्थाया'मित्यस्ति । तेन सर्वावस्थास्वबाध्यत्वं सिद्ध्यति । नहि व्यावहारिकं सत्यत्वं मुक्तिदशायामनुवर्तते । तेन सिद्ध्यति पारमार्थिकमेव सत्यत्वं प्रपञ्चस्य ।

वामदेव—(स्वगतम्) शिवाशिव! किमेतदापतितम् । स्वकीयाङ्गुल्यैव स्वनेत्रे कलुषयत्ययं वासुदेवः । (घण्टार्धमालोच्य) अस्ति गतिः! अस्ति गतिः! । जाग्रत्स्वप्नमूर्च्छादीनां भावविकाराणामेवावस्थात्वम् । नहि मुक्तिमवस्थां प्रचक्षते प्रेक्षावन्तः । अतो भाष्यगतेनावस्थापदेन जीवातुना जीवामि । (सप्रहर्षम्) ईश्वर! सन्तु ते नतयः । अवसरे हि शेमुषीमुन्मेषयन्पुष्णासि । आपद्बान्धव इत्यनुरूपं ते नाम । (विहस्य प्रकाशम्) वासुदेव! मुक्तिमवस्थेति न केऽपि प्रचक्षते । अवस्थापदेन मुक्तेर्व्यवच्छेदे, इतरासु सर्वास्ववस्थासु व्यावहारिकसत्यत्वानपायेन नेदं भाष्यशकलं पारमार्थिकसत्यत्वपरम् ।

वासु—"ओं मुक्तिफलानियमः तदवस्थाऽवधृतेः ओम्" इति सूत्रभाष्ये "ब्रह्मैव हि मुक्त्यवस्था" इति भाष्यग्रन्थेन मुक्तेरवस्थात्वं मुक्तकण्ठं तैरेवाभिहितम् । किमन्येषां प्रेक्षावतां गवेषणेन ।

(क्रमशः)

# मीमांसाशास्त्रमधिकृत्य यत्किञ्चित्प्रास्ताविकम् ।

(महोपाध्यायशिरोमणिः, एस्. परमेश्वरशर्मा । )

पुरुषार्थचतुष्टयसिद्धिर्वेदार्थज्ञानाधीनेत्यास्तिकानामस्माकं भारतीयानां सर्वेषामपि विदुषां सिद्धान्तः । तत्र कस्यापि न कापि विप्रतिपत्तिः । विधिमन्त्रनामधेयनिषेधार्थवादात्मकस्य वेदस्यार्थं वर्णयितुं प्रवृत्तः कश्चित् व्युत्पन्नोऽपि व्याकरणादिशास्त्रेषु कृतभूरिपरिश्रमोऽपि प्रायो मुह्यत्येव । यद्यपि श्रुतव्याकरणाद्यङ्गस्याधीतवेदस्य व्युत्पन्नस्य सामान्यतः संभवति वेदस्यार्थज्ञानं तथापि, अस्य पदस्यायमेवार्थ इति निर्णयो न स्यात्, विचारमन्तरा निर्णयस्यासंभवात् । यथा—"अक्ताः शर्करा उपदधाती"त्यस्ति काचन श्रुतिः । तत्र येन केनापि द्रवद्रव्येण लिप्ताः क्षुद्रपाषाणा उपधातव्या इत्यर्थो ज्ञायते । लेपनद्रव्याणि च सन्ति बहूनि । तेष्वन्यतमेन केन वा लेपनद्रव्येण लिप्तानां शर्कराणामुपधानं विधीयत इति मीमांसाशास्त्रेणैवावगन्तुं शक्यते । उपधानं नाम राशिरूपेण घटनाविशेषः । अक्ताः शर्करा इत्यत्र केन वा द्रवद्रव्येण लेपनं कर्तव्यमित्यस्ति काचनाकाङ्क्षा । इयञ्चाकाङ्क्षा व्याकरणेन, निरुक्तेन, निगमेन, अन्येन वा केनापि शास्त्रेण न निवर्तते । तदनन्तरञ्च श्रूयते किमपि श्रुतिवाक्यं "तेजो वै घृतम्" इति । अनेन वाक्येन घृतस्य स्तुतिः क्रियते । यस्य चानुष्ठानार्थमपेक्षा तस्यैव स्तुतिः क्रियते लोके । अनया च घृतस्तुत्या घृतेन किञ्चित् कर्तव्यमिति बोध्यते । अस्मिन्नपि वाक्ये घृतेन कर्तव्यं किमित्याकाङ्क्षा तावदुदेति । "अक्ताः शर्करा" इत्यत्रापि काचनोदितास्त्याकाङ्क्षा । इत्थं परस्परसम्बन्धेन नष्टाश्वदग्धरथन्यायेन तेजस्करेण घृतेन लिप्तानां क्षुद्रपाषाणानां राशिरूपेण घटनाविशेषो विधीयत इत्यर्थस्तावत् वेदार्थविचारपरेण मीमांसाशास्त्रेणैव निर्णीयते । एवञ्च वेदार्थनिर्णयाय मीमांसाशास्त्रमत्यन्तमपेक्षितं भवति । एवं वेदार्थज्ञानविषये तत्र तत्र विचिकित्सायां प्राप्तायां वेदार्थो विस्मृतो माभूदिति करुणाविष्टचेतसा भगवता जैमिनिना मुनिना वेदार्थविचारात्मकं सूत्ररूपं मीमांसाशास्त्रं वेदार्थबुभुत्सून् जनाननुग्रहीतुं विरचितमास्ते । तस्यैव कर्ममीमांसेत्यपरा संज्ञा । यतो वेदे विद्यमानानां कर्मकाण्डान्तर्गतानां श्रुतिवाक्यानामर्थो मीमांस्यते । श्रुत्युक्तकर्मसाधिकानां श्रुतीनां विचाररूपो भागः, मीमांसात्वेन जैमिनीयत्वेन च ख्यातिपगतो लोके वरीवर्ति ।

तस्य च प्रस्थानद्वयं वर्तते। तत्रैकं भाट्टाभिधमपरं प्राभाकराभिधमिति। प्रभाकरश्च कुमारिलभट्टाचार्याणामन्तेवासीति प्रसिध्या तन्मतस्यापि बहुतिथात्कालादारभ्य प्रचारः संसिद्धो वर्तते। कुमारिलभट्टाचार्यास्तु, अद्वैतविद्योपदेशाचार्यधुर्याणां श्रीशङ्करभगवत्पादानां समकालिकास्तैस्सभाजिताश्चासान्निति शङ्करविजयाख्यकाव्यात् ज्ञायते। प्रभाकरगुरुश्च केरलीय इत्यस्माकं सर्वेषां केरलीयानां बहुमानभाजनमिति विशिष्य नेह प्रतन्यते। विदितमेव हीदं यत्, श्रीजगद्गुरुशङ्कराचार्याः केरलीया आसन्निति। तथापि तेषां कालस्तावत् सम्यङ् निश्चेतुं पण्डितोऽपि न पारयति। यतः श्रीजगद्गुरुपादानां समयः क्रिस्तीयाब्दारम्भात् पूर्वं इति, क्रिस्ताब्देषु सप्तमं शतकमिति, अष्टमी शताब्दीति, नवमं वर्षशतकमिति च परपक्षनिरासपूर्वं वादकोलाहलमारचयतां पौरस्त्यानां पाश्चात्यानां च चरित्रकाराणां विवादसमरो नाद्यापि विश्रान्तिमुपगतः। एवं स्थिते भाट्टमतप्रतिष्ठापकस्य कुमारिलभट्टाचार्यस्य समयः कथन्तरां शक्यते सम्यङ् निर्णेतुम्? । तथापि पौरस्त्यपण्डितानां प्राचीनानां जीवितकालनिर्णायकेष्वन्यतमेन कैंब्रिज् विश्वविद्यापीठस्थ संस्कृताध्यापकेन श्रीमता माक्डोनल् महोदयेन क्रिस्तीयानां सप्तम्यां शताब्द्यां कुमारिलभट्टाचार्याणामवस्थितिरासीदिति साधितमास्ते।

अस्य च भाट्टसम्प्रदायस्यात्र केरलेषु बहुभ्यो ह्यब्देभ्यः प्रागेव प्रचार आसीदिति शक्यतेऽस्माभिरभ्यूहितुम्। यतोऽत्र केरलदेशे विद्यमानानां पण्डितानां प्रतिगृहं तालपत्रात्मिका मीमांसाग्रन्था दृश्यन्ते। किञ्चास्मद्राजकुले, इतो गां गतान् पुण्यश्लोकान् प्रातः स्मरणीयान् महाराजानुद्दिश्यास्माकं महाराजैः "पट्टत्तानमिति" यत्कर्मानुष्ठीयते, तदिदं कर्म भाट्टमतानुयायिभ्यः केरलब्राह्मणेभ्यस्तावद्दीयमानं दानमेव भाट्टदानं, भट्टद्दानं, पट्टत्तानमिति मन्ये विपरिणमितं स्यादिति। तद्यथाकथञ्चिदस्तु। बहुकालादारभ्यास्माकं राज्ये प्रचारमुपगतस्तं मीमांसाशास्त्रस्य स्वरूपमापाततोऽपि विज्ञातुं देशाभिमानिनः कस्य वा जनस्य न स्यात् कुतूहलम्।

इदञ्च मीमांसाशास्त्रं ब्रह्मविचारपरं वेदान्तशास्त्रमिवाधिकरणप्रस्थानरीत्या प्रपञ्चितमास्ते। अधिकरणं नाम:—

"विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्।
सिद्धान्तः सङ्गतिश्चेति शास्त्रेऽधिकरणं विदुः॥"

इति वचनासिद्धं विषयादिपञ्चाङ्गमेत्र। तत्र सर्वेषामप्यधिकरणानां किमपि श्रुतिवाक्यं विषयो भवति। तद्विषयवाक्यममुमर्थं बोधयाति वामुमर्थं बोधयति वेति सन्देहो विशयः। तयोरन्यतरकोटेः सोपपात्ति निरास एव पूर्वपक्षः। पूर्वपक्षनिराकरणपुरस्सरमुत्तरपक्षसमर्थनमेव सिद्धान्तः। पूर्वोत्तरयोरधिकरणयोः सम्बन्धः सङ्गतिः। एवं जैमिनिप्रोक्तानि वेदार्थनिर्णयपराणि परःसहस्रं सन्त्यधिकरणानि। तेषामाधिकरणानां संग्रहस्तावदस्यां पत्रिकायां भागशः प्रकाशयिष्यते। तच्च भारतवर्षीयाणामार्यमताभिमानिनां, विशिष्यास्मद्देशीयानामुपकृतये मन्ये प्रीतये च स्यादिति शम्॥

---

TRIVANDRUM
958

# वर्णानाम् आभ्यन्तरप्रयत्नविवेकः

[Dr. K. Goda Varma M. A. Ph; D. (Lond.)]

वर्णानाम् उच्चारणे य आयासः स प्रयत्नशब्दवाच्यो भवति । स द्विविध आभ्यन्तरो बाह्यश्चेति । ताल्वादिषु स्थानेषु जायमानत्वेनाभ्यन्तरत्वं तद्बहिर्देशजायमानत्वेन बाह्यत्वञ्च प्रयत्नयोर्वेदितव्यम् । तत्राभ्यन्तरं प्रयत्नमाधिकृत्यैव विचारः प्रस्तूयते ।

आभ्यन्तरप्रयत्नास्तावत्पञ्चेति परिकल्पिताः । स्पृष्टेषत्स्पृष्टेषद्विवृतविवृतसंवृतभेदात् । जिह्वाग्रोपाग्रमध्यमूलानि[1] तत्तद्वर्णोत्पत्तिस्थानं यदा सम्यक् स्पृशन्ति तदा स्पृष्टत्वं, यदेषत्स्पृशन्ति तदेषत्स्पृष्टत्वं, पूर्वोक्तभागचतुष्टयात्मकस्य जिह्वातलस्य वर्णोत्पत्तिस्थानाद्दूरतोऽवस्थाने विवृतत्वम्, ईषद्दूरतोऽवस्थान ईषद्विवृतत्वं, समीपावस्थानमात्रे संवृतत्वञ्चेति प्रयत्नविषये भेदप्रकारो द्रष्टव्यः ।

वर्णानाम् आभ्यन्तरप्रयत्नविवेकस्तावेदेवम्—"स्पृष्टं प्रयतनं स्पर्शानाम्[2]" "ईषत्स्पृष्टमन्तःस्थानाम्[3]" "ईषद्विवृतमूष्मणाम्[4]" "विवृतं स्वराणाम्", "ह्रस्वस्यावर्णस्य प्रयोगे संवृतम्" इति ।

प्राधान्येन प्रयोजिकात्वं जिह्वाया नोपलभ्यते पवर्गाणाम् उपध्मानीयस्य वकारस्य चोच्चारणे । प्, फ्, ब्, भ्, म्—इमानि स्पृष्टव्यञ्जनानि केवलमोष्ठाभ्यां संस्पर्शनेन निर्वर्त्यन्ते । ᳲप, ᳲफ,—इत्युपध्मानीयवर्णौ स्वाश्रयस्य पवर्गस्य

---

1. The tip, the front, the middle and the back of the tongue.

2. कादयो मावसानाः पञ्चविंशतिर्वर्णाः स्पर्शाः ।

3. य्, व्, र्, ल्,-इति चत्वारो वर्णा अन्तःस्थाः । स्वराणां व्यञ्जनानाञ्च मध्ये पतितत्वादेतेषामन्तःस्थत्वम् । य्, व्, र्, ल्, इत्येषां संप्रसारणदशायाम् इ, उ, ऋ, ऌ इति स्वरतापत्तिस्तथा इ, उ, ऋ, ऌ, इत्येतेषाम् अच्सन्धौ य्, व्, र्, ल् -इति व्यञ्जनतापत्तिश्चात्र संज्ञाकरणे तत्त्वं विशदयतः । रेफलकारश्चार्धस्वराभ्यां (Semi-vowels) यकारवकाराभ्यामतिशायितं स्पृष्टत्वमावहत इति तयोः 'Liquid' इति पृथक्संज्ञा नवीनैर्भाषातत्त्वशास्त्रज्ञैर्दत्ता ।

4. श्, ष्, स्, ह्-इति चत्वारो वर्णा ऊष्माणः । एतेषामूष्मत्वञ्च स्थानगतसंघर्षाधिक्येन श्वासस्योष्मलत्वाद्विज्ञेयम् ।

स्थानं भजन्तौ विनैव जिह्वाबन्धमुच्चारणक्षमौ भवतः । अधरोष्ठस्य दन्तानाञ्चेतरेतरयोगेनोदयन् वकारोऽपि जिह्वानपेक्षः । अनुस्वारस्य (अं-इत्यादिषु स्वरात्परस्य ध्वनेः), अनुनासिकानां स्वराणाम् (अँ इत्यादीनाम् ), अनुनासिकानां व्यञ्जनानाम् (ङ, ञ्, ण्, न्, म् इत्येतेषाम् , ) अनुनासिकानां यवलानाञ्चोच्चारणे तावदास्यपृष्ठान्नासिकामनुवर्तमानस्य द्वारस्य विवृतिः स्निग्धतालुनोऽधोनयनेन[5] जायते। यथा श्वासधाराया बहिर्गमनं नासारन्ध्राभ्यां स्यात्तदनुकूलः प्रयत्न एव नासिकायां परिकल्प्यते । एतेन जिह्वाया नासिकया साकं योगो मुखगतैः स्थानैरिव वर्णोच्चारणप्रयत्ने न संभवतीति विशदमेव ।

अन्तःस्थेषु य्, व् इत्यनयोः Semivowels (अर्धस्वरौ) र्, ल्, इत्यनयोः Liquids (द्रवध्वनी) इति च व्यपदेशः कृतो दृश्यते । यदा इकारोकारौ स्वरौ आस्यगतावयवघर्षणविशेषेण केषुचिद्व्यञ्जनेषु परं प्रसज्यमानेन धर्मेण युज्ञाते, तदा यकारवकाररूपतां प्राप्नुतः। रेफलकारौ तु व्यञ्जनानां धर्मान् सकलानप्यावहन्तौ तयोरुच्चारणे जिह्वायाः स्थितिं कस्याप्यनुध्वननस्य (resonance) समनुकूलां स्वरेष्विव कुर्वन्तौ पूर्वाभ्यां भिद्येते ।

ऊष्माणः (spirants) स्वरा इवानुस्यूततामुच्चारणे बिभ्रति । अत एव तेषां स्वराणाञ्चाभ्यन्तरप्रयत्नं समम् ऊचुराचार्याः । निष्कृष्टपक्षे स्वरेभ्य ऊष्मणां विवृतत्वस्य न्यूनत्वादीषद्विवृतत्वमङ्गीकृतञ्च दृश्यते ।

यद्यपि सर्वेषां स्वराणां विवृत आभ्यन्तरप्रयत्न इत्युक्तं तथापि संवृतविवृतभेदः स्वरेष्वपि कर्तुं शक्यत एव । जिह्वायाः पूर्वपश्चाद्भागयोरन्यतरस्यास्योपरितलस्य च सामीप्यं येषां वर्णानामुच्चारणे ते स्वराः संवृतप्रयत्नकाः । यथा जिह्वायाः पूर्वपश्चाद्भागयोरास्योपरितलस्य च सामीप्येन यथाक्रमम् इवर्णोवर्णयोरुच्चारणमिति तयोः संवृतत्वम्। अनेनैव क्रमेण पूर्वोक्तस्य सामीप्यस्य किञ्चिदूनतया तु एकारस्य ओकारस्य चेवर्णोवर्णापेक्षया विवृतत्वञ्च बोध्यम् । जिह्वाया आस्योपरितलाद् दूरवर्तितयाकारस्येतरेभ्यः सर्वेभ्योऽपि स्वरेभ्यो विवृततरत्वन्तावत् स्पष्टीभवत्येव । किञ्चेकार एकारश्च पूर्वस्वरौ (Front vowels), उकार ओकारश्च पृष्ठस्वरौ (Back vowels)- इति पृथग्गणनापि यथाक्रमं जिह्वायाः पूर्वभागस्य पश्चाद्भागस्य चास्योपरितलसामीप्येनाधुनिकैः कृता भवति ।

---

5. Soft Palate.

ह्रस्वस्याकारस्य प्रयोगे संवृतं प्रयतनामिति प्राचीनानामुक्तिस्तावदकारस्य संपूर्णतो विवृतस्य व्यवहर्तॄणां प्रयत्नलाघवप्रचोदितेनौदासीन्येन संवृतत्वमापद्येतेत्यमुमर्थं ज्ञापयति । स्वराणामपि यः संवृतविवृतभेदः पूर्वमस्माभिः प्रपञ्चितस्तद्रीत्या चिन्त्यमाने प्रयोगदशायामकारस्तावद्यदा जिह्वायाः पूर्वभागेन संव्रियते तदा अकारस्य एकारस्य[6] चान्तरालवर्ती कश्चित्स्वर इति, यदा च जिह्वायाः पृष्ठभागेन संव्रियते तदा अकारस्य ओकारस्य[7] चान्तरालवर्ती कश्चित् स्वर इति च व्यक्तं भवति । ह्रस्वमकारम् औत्तराहा अकारस्य ओकारस्य[8] च मध्यवर्तितया, तथा द्राविडा अकारस्य एकारस्य[9] च मध्यवर्तितया चोच्चरन्तीति यदनुभवामस्तदेवाकारस्य संवृतत्वप्राप्त्यनुकूलां युक्तिं प्रकटयति । दीर्घस्याकारस्य (आ) तूच्चारणकालाधिक्यं पूर्ववत् संवृतत्वे प्रतिबन्धकं भवति ।

शुभम् ।

---

6. Short e.
7. Short o.
8. Short o.
9. Short e.

# * प्रपञ्चस्य किं कारणम्?।

(Mahopadhyaya, Ravi Varma Thampan, Vyakarana Pandit.)

दृश्यस्यास्य प्रपञ्चस्य किं नु कारणं भवेत्? को वास्य कर्ता? किं वास्य सृष्टेः प्रयोजनं? इत्येवमादयः प्रश्नाः प्रपञ्चतत्त्वं जिज्ञासून् प्रेक्षावतस्सर्वानपि निरन्तरं क्लेशयन्तो दृश्यन्ते। एवं कदा कुत्र वा स्यादस्योद्भवः? इति प्रपञ्चस्य उत्पत्तिकालदेशावपि लोके जिज्ञास्येते। आधिकारिसिद्धान्तमश्रद्दधाने युक्तिमात्ररसिकेऽस्मिन्नाधुनिकलोक ईदृशान् प्रश्नान् यथावत्समाधातुमयं समारम्भः।

मनुष्यराशेः सर्वानपि संशयान् परिहृत्य प्रपञ्चस्य परमात्मस्वरूपं परमार्थतत्त्वं प्रकाशयितुं प्रवृत्तं वेदान्तशास्त्रं न हि कुत्रापि कुण्ठीभवति।

ईदृशान् प्रश्नान् तत्तच्छास्त्रकारा बहुधा समाधातुं प्रयतन्ते। तत्र केचन "ईश्वरेच्छया परमाणवः परस्परं संयुज्येमं स्थूलप्रपञ्चमुत्पादयन्ति" इति वदन्ति। अपरे केचित् "प्रकृतिरेकैवैतत्प्रपञ्चाकारेण परिणमते" इत्यभिप्रयन्ति। मायापरपर्यायमज्ञानमेव सर्वस्यास्य निदानमिति सिद्धान्तोऽपि सुप्रसिद्ध एव। पाश्चात्यपण्डितानामभिप्राये पूर्वैरङ्गीकृतपूर्वाणामनेकेषां कारणपदार्थानां स्थाने सम्प्रति द्रव्यं शक्तिः (Matter and force) इति द्वयमेव प्रपञ्चकारणमुच्यते।

कारणप्रश्नानेवं समाधाय प्रयोजनमधिकृत्य क्रियमाणस्य प्रश्नस्य "ईश्वरस्य क्रीडार्थम्, स्वभाव एव केवलम् इत्यादि समाधानं दृश्यते।

"अयं प्रपञ्चोऽनादिर्भवति। अस्यादिर्नास्ति" इत्येवमुद्भवकालविषयः प्रश्नस्समाधीयते। स्वस्वकारणदेशेषु पदार्थास्तिष्ठन्तीति देशप्रश्नोऽप्युत्तीर्यत इति सम्प्रदायः।

अद्यत्वेऽनेकेषु प्रभाषणमण्डपेषु पत्रलेखनेषु तथाविधेऽन्यत्रापि च महानयमुद्घोषः प्रसिद्ध्यति; "अयं प्रपञ्चः कथमुत्पन्नः? कोवाऽस्य कर्ता?" इत्येवमादीनां चोद्यानां तृप्तिकरमुत्तरं वक्तुं न कोऽपि शक्नोति। एनमभिप्रायमधिकृत्य न कोऽपि प्रतिषेधशब्दः क्वापि समुपलभ्यते। अतः किं ज्ञायते? पूर्वोक्तानि समा-

* प्रकाशयिष्यमाणादात्मस्वरूपनाम्नो ग्रन्थादुद्धृतो भागः।

धानानि जिज्ञासूनामाशङ्कां न वारयन्तीत्येव स्पष्टं प्रकाशते। किमत्र निदानं भवितुमर्हति ?।

इह खलु लोके सर्वस्यापि पदार्थजातस्य विज्ञानसम्पादनाय प्रहतो मार्गः प्राधान्येन कार्यकारणान्वेषणमेवेति प्रसिद्धम्। अपूर्वस्य कस्याप्यर्थस्य दर्शने प्रथमतः किं किं प्रयोजनं तेन सेत्स्यतीति विज्ञातुं प्रेक्षको लोकः प्रयतते। ततः केन कारणकलापेन सोऽर्थस्सिध्यति, कर्ता च तस्य कः कीदृशो वा, इति ज्ञानाय प्रयस्यति। अनन्तरं तस्यार्थस्योत्पत्त्यनुकूलौ कालदेशावपि ज्ञात्वा तमर्थं विज्ञातमेव लोकोऽभिमन्यते। एवं च कारणं कार्यं कालो देश इतीमान् चतुर उपाधीन् आश्रित्यैव प्रापश्चिकानां सर्वेषामप्यर्थानां सर्वाण्यपि विज्ञानानि लोके प्रसिध्यन्तीति स्पष्टमेव। प्रत्यक्षयोग्यस्यार्थस्य बाह्यस्वरूपेऽपि कामं दिदृक्षा सम्भवतु। वस्तुतो देशकालयोरपि कारणत्वेन, फलस्यापि कयाऽपि विधया तत्सम्भवाच्च सर्वस्याप्यर्थस्य विज्ञानसम्पादनाय कारणविज्ञानमेकमेव लोके मुख्यो मार्गः, परिचयपदवीमधिरूढो नान्योऽस्तीत्यायाति।

इदमिह सम्प्रधार्यं वर्तते। कार्यकारणान्वेषणरूपोऽयं लौकिको मार्गः प्रपञ्चतत्त्वविज्ञाने किमुपायो भवेत्? नैव भवेदित्येवं वक्तव्यमास्ते। नौकायामन्तरेव तत इतो धावनं तीरप्राप्तावनुपाय एव भवति। एवं प्रपञ्चान्तर्भूतानां घटपटादिसमानयोगक्षेमाणां कार्यकारणत्वकालदेशानां विज्ञानमपि कृत्स्नस्य प्रपञ्चस्य तत्त्वावगमे नैवोपायो भवितुमर्हति। प्रापञ्चिकानां पदार्थानां केवलमापेक्षिकसत्यत्वमेवास्ति। कार्यकारणान्वेषणरूपेण प्रापञ्चिकेनोपायेन तेषां यद्विज्ञानं सम्पद्यते तदपि प्रापञ्चिकमेव। तस्यापि सत्यत्वमापेक्षिकमेव सम्भवितुमर्हति। तस्मादापेक्षिकसत्यत्ववता कार्यकारणविज्ञानेनापेक्षिकसत्यत्ववतां तत्तत्प्रापञ्चिकपदार्थानां तादृशमापेक्षिकसत्यत्ववद्विज्ञानं कामं सम्भवति, न पुनः सर्वस्य प्रपञ्चस्य परमार्थभूतं विज्ञानं ततः सम्भवति। अत एव परमार्थतत्त्वं जिज्ञासून् प्रति "अथातो ब्रह्मजिज्ञासा" इति प्रपञ्चस्य पारमार्थिकस्वरूपभूतब्रह्मजिज्ञासोपायत्वेन वेदान्तशास्त्र उपदिश्यते, न पुनः कारणजिज्ञासा। वस्तुतः कारणत्वं कार्यत्वं वा ब्रह्मणि नास्तीति "अपूर्वमनपरम्" इत्यादिश्रुत्या सिद्धान्तितं पर्यालोचयतां "जन्माद्यस्य यतः" इति कारणत्वोपदेशः, केवलं कारणवासनावासितानुरञ्जयितुमेवेति स्पष्टमेव।

एवं परमार्थज्ञानेऽनुपायेनापि, प्रापञ्चिकस्यार्थजातस्य प्रापञ्चिकविज्ञान उपायभूतेन चिरपरिचितेन सजातीयविजातीयशून्यत्वात् सर्वातिशायित्वेनाभिमन्यमानेन

कार्यकारणविज्ञानेन सर्वस्यापि यथार्थविज्ञानं सम्भवीति मिथ्याभ्रम एव पूर्वोक्तानां प्रपञ्चस्य किं कारणम्? कः कर्ता? इत्यादिप्रश्नानां निदानम्। स्वरोगशान्तिलिप्सोः कस्य चिद्रोगिणो रोगान्तरचिकित्साजिज्ञासेव प्रपञ्चतत्त्वं जिज्ञासूनां कार्यतः कारणतो वा देशतः कालतो वा प्रपञ्चस्य जिज्ञासा विफलैव। तथाहि—परमाणवः, प्रकृतिः, मायेत्येवमादीनां प्रपञ्चकारणत्वं प्रतिज्ञायते चेत्तेषामपि कारणं किं स्यादिति जिज्ञासा सामान्येन स्वयमेवोत्पद्यमाना दृश्यते।

"पटस्स किं कारणं?" इति पृष्टे "तन्तवः" इत्युत्तरं दीयते। उत्तरस्यास्य श्रवणसमनन्तरक्षण एव "तन्तूनां किं कारणम्" इति प्रश्नस्समुदेति। एवं क्रमेण क्रियमाणानां मूलमूलकारणप्रश्नानामुत्तरत्वेन कार्पासं तद्बीजमित्याद्युच्यते। एवमारभ्य पटादिषु वितायमाना दीर्घदीर्घा प्रश्नोत्तरपरम्परा परमाणुं गच्छति। जिज्ञासूनां प्रश्ने परमाणूनतिक्रम्य जिगमिषत्युत्तराणां वक्ता मध्येमार्गं साङ्केतिकं कंचन प्रतिबन्धमुन्नयति। "परमाणूनां कारणं नास्ति, तेऽविभाज्या नित्याश्च भवन्ति" इत्येवमादयो वादास्तत्रोत्थाप्यन्ते। अत्रेदं श्रद्धेयमास्ते। यद्यपीदृशान् वादानुचितमभिमुखीकर्तुं सामान्यजिज्ञासवो न प्रगल्भन्ते तथापि तेषां जिज्ञासा लेशतोऽपि न शाम्यतीति निश्चप्रचम्। प्रतियुक्तीनामस्फुरणात्परं तदा मूकिमावलम्ब्यत इत्येव। वस्तुतः प्रथमसोपानेष्वेव—पटे, तन्तुषु, कार्पासे वा—कारणं नास्तीत्युच्यते चेत् संभवन्ती स्वाभाविक्यसंन्तृप्तिः कार्यकारणप्रश्नोत्तरशृंखलायां बहुदूरमाकृष्य वृथा दीर्घयित्वा परमाणुषु निबद्धायामपि तथैव यथापुरमवशिष्यत एव। विभाज्यं सर्वमपि सकारणं भवति, परमाणुस्त्वविभाज्यत्वादकारण इति युक्तिरप्यकिञ्चित्करी। यतोवयवसंयोगात्कार्योत्पत्तिरिति सिद्धान्तं सिद्धवत्कृत्यायं युक्तिवादः प्रादुर्भवति। स सिद्धान्त एव वादग्रस्तो वर्तते। परमाणुकारणिनामारम्भवाद इव ततोऽप्यधिकमेव वा प्रामाणिका भवन्ति परिणामवादविवर्तवादापेक्षिकवादादयः सिद्धान्ताः।

एषु परिणामादिवादेष्वपि तादृशं किमपि स्थानं नैव समुपलभ्यते, यत्र सामान्यजिज्ञासूनां कारणान्वेषणपराणि चोद्यान्याकांक्षां प्रशमय्य स्वयमेव विरमन्ति। सर्वकारणत्वेन प्रतिज्ञायमानायाः प्रकृतेर्मायाया वा किन्नु खलु कारणं भवेदिति सामान्यानां स्वत एवोत्पद्यमानस्य स्वाभाविकस्य प्रश्नस्य तत्रापि लभ्यमानं समाधानं परमाणुस्थलीयात्तस्मान्नेषदपि विशिष्यते। अकारणोऽन्येषां कारणभूतश्च कश्चित्पदार्थस्तत्राप्यवश्यमङ्गीकर्तव्यो वर्तते। इहाप्यकारणस्य सर्वकारणस्य कस्यचित्पदार्थस्याङ्गीकारमकृत्वा कारणप्रश्नस्य समाधानाय मार्गान्तरमपश्यतां यद्यपि मौनमेवालम्ब-

नीयम्भवति तेषां तन्मौनं जिज्ञासानिवृत्तिजन्यायास्सन्तृप्तेः सूचकं नैव भवति। जिज्ञासाशान्तेरभावादाकांक्षाऽतृप्तिश्च पुनरपि पुरेव क्लेशयन्त्यौ वर्तेतैवेति सर्वानुभवसिद्धं वस्तु नापलापमर्हति। अत एवाद्यत्वे 'मतप्रसङ्गेषु' प्रपञ्चस्य कारणमज्ञातं भवति, तस्य किं कारणम्? तत्तु वयं न जानीमः, इति नवीना कापि वादसरणिर्दृश्यते। एवं वदतां कस्यादाशयः? "अज्ञानस्यापि किञ्चित्कारणमस्त्येव। परन्तु तस्य ज्ञाने कश्चिदुपायोऽद्यावधि न केनाप्युपज्ञात इत्येव" इति हि तेषामाभिप्रायः।

उत्तरोत्तरकालिकानां पूर्वपूर्वकालोत्पत्तिप्रदर्शने सर्वेषामप्यादिभूतः पदार्थः कदोत्पन्न इति प्रश्नः प्रादुर्भवति। तत्र "आदिर्नास्ति, अनादिरयं प्रवाहः" इत्युक्तिरप्युद्भवकालस्य जिज्ञासां न शमयति। चक्रवत्सृष्टिप्रवाहं सङ्कल्पयतः का वा शङ्कानिवृत्तिः। सन्तृप्तेः कथापि सुदूर एव।

"अन्धपरम्परेयमनादित्वप्रकल्पना" इति शङ्करभगवत्पादाः सूत्रभाष्येऽनादित्वकल्पनां मुक्तकण्ठमाक्षिपन्ति। तस्यास्त्यागे गत्यन्तराभावं सूचयन्तो व्याख्यातारः प्रामाणिकमप्रामाणिकञ्चेत्यनादित्वं द्विधा विभजन्तीत्यन्यदेतत्। वस्तुत आदिरस्ति परन्तु ज्ञातुं न शक्यत इति हि तेषामाशयः। इदमप्युद्भवकालप्रश्नेऽनादित्वसिद्धान्तस्यानुत्तरतामेव स्पष्टयति। यतो जिज्ञासानिवर्तकमेवोत्तरं भवितुमर्हति। कार्यकारणादिज्ञानं कृत्स्नस्य प्रपञ्चस्य यथार्थज्ञान उपायो भवेद्वा न वेत्येव प्रथमं परीक्षणीयमित्यवोचाम। तदकृत्वा परिचितचरमेव मार्गमवलम्ब्य सर्वविज्ञाने प्रयतमानाः प्रष्टारो वक्तारश्चोभयेऽपि कारणानि पृच्छन्ति कारणान्येवोत्तरयन्ति च। अन्तन्तु न गच्छन्ति। इदमेवास्य महतोऽनर्थस्य मूलम्। यदनुपाय उपायत्वभ्रमः। इह हि यदेव पृच्छ्यते तदेवोत्तरमुच्यते। तच्च पुनःपुनरावर्त्यते। ईदृशानां चोद्योत्तराभासानां चोद्योत्तरत्वे न किञ्चिच्चोद्यं चोद्यते चेति महतीयं कापि विडम्बना।

प्रपञ्चस्य किं कारणमिति पृच्छन्तः कारणं प्रपञ्चाद्बहिर्भूतमिव मन्यन्ते। सोऽयं प्रमाद एवादौ विशोधनीयः।

इहास्माकं जिज्ञासाविषयोऽयं प्रपञ्चः कार्यं कारणञ्चेति द्विधा विभागमर्हति। सर्वमप्यर्थजातमेकस्य कारणमपरस्य कार्यं वा भवति। नित्यत्वेन कैश्चिदभिमन्यमानानां कालादीनामपि कारणत्वं निर्विवादमेव। एवञ्चानयोरनन्तर्भूतः पदार्थो लोके नास्त्येव।

वीरः शूर इत्यादीनां वीरताविशिष्टः शूरताविशिष्ट इत्यादिवत्कारणं कार्यमित्यादीनां कारणताविशिष्टमित्यादिरेवार्थः। तत्र कारणता नाम तत्तदर्थानां स्वरूपभे-

चेति वदन्ति । केचित्तामतिरिक्तपदार्थं मन्यन्ते । अत्र निष्कर्षोऽस्मत्कृतावात्मस्वरूपे द्रष्टव्यः । इह त्वागोपालं प्रसिद्ध एवार्थो विवक्ष्यते । उपादाननिमित्ताद्यवान्तरभेदानां विशिष्य चर्चापि नात्रापेक्ष्यते ।

कश्चिद्वीरं लिप्समानो वीरता, तद्विशिष्टश्चेत्युभयमपेक्षते । एवं कार्यकारणात्मकं प्रपञ्चं जिज्ञासमानः कार्यकारणता, तत्सहितश्चेति द्वयमप्यवश्यं जिज्ञासत इति स्पष्टम् । घटकुड्यकुसूलादिवत्कार्यकारणतापि प्रपञ्चेऽस्मिन् न हि नान्तर्भवति । तत्र कतिपयानां घटादीनां ज्ञानेऽपि प्रपञ्चजिज्ञासा न शाम्यति । सर्वेषामेव प्रापञ्चिकानां जिज्ञास्यत्वात् । एवं द्वित्राणां कारणतानां ज्ञानं परं नेहापेक्षितम् । किन्तु सर्वा एव कारणता इह जिज्ञास्यन्ते । सर्वेषां कारणानां सर्वेषां कार्याणां च समुदायरूपस्य प्रपञ्चस्य जिज्ञासायां सर्वासामेव कार्यकारणतानां जिज्ञासाविषयत्वमस्तीति स्पष्टमेव ।

कालदेशयोर्विषयेऽप्येवमेव द्रष्टव्यम् । सामान्येन विशेषेण वा खण्डात्मना-खण्डात्मना वौपाधिकत्वेनेतरथा वा केनापि रूपेण विषयभूताः सर्व एव काला देशाश्च प्रपञ्चेन्तर्भवन्ति । तत्त्वजिज्ञासायां विषयाश्च भवन्ति । कस्यचिद्वृक्षस्य जिज्ञासायां तदीयस्कन्धशाखादीनां यथा जिज्ञास्यादबहिर्भाव एवं प्रपञ्चजिज्ञासायां तद्घटकाः कारणतादेशकालादयोऽप्यवश्यं जिज्ञास्यन्त इति स्पष्टम् ।

तत्र जिज्ञास्यानां मध्ये एकेनापरस्य जिज्ञासा न हि शाम्यति । न हि लोके तस्करयोर्द्वयोरेकोऽपरस्य साक्षी प्रकल्प्यते । दूरस्थयोर्मातापित्रोः कुशलं जिज्ञासमानाय कस्मैचिद्वीयमाभं माता पितेव वर्तत इत्युत्तरं निष्फलमेव । यतः पितुरपि प्रकृते जिज्ञासास्ति । भूयोऽपि प्रश्नकरणे प्रष्टृप्रेरणादन्यदीदृशानामुत्तराणां फलं नास्त्येव ।

उक्तरीत्या कारणताविशिष्टेषु सर्वेष्वपि जिज्ञास्यमानेषु, उत्तरत्वेनोच्यमानं कारणताविशिष्टं चेत्तन्न जिज्ञासां शमयेत् । चोद्यान्तरेषु जिज्ञासून् प्रेरयेदित्येव । पक्षैकदेशस्य दृष्टान्तत्वकल्पनायां स्फुरदस्वारस्यमेवेहाप्यापतति । कार्यकारणसमष्टावनन्तर्भूतं किञ्चित् कारणं कार्यं वा न हि सम्भवति । प्रकृते जिज्ञासा तत्समष्टावेव न तु यत्किञ्चिद्व्यष्टिमात्र इति स्पष्टम् ।

सर्वेषां मनुष्याणां जनको मनुष्यः कस्स्यात् ? इति कस्यापि संशयो नोद्भवितुमर्हति । सर्वमनुष्याणां जनकश्चेत् तर्हि स मनुष्यो भवितुं नार्हति । अथ

मनुष्यश्चेत् तर्हि सर्वमनुष्याणां जनको भवितुं स नार्हति। एवं स्थितेऽपि वस्तुतत्त्वे कश्चिन्मन्दस्तथा पृच्छति चेत् किमत्रोत्तरं वक्तव्यम्? । तदीयसंशयस्य युक्तिशून्यतां प्रमादमूलत्वञ्च सम्यगुपन्यस्य स बोध्यते चेत्सैव शोभना रीतिः। तथा क्रियते चेन्न केवलं तस्यैकस्यैव संशयस्य निवृत्तिः, अपि तु तादृशाः संशयाः पुनः कदापि नोत्तरेरन्। अन्यथा सर्वमनुष्याणां जनकत्वेन कश्चिड्डित्थमनुष्योडवित्थमनुष्यो वा निर्दिश्यते चेत्तेन कोऽर्थस्सेत्स्यति। डित्थादीनामश्रुतपूर्वत्वेऽपि सर्वमनुष्याणां जनकं जिज्ञासमान उत्तरत्वेनोच्यमाने मनुष्यत्वमस्ति चेत्तज्जनकं पृच्छेदेव।

एवं सर्वकार्याणां सर्वकारणानाञ्च समुदायरूपस्य प्रपञ्चस्य किं स्यात्कारणम्? इत्यादि संशया अपि वस्तुतो नोत्पत्तुमर्हन्ति। कुत इति चेत् किमपि कारणं कारणसमष्टावनन्तर्भूतं भवति चेत्तर्हि तत्र कारणं भवितुमर्हति। एवं कार्यस्यापि विषये द्रष्टव्यम्। कारणतात्वं, कार्यतात्वं वा कारणता कार्यता वा यत्र यत्रास्ति तत्तत्सर्वमेकमप्यविहाय दृश्यप्रपञ्चान्तर्भूतत्वाविशेषात्प्रकृते जिज्ञास्यत एव। अन्धस्यान्ध इव संशयान्तरस्य संशयो न गतिर्भवति।

किमस्य कारणमिति पृच्छन् स्वप्रश्नस्य कारणताविशिष्टमेवावश्यमुत्तरं भवेदिति निश्चित्यैव पृच्छति। कारणताविशिष्टे जिज्ञास्यत्वाविशेषात् स्वस्य प्रश्नोऽस्ति च। एवमुत्तरस्य स्वप्रश्नविषयतां स्वयमेव जानन्तस्तादृशमेवोत्तरं नियमेनापेक्षमाणे प्रश्ने यत्र विमुखीभवन्ति महानयं कोऽपि प्रमादस्य विलासः।

एवं प्रपञ्चः कदा वोत्पन्नः? इति जिज्ञासमानः कालं स्वजिज्ञास्यात् प्रपञ्चाद्बहिर्भूतं मन्यते। वस्तुतस्तु स्वजिज्ञासाविषयेष्वन्यतम एव कालोऽपि। अत्यन्त स्थूलेषु बाह्येन्द्रियगोचरेषु घटपटादिष्वपि तत्त्वं जिज्ञासमानस्य परमसूक्ष्मे सुदुर्ग्रहतत्त्वे पण्डितैर्बहुधा विकल्पितस्वरूपे काले कैमुतिकन्यायेनातिमहत्येव जिज्ञासा भवितुमर्हति। "कालस्त्वविद्यैव" इति वेदान्तशास्त्रे महाप्रामाणिका मधुसूदनसरस्वतीचरणाः अभिप्रयन्ति। ईश्वरादतिरिक्तं कालमन्ये केचिन्नाभ्युपयन्ति। देशस्य सूक्ष्मभावमेव केचिन्महात्मानः कालमाहुः। अन्ये केचन कालिकानां पदार्थानां स्वरूपमेव कालं मन्यन्ते। एवं बहुधा विकल्पक्षमेऽस्मिन् कालनाम्नि वस्तुनि कस्य वा जिज्ञासोत्सन्देहा न स्युः, विविदिषा वा न स्यात्। एवञ्च कालसहितस्य प्रपञ्चस्य उद्भवकालप्रश्ने कालः कस्मिम् काले उत्पन्न इति प्रश्नोप्यन्तर्भवति। अत्र प्रष्टा स्वमौढ्यबोधनादन्यदुत्तरं नार्हति। कारणविषयइवात्रापि प्रष्टा स्वप्रश्नाविषयं कालमेवोत्तरत्वेन वक्तव्यं

निश्चित्य प्रश्नं करोति। उत्तरत्वेन काले निर्दिष्टमात्र एव पुनरपि प्रष्टुमुद्युङ्क्ते। एवञ्च कदेति प्रश्ने कालो वा कालभिन्नो वोत्तरत्वं नार्हति। काल उच्यते चेत्प्रश्नविषयत्वाविशेषाज्जिज्ञासां न निवर्तयति। कालभिन्नस्योत्तरत्वं प्रष्टैव निषेधति च। एवं देशविषयेऽपि द्रष्टव्यम्। कर्तुर्विषयेऽपि कर्तृत्वमात्रस्य प्रापाञ्चिकत्वाज्जिज्ञास्यत्वाविशेषाच्च कर्तृत्वविशिष्टं किमपि जिज्ञासान्न निवर्तयेत्, किन्तु चोद्यान्तरमुत्पादयेदेव।

अयमत्र सङ्ग्रहः। कार्यकारणता कालो देश इति त्रिकं वस्तुतः प्रपञ्चान्तर्भूतमपि ततो बहिर्भूतमिव जिज्ञासुभिर्गृह्यते। सोऽयं प्रमाद एव सृष्टिविषयाणां प्रश्नानां निदानम्। तस्य त्रिकस्य प्रपञ्चान्तर्भूतत्वं स्वजिज्ञास्यत्वञ्च वास्तविकमस्तीति ज्ञात ईदृशाः प्रश्नाः स्वयमेव शाम्येयुः। तथा हि—एतत्त्रिकस्य प्रपञ्चेन सह तादात्म्यमेव सम्बन्धः, न पुनः पौर्वापर्यम्, आधाराधेयता, कार्यकारणभावो वा सम्भवति। कालिका घटादयो यथा काले वर्तन्ते तथा कालघटितस्तदात्मको वा प्रपञ्चः काले वर्तितुं नार्हति, कालिकत्वाभावात्। एवं देशघटितस्तादात्मको वा देशे न तिष्ठति, आधाराधेयभावविरहात्। तथा कार्यकारणताघटितस्तादात्मको वा प्रपञ्चः कार्यकारणभावेन कार्यकारणतया सह न सम्बध्यते, पौर्वापर्याभावात्। इत्थञ्च सर्वविधस्य कार्यकारणस्य, कालदेशयोश्च प्रपञ्चान्तर्भूतत्वात् ज्ञातव्यत्वाविशेषाच्च तदीयं सर्वविधमपि ज्ञानं स्वस्य जिज्ञास्यं सर्वप्रपञ्चं विषयीकृत्य न प्रवर्तते, किन्तु तदेकदेशमेव विषयीकरोति। रूपगन्धादिविशिष्टं किञ्चित्पुष्पं सर्वांशेन गोचरयितुं नेत्रेन्द्रियं न हि शक्नोति। किन्तु तदेकदेशं रूपं परं नेत्रेण विषयीक्रियते। यद्यपि सर्वमेव प्रपञ्चं मदीयः प्रश्नो गोचरयतीति प्रष्टारो मन्यन्ते, तथापि तथा गोचरयितुं तेषां वाङ्मनसे उभे अपि न पारयतः। सर्वस्यापि प्रपञ्चस्य विषयीकरणे हि वाङ्मनसयोरपि तथात्वमपेक्ष्यते। तच्च प्रायो दुष्करम्। अथ कथञ्चित्क्रियते चेत्तत्र सर्वसन्देहनिवृत्तेस्स्वाभाविकत्वात्तदानीं कस्यापि चोद्यस्य प्रसक्तिरेव नास्ति। अत एव "विसयैकशरीरिण्या मायायाश्चोद्यरूपतः" इति विद्यारण्यस्वामिनः पञ्चदश्यां सृष्टिविषयान् प्रश्नान् मायास्वरूपं वर्णयन्ति। अत्रायमाशयः। "वस्तुतो मायासमुद्रं तितीर्षन्तोऽपि जिज्ञासवः कार्यकारणान्वेषणनौकया प्रतिष्ठन्ते चेत्तन्मध्ये तत इतो वृथा धावनमेव तेषां फलम्, न पुनस्तीरस्य प्राप्तिः" इति।

सहस्राभिलाषी कश्चिन्मन्दः शतमेव याचित्वा दातृलोकात्तावदेव लभते, न सहस्रं स्वाभिलषितं चेत्स कस्यापराधः। वस्तुतः सर्वप्रपञ्चमेव जिज्ञासमानः

प्रापञ्चिकं यत्किञ्चिदेव पृष्ट्वा तदेवावगच्छति न कृत्स्नप्रपञ्चमित्यत्र किमाश्चर्यम्। "तत्त्वज्ञाने समुचितमुपायं वयं जानीम एव कारणादिज्ञानेनास्य तत्त्वं ज्ञातुं शक्यते। तत्र किं कारणमित्याद्येव केनापि वक्तव्यम्" इति स्वाभाविकीमाहोपुरुषिकामपरित्यज्य जिज्ञासवो ज्ञातज्ञेयानुपसर्पन्तीति यत्तदेव तत्त्वविज्ञाने प्रथमं प्रतिबन्धकम्। "वयं न किमपि जानीमः, परमार्थतत्त्वं च जिज्ञासामहे, किमत्र कर्तव्यम्"। इत्यहङ्कारं परित्यज्य पृच्छयन्ते चेन्महात्मानो वेदान्तिनः सर्वमिष्टं संपादयेयुरेव। एवं सति "प्रपञ्चस्य किं कारणमित्यादिप्रश्नानामुत्तरस्य वक्तारो न सन्ति" इति प्रवादो निर्मूल एवेति शिवम्॥

---

# पूर्वाङ्गपराङ्गचिन्ता ।

(V. Venkatarama Sharma, Vidyabhushana.)

इदानीं वेदलक्षणविधायिभिः प्रातिशाख्यकारैः प्रस्तुता पूर्वाङ्गपराङ्गचिन्ता न्यक्षेण संक्षिप्य निरूप्यते—

छन्दोभाषा हि नाम वाक्यरूपा। वाक्यानि चाकाङ्क्षादिमत्पदकदम्बकघटितानि। पदान्यक्षरैरारभ्यन्ते। अक्षराणि वर्णैरुपकल्पितानि। एवञ्च घटपटादिकार्यद्रव्याणां परमाणव इव भाषाया उपादानकारणं वर्णा इति फलितम्। अवयवरहित एकत्वव्यवहारयोग्यः स्पष्टो नादो वर्ण इति तस्य लक्षणं वक्तुमुचितम्। वर्णोत्पत्तिप्रकारश्च शिक्षायां सङ्गीतशास्त्रायुर्वेदयोश्चैवं प्रतिपादितः। यथा—

"अनुप्रदानात्संसर्गात्स्थानात्करणविभ्रमात्।
जायते वर्णवैशिष्ट्यं परिमाणाच्च पञ्चमात्॥" इति।

"आत्मा बुध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्॥
मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम्।" इति च।

तत्र स्वयमुच्चारणार्हो वर्णः स्वरः, तदनर्हं व्यञ्जनमिति स्वरव्यञ्जनयोर्भेदः। स्वयमुच्चारणानर्हाणि व्यञ्जनानि स्वराणामङ्गानि भवन्ति। केवलो व्यञ्जनसंसृष्टो वा स्वर एकः अक्षरम्, इति वर्णाक्षरयोर्मिथो भेदः। अनेन चकेवलस्वरः वर्ण इति अक्षरमिति च द्वावपि व्यपदेशावर्हतीति स्फुटं भवति।

व्यवहारेष्वक्षरैरेवोपयोगो दृष्टः। अक्षराणि च साधारण्येन पदेषु केवलाः स्वराः व्यञ्जनसाहिताः स्वराः संयुक्तव्यञ्जनसाहिताः स्वराः इति त्रिविधानि दृश्यन्ते। अक्षरस्वरूपं चैवं निरूपितम्—

(१) "स्वरोऽक्षरम्"। केवलस्वरः अक्षरसंज्ञं भवति। अ इत्यादिकमुदाहरणम्।

(२) "सहाद्यैर्व्यञ्जनैः"। आद्यैर्व्यञ्जनैः सहितः स्वरः अक्षरं प्रत्येतव्यम्। यथा—मो। ओकारसहितो मकारः अक्षरं प्रत्येतव्यम्। द्रु+अन्नः < द्रुन्नः। उकारो दकाररेफसहितोऽक्षरम्।

(३) "उत्तरैश्चावसितैः"। आद्यैर्व्यञ्जनैः उत्तरैश्चावसानगतैः सहितः स्वरोऽक्षरम्। यथा—वाक्। वकार-ककारसहित आकारोऽक्षरम्। यथावा प्राङ्। पकार-रेफ-ङकारसहित आकारोऽक्षरम्। एवं तावद्यद्येकः स्वरो भवति तदधस्तनान्युपरितनानि च व्यञ्जनानि तदङ्गानि भवन्तीत्येतत् प्रतिपादितम्। इति।

एवं त्रिविधानामक्षराणां मध्ये व्यञ्जनसहितस्वरविषये संयुक्तव्यञ्जनसहितस्वरविषये च कीदृशं व्यञ्जनं कस्य स्वरस्याङ्गतामापद्यत इति संशयः प्रादुर्भवति। अत्र च विषये कश्चन निश्चय आस्थेयः। स च उदात्तादिस्वरनिर्णयार्थमुपकारको भवति। सेयमेतद्विषयिणी चिन्ता कात्यायनादिभिः प्रातिशाख्यकारैः याज्ञवल्क्यादिभिः शिक्षाकारैश्चादृता पूर्वाङ्गपराङ्गाचिन्तेत्यभिधीयते।

तत्र स्वरयोर्मध्ये द्विप्रभृतीनामङ्गत्वं निरूप्यते—

(१) "संयोगादिः पूर्वस्य"। संयोगादिभूतो वर्णः पूर्वस्य स्वरस्याङ्गं भवति। यथा—अश्श्वः। द्वौ शकारौ वकारश्च संयोगः। तत्र संयोगादिः पूर्वस्येति कृत्वा पूर्वशकारः पूर्वस्य स्वरस्याङ्गम्। उत्तरशकारवकारावुत्तरस्य स्वरस्याङ्गम्। अश्/श्वः। यथा वा—हव्व्यम्। द्वौ वकारौ यकारश्च संयोगः। तत्र संयोगादिः पूर्वस्येति कृत्वा पूर्ववकारः पूर्वस्य स्वरस्याङ्गम्। वकारयकारावुत्तरस्य। हव्/व्यम्।

(२) "यमश्च"। यमः पूर्वाङ्गं भवति चशब्दात् पूर्ववर्णसहितः। यथा—रुक्क्मम्। ककार-यम-मकाराः संयोगः। तत्र ककारयमौ पूर्वस्य, मकार उत्तरस्याङ्गम्। रुक्क्/मम्।

(३) "क्रमजं च"। क्रमाज्जातं क्रमजम्। संयोगादेः परस्य वर्णस्य द्विरुक्त्या यज्जायते तत् क्रमजमित्युच्यते। यथा—पाश्श्र्व्यम्। रेफः द्वौ शकारौ वकारो यकारश्च संयोगः। तत्र रेफः संयोगादिः, क्रमजश्च प्रथमः शकारः,

पूर्वस्य स्वरस्याङ्गम् । द्वितीयः शकारो वकारो यकारश्चोत्तराङ्गम् । पार्श्/श्व्यम् । यथावा—वर्ष्ष्याय । रेफः द्वौ षकारौ यकारश्च संयोगः । रेफः संयोगादिः पूर्वषकारः क्रमजश्च पूर्वाङ्गम् । अपरः षकारो यकारश्चोत्तराङ्गम् । वर्ष्/ष्याय ।

(४) "तस्माच्चोत्तरं" स्पर्शे । तस्मात् क्रमजाद्यदुत्तरं व्यञ्जनं तत् पूर्वाङ्गं भवति स्पर्शाक्षरे परभूते सति । यथा—पार्ष्ण्यां । रेफः द्वौ षकारौ णकारः यकारश्च संयोगः । रेफः संयोगादिः, प्रथमः षकारः क्रमजः, स्पर्शाक्षरस्य णकारस्य परभूतत्वाद् द्वितीयः षकारश्च पूर्वाङ्गं भवति । णकारयकारौ उत्तरस्याङ्गम् । पार्ष्/ण्या ।

(५) "अवसितं च" । अवसानगतं व्यञ्जनं पूर्वाङ्गं भवति । यथा—वाक् । ककारोऽवसितः । यथावा—ऊर्क् । अत्र रेफ-ककारयोः संयोगः । रेफः संयोगादिः, ककारोऽवसितः । एतौ पूर्वस्य स्वरस्याङ्गम् ।

उच्चनीचस्वरितादयः स्वराणामेव गुणाः । व्यञ्जनानां तादृशगुणप्रतिपादकस्य नियमविशेषस्य कुत्राप्यदर्शनात् । परन्तु व्यञ्जनमपि यं स्वर माश्रित्य तिष्ठति तस्य स्वरस्य गुणानुविधायि भवतीत्येतद्दर्शयितुमियं पूर्वाङ्गपराङ्गचिन्ता प्रवृत्ता इति पूर्वाङ्गपराङ्गाचिन्तायाः प्रयोजनमन्वाख्यायते कात्यायनेन—

"व्यञ्जनं स्वरेण सस्वरम्" । इति ।—

यद् व्यञ्जनं यस्य स्वरस्याङ्गं भवति तत्तेनैव समानस्वरं भवतीति तात्पर्यम् ।

"स्वर उच्चः स्वरो नीचः स्वरः स्वरित एव च ।
स्वरप्रधानं त्रैस्वर्यं व्यञ्जनं तेन सस्वरम् ॥"

# अहो ! सुप्रसन्नः कालः ।

(एस्. पद्मनाभशास्त्रिणः, न्यायव्याकरणसाहित्यपण्डिताः ।)

दृश्यमानेऽस्मिन् चराचरात्मके महति प्रपञ्चे परिवर्तमानो जनः—किमिदम् ?; कोऽहम् ?; कुत आगतोऽस्मि ? केन प्रेरितोऽस्मि ? किमनुष्ठेयम् ?; किं श्रेयः ?; इत्यादिकमजानानो मुह्यति । तदनुग्रहार्थमेवास्मदीयानि सर्वाण्यपि शास्त्राणि प्रवृत्तानि । वेदे यानि तत्त्वानि प्रतिपाद्यन्ते, तान्येव तत्त्वानि महात्मभिर्महर्षिभिर्योगबलादपरोक्षीकृतानि लोकानुग्रहार्थं शास्त्ररूपेणोपनिबद्धानि । वेदे यत् संक्षेपतः प्रतिपाद्यते तदेव युक्तितर्काद्युपबृंहितैर्वचनोपन्यासैर्विस्तरेण प्रपञ्चयत इति शास्त्राणां श्रुतिमूलकत्वात् तत्प्रामाण्येनैव प्रामाण्यम् । एवं च शास्त्राध्ययनसंपन्नानां पण्डितानामपि श्रुतिमूलकप्रामाण्यमर्थसिद्धं भवति । अतश्च लोके पण्डिताः प्रमाणपदमर्हन्ति । अस्मत्पूर्वपुरुषा महात्मानो महर्षयो यदुद्देशेनैव बहूनि शास्त्राणि रचयामासुः, गुरुकुलवासादिना महतः क्लेशाननुभूय संपन्नविज्ञानाः पण्डितास्तमुद्देशं यदा सफलयेयुः, तदा शास्त्रप्रवर्तकास्ते महर्षयस्ताननुगृह्णीयुः । अन्तर्मात्रपरिवर्तमानानि ज्ञानविज्ञानानि पेटिकान्तर्वर्तीन्यनर्घाणि रत्नानीव तदा तदा स्वात्मनैवानुभूयमानानि कस्य वा जनस्योपकुर्युः ? । अतः प्रमाणभूतैर्महात्मभिः पण्डितैः अध्यापनानुष्ठानोपदेशादिना लोकोऽवश्यं शिक्षणीयो विपत्तितो रक्षणीयश्च ।

लोको हि कर्तव्याकर्तव्येषु विवेकमलभमानः प्रवृत्तिनिवृत्त्योर्मुह्यन् स्वदुरासदमर्थं पण्डितेभ्योऽधिगन्तुमिच्छति । सुलभस्खलिता खलु संसारसरणिः । अचिन्तिताश्च विपत्तयः समापतन्ति । बहुविपद्व्याकुलायां संसारसरण्यां पर्यटन्नयं लोकः प्रमाणभूतेभ्यः पण्डितेभ्य एव सकलं ज्ञातुमिच्छति । तानेव शरणं मन्यते । तदुपदेशेनैव हिताहितं निरूपयति । कर्तव्याकर्तव्यं च विवेचयति । ऐहिकादामुष्मिकाच्चापभ्रंशादात्मनो रक्षणाय पण्डितानेवाश्रयति । विविधविपत्संकुलः पतनोन्मुखो जनः पण्डितेनैव ध्रियमाणो मन्यते । अत एव पारितोषिकधनादिवितरणेन सादरं पण्डितजनसेवनं धर्म इति महान्त उपदिशन्ति । अत एव शास्त्राध्ययनसंपत्तये बहुवित्तवितरणादिरूपैरुपायैः शास्त्राध्येतॄणां साहाय्यकं विदधाति लोकः । अत एव हि महात्मभिः प्रभुभिः प्रमाणभूताः पण्डितास्तत्र तत्र स्थापनीया यत्नेन परिपालनीयाश्चेति स्थितिः । एवं च सति पण्डितानां दृष्टमेव फलं सिद्धं भवति ।

यदि शास्त्राध्ययनमध्येतारं विना कस्यापि नोपकुर्यात्, तदा शास्त्राध्येतृणामधीतशास्त्राणां पण्डितानां वा कः साहाय्यं विदध्यात् । नहि पण्डितानामुदरपूरणजन्यं केवलमदृष्टरूपं फलमभिसन्धाय कोऽपि नियमत उपकाराय प्रवर्तेत ।

अत्रेदं चिन्तनीयम्—स्वजीवितस्य तृतीयांशादन्यूनं कालं वेदशास्त्राद्यध्ययनायोपयुज्यान्ततः अध्यापनवृत्तिमात्रेणोदरं पूरयतां का वा कृतकृत्यता ?। अध्येतारश्चाध्यापकमार्गमेवानुरुन्धानाः स्वस्थानापन्नान् कांश्चिदन्यानन्यानपि सम्पादयन्ति । किमनेन गुरुशिष्यसम्प्रदायेन लोकस्य ?। स लोकस्य कीदृशे उपकाराय कल्पेत ?। अनेनाद्यापि ऋषिपरम्परातः समासादितानि ज्ञानविज्ञानरत्नानि परं परिपाल्यन्त इत्ययं महान् लाभो लोकस्य । अत एवाऽद्यापि श्रवणविवरममृतरसप्रवाहेण परिपूरयन् महान् वेदघोष उज्जृंभते । तत्प्रभावादेव चाद्यापि ध्रियमाणानां शास्त्राणां परिशीलनेन वयमप्यात्मनो गौरवमनुभवाम इतीदं कोवाऽपलपति । परन्तु नैतावता पण्डितानां कर्तव्यजातं परिसमाप्नोति । लोकोपकारमग्रतः कृत्वाऽवश्यं शास्त्रजातपरिरक्षणमङ्गीकार्यम् इति । अन्यथा विद्यमानेऽप्यन्तःसारेऽखण्डेन नालिकेरेणेव कस्य वा तेनोपकारलाभः ? ।

इदानीं खलु लोकशिक्षार्थमेते पण्डिताः किं प्रयस्यन्तीति न जानामि । पण्डिता अपि लोकोपदेशविमुखा उदासते । लोकोऽपि उपदेशग्रहणे आभिमुख्यं नैव प्रकटयति । कृत्यशतभारस्तेषां शिरस्स्वापतितः । 'किमस्माकं शास्त्रम् ? तत्प्रतिपाद्यं किम् ?, वयं के? , किमनुष्ठेयम् ?; किमनुष्ठीयते ?; अनुष्ठितं च यथारूपं भवति वा न वा ? इति विचारस्यैवावसरो दुर्लभः संवृत्तः । आहूता अपि केचन पण्डिता महति कार्यान्तरे व्यापृतमात्मानं प्रकटयन्ति । अन्ये बहवः पण्डिताः शुकवत् कांश्चिच्छब्दानुच्चारयन्ति । अनुस्वानयन्त्राणीव परिचितमात्राणि कानिचिदक्षराणि श्रावयन्ति । स्वयमेव तत्तात्पर्यं नैव सम्यगवगच्छन्ति । सूक्ष्मेक्षिकया नैव विचारयन्ति । परान् बोधयितुमपि नैव यतन्ते अथवा तान् प्रति न किञ्चिद्वक्तुमुत्सहे । परन्तु कृतभूरिपरिश्रमा लब्धात्मनो ये प्रगल्भन्ते ते पण्डिताः ।

पाण्डित्यं नाम अधीतशास्त्राणामात्मनो बहुतरपरिश्रमेण दृढीकृतं शास्त्रार्थसंस्कारमवलम्ब्य चिन्त्यमानेषु कार्यकारणरूपेणावस्थितेषु प्रपञ्चव्यवहारविषयेषु पदार्थेषु जायमानो यो विवेकस्तद्रूपम् । इदञ्च न केवलं गुरुशिष्यसम्प्रदायेन सुलभम् । कृताध्ययनैः पण्डितैः पुनः पुनः शास्त्रार्थं परिशीलयद्भिर्विचारपरम्परामधिरूढैः

शास्त्रविज्ञानसम्पत्तिर्वृद्धिं नेतव्या। सब्रह्मचारिभिः सह पदे पदे परिशीलनीयश्च शास्त्रार्थविचारः। एवं लक्ष्यात्मकेषु तत्तत्प्रपञ्चव्यवहारविषयेषु पदे पदे शास्त्रार्थान्वयस्यानुभवेन दृढीकृतसंस्कारा सुनिर्मला व्युत्पत्तिः प्रसीदति। व्युत्पत्त्यपरनामकश्चेदं शास्त्रविज्ञानं बहुभिरभियुक्तैः पण्डितवरेण्यैरधिष्ठिते सदसि वादप्रतिवादरूपं चर्चापदमधिरोप्य सुपरीक्षितं सम्प्रतिपन्नं सत् अप्रामाण्यज्ञानाद्विनिर्मुक्तं भवति।

ईदृशेनैव शास्त्रविज्ञानेन पण्डितानामात्मलाभो भवति। अनेनैव खलु पण्डिता उपदेशाय प्रगल्भन्ते। नह्यप्रामाण्यज्ञानकलङ्कितं शास्त्रविज्ञानमनुष्ठानोपयोगि भवति तथाचोक्तम्—

"आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्।

बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः॥" इति।

महोन्नतमहामहिमशालिनाऽस्मन्महाराजेन अनल्पमपि व्ययमगणयता परमोदारेण मनसानुगृहीतेनैव पथा सञ्चरमाणानां पण्डितानां सुलभोऽयमात्मलाभः। एवं च लब्धात्मानः प्रगल्भाः प्रमाणभूताः पण्डिता अपि निःशङ्कं निद्राणा इव साधारणजनशिक्षणाय न किमपि प्रयस्यन्तीति नितरां चित्तं दुनोति। यदा महान्तः पण्डिता लोकानुग्रहार्थं प्रवृत्तानां शास्त्राणां साफल्यं विचिन्तयन्त औदासीन्यं नैवावलम्बन्ते; सर्वाणि शास्त्राण्यालोच्य सारभूतं तत्त्वं संगृह्य जनानां हिताहितमुपादिशन्ति। कर्तव्याकर्तव्येषु विवेकमुत्पादयन्ति; एवं "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः" इत्यादि वचनमनुस्मरन्तः स्वानुष्ठानवैभवेनापि जनाननुगृह्णन्ति; सत्यं प्रकाशयन्ति; शास्त्रोक्तमेवोपदिशन्ति; शास्त्रसिद्धान्तं स्थापयन्ति; तादात्विकं हितमनुचिन्त्य शास्त्राविरोधेन तदनुरूपं प्रवर्तयन्ति; प्रवर्तन्ते च; तदा ते दृढतरं लोकं प्रतिष्ठापयन्ति। शास्त्रप्रवर्तकानां महर्षीणां महतोऽनुग्रहस्य पात्राणि च भवन्ति। लोके च पूज्यतमा भवन्ति। प्रथमं प्रमाणपदं चार्हन्ति। स्वानुरूपां वृत्तिश्च लोकतो लभन्ते।

अतः प्रमाणभूताः पण्डिताः शास्त्रसिद्धान्तं प्रकटयन्तो जनानां हिताहितं बोधयन्तः कर्तव्याकर्तव्यं विवेचयन्तस्ततः स्वानुकूल्यं प्राप्नुवन्तः परस्परोपकार्योपकारकभावं भजन्त ऐहिकामुष्मिकश्रेयःसाधनानि संपादयन्तो दृढतरं लोकं प्रतिष्ठापयेयुः। अवश्यं रक्षेयुश्च गुरुशिष्यसम्प्रदायानुरोधेन समस्तमपि शास्त्रजातम्।

अहो ! महदिदं भाग्यविलसितं पण्डितानाम् ; अथवा सर्वस्यापि लोकस्य । यदस्मन्महाराजेन महोन्नतमहामहिमशालिना परमदयालुना परमोदारेण विदितवेदितव्येन लोकहितैषिणा, मात्रा महामहिमश्रीयुतया महावैदुष्यशालिन्या सेतुपार्वतीराज्ञ्या, संस्कृतपक्षपातिना महामतिना महामात्येन चास्मदीयेषु शास्त्रेषु दृढतरविश्वासेन पण्डितेषु परमादरेण च संस्कृतभाषापरिपोषणभूषितायां शास्त्ररक्षणदीक्षायामङ्गीकृतः कङ्कणबन्धः । अहो ! सुरक्षितानि शास्त्राणि । सनाथाः पण्डिताः; सुप्रतिष्ठितं जगत् ।

अहो ! सुप्रसन्नः कालः । कथमीदृशे सौराज्ये कालो दुष्यतु ? । राजानो हि कालनियन्तारः । अत एवोक्तं भागवते—

"राज्ञो वा कारणं कालो राजा वा कालकारणम् ।
इति ते संशयो मा भूद्राजा कालस्य कारणम् ॥" इति ।

सर्वथास्मन्महाराजो लोकयोगक्षेमैकनिरन्तरतत्परः सुखमरोगदृढगात्रश्चिरायुर्विजयतामिति निरन्तरमनन्तशयनं प्रार्थयामहे ।

शुभम् ।

# ॥ प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधसमर्थनम् ॥

( महोपाध्यायः के. महादेवशास्त्री. न्यायाध्यापकः । )

नैयायिकास्तु 'चैत्रो ग्रामं गच्छति' इत्यादौ प्रथमान्तार्थमुख्यविशेष्यकबोधं मन्यन्ते । तथाहि—'ग्राम'मित्यत्र द्वितीयार्थः संयोगो भेदश्च । संयोगे प्रकृत्यर्थस्य ग्रामस्याधेयतयाऽन्वयः । तादृशसंयोगस्य च स्वसामानाधिकरण्यस्वजनकक्रियावच्छिन्नप्रतियोगिताकत्वोभयसम्बन्धेन भेदेऽन्वयः । तादृशभेदस्य च स्वप्रतियोगितावच्छेदकत्वसम्बन्धेन 'गम्लृ' धात्वर्थव्यापारेऽन्वयः । तादृशव्यापारस्य चेश्वरकृतिसाधारणयत्नत्वजात्यवच्छिन्नस्याख्यातार्थतापक्षेऽसाधारणानुकूलतासंबन्धेन आख्यातार्थे तादृशधर्मावच्छिन्नेऽन्वयः । तेन नास्मदीयक्रियानुकूलकृतिमादाय 'ईश्वरः पचती'ति प्रयोगः । आख्यातार्थवर्तमानकालस्य च स्ववृत्तिप्रागभावाप्रतियोगित्व स्ववृत्तिध्वंसाप्रतियोगिप्रकृतक्रियाकर्तृवृत्तित्वोभयसमानाधिकरणाधेयतासंबन्धेन आख्यातार्थकृतावन्वयः । एकपदोपस्थापितयोरपि कृतिवर्तमानकालयोः परस्परमन्वयः, एवकारोपस्थितयोरन्ययोगव्यवच्छेदयोरिव व्युत्पत्तिवैचित्र्यान्नानुपपन्नः । तादृशकृतेश्चाश्रयतासंबन्धेन प्रथमान्तचैत्रपदोपस्थाप्यशरीरविशेषावच्छिन्नात्मन्यन्वयः । चैत्रपदोत्तरश्रूयमाणसुपः एकत्वमर्थः । तस्य चोद्देश्यतावच्छेदकव्याप्तिविशिष्टपर्याप्तिसम्बन्धेन प्रकृत्यर्थचैत्रादौ प्रकारतयान्वयः । तथा च "आधेयतासम्बन्धावच्छिन्नग्रामनिष्ठप्रकारतानिरूपित विशेष्यत्वाभिन्नसंयोगनिष्ठस्वसामानाधिकरण्य स्वजनकक्रियावच्छिन्नप्रतियोगिताकत्वोभयसम्बन्धावच्छिन्नप्रकारता निरूपितविशेष्यत्वाभिन्नभेदनिष्ठ स्वप्रतियोगितावच्छेदकत्वसबन्धावच्छिन्नप्रकारतानिरूपितविशेष्यत्वाभिन्न व्यापारनिष्ठानुकूलत्वसम्बन्धावच्छिन्नप्रकारता निरूपित विशेष्यत्वाभिन्ना या तादृशाधेयतासंबन्धावच्छिन्नवर्तमानकालनिष्ठप्रकारतानिरूपितविशष्यत्वाभिन्ना सती या आश्रयतासम्बन्धावच्छिन्नकृतिनिष्ठा प्रकारता, तादृशप्रकारतानिरूपिता या प्रकृत्यर्थतावच्छेदकव्याप्यत्वविशिष्टपर्याप्ति सबन्धावच्छिन्ना सुबर्थैकत्वनिष्ठप्रकारतानिरूपितचैत्रनिष्ठमुख्यवि-

शेष्यता, तच्छाली ग्रामनिष्ठसंयोगावीशिष्टभेदाविशिष्टव्यापारानुकूलवर्तमानकाल-विशिष्टकृत्याश्रय एकत्ववांश्चैत्र"इति शाब्दबोधः ॥

अत्राहुर्धात्वर्थप्राधान्यवदिनो वैयाकरणाः—

(१) 'भावप्रधानमाख्यातम्' इति यास्कनिरुक्तेन आख्यातान्तपदानामर्थेषु भावस्य क्रियाया एवप्राधान्यं विधीयते। 'धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते' इतिवचनात् धात्वर्थस्यैव भावपदार्थत्वेन क्रियामुख्यविशेष्यकबोधस्यास्मदभिमतस्यैव यास्कनिरुक्तसम्मतत्वात्। प्रथमान्तार्थस्य प्राधान्ये निरुक्तविरोधो दुष्परिहर इति।

(२) एवं "ब्राह्मो विवाह आहूय यत्कन्या दीयते स्वयम्।"

इति स्मृतिवाक्यस्यायोग्यत्वापत्तिः। प्रथमान्तमुख्यविशेष्यकबोधाङ्गीकारे स्वकर्तृकप्रदानकर्मीभूतकन्यायामेव ब्राह्मविवाहाभेदप्रतीत्या विवाहाभेदस्य कन्यायां बाधितत्वात्। क्रियामुख्यविशेष्यकबोधोपगमे तु स्वाभिन्नकर्तृककन्याऽभिन्नकर्मकधात्वर्थभूतप्रदाने ब्राह्मविवाहाभेदप्रतीत्या तस्याबाधितत्वेन न काऽप्यनुपपत्तिः।

(३) एवं प्रथमान्तार्थप्राधान्ये 'जातौ न सत्ता' इति वाक्यमयोग्यं स्यात्। तादृशवाक्याद्धि जातिनिरूपिताधेयतासामान्याभावः सत्तायां बोधयितुं न शक्यते। जातिनिरूपित स्वसमवायिसमवेतत्वसम्बन्धावच्छिन्नाधेयतायाः सत्तायां सत्वात्। नापि जातिनिरूपितसमवायसम्बन्धावच्छिन्नाधेयत्वाभावबोधः सत्तायां संभवतीति वक्तुं युक्तम्। जातिनिरूपितसमवायसम्बन्धावच्छिन्नाधेयताया एवाप्रसिद्धत्वात्। अतः "सत्ताभावो जातिवृत्तिः" इति नञर्थमुख्यविशेष्यकबोध एवागत्याङ्गीकरणीय इति गतं प्रथमान्तार्थमुख्यविशेष्यकबोधेन नैयायिकोत्प्रेक्षितेन।

(४) एवं 'कः स्तूयत' इति प्रश्ने, 'हरेरेव स्तोत्र'मित्यस्योत्तरत्वं नस्यात्। प्रश्नवाक्यजन्यशाब्दबोधसमानविशेष्यकबोधजनकस्यैवोत्तरवाक्यत्वेन न्यायनये प्रश्नवाक्यजन्यबोधे प्रथमान्तार्थस्य विशेष्यतया, उत्तरवाक्यजन्यबोधस्य च स्तोत्रविशेष्यकत्वेन समानविशेष्यकत्वाभावात्। क्रियाप्रा-

धान्ये तु प्रश्नोत्तरवाक्यजन्यबोधयोः स्तोत्रविशेष्यकत्वेन समानविशेष्यकत्वान्नानुपपत्तिः ।

(५) एवं प्रथमान्तार्थस्य प्राधान्ये "पश्य, मृगो धावति" इत्यादौ शाब्दबोधानुपपत्तिः । न तावत्तत्र धावनानुकूलकृतिविशिष्टमृगस्य कर्मतासम्बन्धेन 'दृश्' धात्वर्थेऽन्वयः संभवदुक्तिकः, नामार्थधात्वर्थयोः साक्षात् भेदसम्बन्धेन अन्वयबोधस्याव्युत्पन्नत्वात् । अन्यथा तण्डुलादेरपि कर्मतासम्बन्धेन धात्वर्थपाकादावन्वयसंभवेन द्वितीयादेः कर्मत्वादौ शक्त्यसिद्धिप्रसङ्गात् । अपि च धावनानुकूलकृतिविशिष्टमृगस्यान्वयोऽपि न सम्भवति, इतरविशेषणविशेषणतया आख्यातार्थभानस्याव्युत्पन्नत्वेन दर्शनविशेषण मृगविशेषणतयाऽऽख्यातार्थभानासम्भवात् । अत एवावयवग्रन्थे प्रतिज्ञालक्षणे प्रकृतानुमित्यनतिरिक्तविषयकत्वदलप्रयोजनकथनावसरे पृथिवी इतरेभ्यो भिद्यते इत्यत्र यदितरेभ्यो भिद्यते तन्न पृथिवीति व्यतिरेक्युदाहरणेऽतिव्याप्तिवारकतयाऽनतिरिक्तविषयकत्वदलं सार्थयतां मिश्राणां मतखण्डनपरस्य यत्त्वित्यादिदीधितिग्रन्थस्य व्याख्यानावसर यदितरेभ्यो भिद्यते पृथिवी नेति तात्पर्यभ्रमाधीनं यदितराभिन्नपृथिव्यन्यादिति यदर्थविशेष्यकं बोधमाशंक्य पाकानुकूलकृतिविशिष्टचैत्रप्रतियोगिकसादृश्यबोधतात्पर्येण 'पचति चैत्र इवायम्' इत्यप्रयोगेण इतरविशेषणविशेषणतयाऽऽख्यातार्थभानमव्युत्पन्नमिति न्यायशास्त्रधुरन्धराणां गदाधरभट्टाचार्याणामुक्तिरपि संगच्छते ॥

(क्रमशः)

# कैरलीप्रणामः ।

(C. K. Narayana Kurup M. A.)

श्रियश्चलाया मनसोऽनुकूलो
विलासरङ्गस्त्वमिति स्वपुण्याः ।
क्षीराम्बुधिस्त्वां शिशिरार्द्रवातै-
र्मातः! सदा वीजयते निकामम् ॥ ॥ १ ॥

श्रीशङ्करं शैशवबद्धयोग-
मवेत्य कन्याव्रतचारिणी सा ।
निषेवते त्वत्सुखपक्षपातात्
कुमारिका दक्षिणपादपार्श्वम् ॥ ॥ २ ॥

राजर्षयस्ते कुलशेखराम्बु-
राशेरुदीर्णाः सुमनोऽभिरामान् ।
न्यवेदयन् नाटककाव्यबन्धा-
नन्यादृशान् संस्कृतपादपीठे ॥ ॥ ३ ॥

श्रीमन्महाभागवताब्धिजातै-
श्छन्दोमयैरेकसहस्रपद्मैः ।
'नारायणीय'स्रजमारचय्य
समर्पयन् यः पवनेश्वराय ॥ ॥ ४ ॥

शब्दागमप्रक्रियया च दिव्य-
काव्यप्रबन्धैः स च भट्टपादः ।
अन्यूनमभ्यर्चयदम्ब! युष्मत्-
पदं चिरं संस्कृतया सरण्या ॥ ॥ ५ ॥

(युग्मकम्)

मीमांसकानां मकुटावतंसः
प्रभाकरश्चाम्ब,! भवत्तनूजः।
अचुम्बितार्थाशयसम्पदाढ्य-
मदर्शयत् शास्त्रपथं नवीनम् ॥ ॥६॥

'दृग्ज्यौतिषं' केरलभूविभाग-
संस्थानुरूपं निरमायि येन।
असौ मनीषी परमेश्वराख्य-
स्त्वदीयपुण्याङ्कुर एव नूनम् ॥ ॥७॥

वेणुप्रणालीमधुरस्वरेण
जहार यो हृन्दि चराचराणाम्।
कर्णामृतेनास्य मनोऽपि जह्रे
लीलाशुकस्ते कलकूजितेन ॥८॥

श्रीवासुदेवो,यमकप्रपञ्च-
कलिन्दजाभङ्गपरंपरासु।
अयत्नविन्यस्तपदः स्वपुत्रो
नृत्यत्यहो! नर्तयते च विश्वम् ॥९॥

अन्यैश्च तत्तादृशपूर्णपुण्यैः
कुमारकैरम्ब! भवच्चरित्रम्।
सौवर्णरेखाङ्कितमेव; भूया-
दनुत्तमं भावि च भागधेयम् ॥ ॥१०॥

नमोऽस्तु ते कैरलि! सच्चरित्रे;
नमोऽस्तु वञ्चीश्वरवंशपूज्ये!।
नमोऽस्तु कल्याणिनि पुण्यगर्भे!
नमोऽस्तु धर्मप्रसु शर्मदात्रि ॥ ॥११॥

शुभम्।

# न्यायामृतं जीवनम् ।

(न्यायमीमांसामहोपाध्यायः, वि. रामशर्मा ।)

नहि कोऽप्यस्ति लोके यो न्यायामृतमास्वादयितुं नाभिवाञ्छति । नीयते प्राप्यते विवक्षितार्थसिद्धिरनेनेति व्युत्पत्त्या विवक्षितार्थसाधनाय प्रयुक्तं यद् वाक्यजातं स न्यायः । अमृतकल्पश्चायं न्यायः कियदभिव्याप्नोति, कथञ्च समुल्लसति विविधेषु लौकिकालौकिकव्यापारेष्विति किञ्चिदिव समवलोकयामः ।

भिन्नरुचिर्हि लोकः । विवक्षिताश्चार्था विविधा एव दरीदृश्यन्ते । तेषां सर्वेषामप्यर्थानां साधनाय प्रयोजको भवत्ययं न्यायः । यद्यदभिलषितमस्माकं तत्तदखिलमेव विवक्षितञ्च । प्राप्स्यामश्च तत् सर्वं विविधैरुपायैः । अभिलाषश्च सामान्येन द्वेधा विभज्यते नश्वरलौकिकविषयाभिलाषः, शाश्वतिकसुखाभिलाषश्चेति । अनयोरुभयोरपीप्सितयोः समुपलब्ध्यै दत्तहस्तावलम्बो भवत्यसौ न्याय इति महदिदं तोषस्थानं नः ।

आपण्डितपामरं सर्वे मानवा विश्वतो विसृमरं न्यायकुसुमसौगन्ध्यं घ्रायं घ्रायं पायं पायंश्च न्यायसुमसाधितार्थमकरन्दं नितरां मोदन्ते । ये नाम किल न्यायप्लवेनैव संसारसागरं तितीर्षन्ति, ये च पुनस्तेनैव निनीषन्ति लोकयात्रां, सर्वे ते समधिगच्छन्ति स्वस्वाभिलषितमर्थजातमित्यत्र नास्ति सन्देहकणिकापि । नियमस्थाने ये ये व्यवहारास्तत्रापि न्यायोऽयं महतीमार्हन्तीमर्हति । शासनहेतूदाहरणसाक्ष्यैर्न्यायाङ्गैरुपबृंहितो हि व्यवहारो न खलु पराजयते कदापि । एतानेव न्यायावयवान् सम्यग् विशदय्य प्रयुञ्जानः कश्चनाभिभाषकमहोदयोऽपि प्रतिपक्षच्छलादिकं समावेद्य स्वपक्षस्य न्याय्यतां यदि स्थिरीकरोति नूनं स वाग्मी नियमस्थानव्योम्न्यभिभाषकोडुपतिपदवीमारुह्य राराज्यत इति नाविदितमेव महोन्नतानां सहृदयानाम् । प्राड्विवाकपदे नियमसमितौ च प्रशोभमाना महोदया अपि न्यायशाणोल्लेहनचातुर्येण व्यवह्रियमाणविषयरत्नस्य याथार्थ्यप्रदीप्तिं सम्यगवलोक्य संप्रकाश्य च साधुविधिवादप्रस्तावेनार्हत्तममभ्युदयमुपगच्छन्त्युपागच्छन्नुपगामिष्यन्ति च ।

ज्योतिस्तन्त्रमापादचूडं न्यायामृतमहोदधौ सन्निमज्यैव विद्योतत इति नातिपरोक्षं समेषां सूक्ष्मेक्षिकया पश्यतां विदुषाम् । सामान्यमुखीं व्याप्तिमुपजीव्यैव हि

सूर्याचन्द्रमसोर्ग्रहाणाञ्च सञ्चारं समभिजानते दैवज्ञास्तत्फलमपि निर्ब्रुवते तत्र तत्र। उपमाकाव्यलिङ्गानुमानाद्यलङ्काराश्च न्यायप्रसूनसौगन्ध्यवासिता एव काव्यामृतरसाभिष्यन्देन तर्पयन्ति लोकान् ।

एवं शब्दशास्त्रे, वैद्यके, अध्वरमीमांसायां, ब्रह्ममीमांसायां, किं बहुना वादप्रतिवादविषये सर्वत्र युक्तिप्रत्युक्त्यावापोद्वापादिभिर्न्यायामृतझरिकाऽभिष्यन्दत इत्यहो महती प्रसृतिरस्य न्यायामृतस्य । इदन्त्वपरं परममामोदस्थानं नो यच्छलकुतर्कवितण्डावादमायाचूर्णप्रसरणेन व्याकुलदृष्टयः सूरयोऽपि न्यायविज्ञाननेत्रौषधानुलेपनेन सूक्ष्मेक्षिकाः सन्तो न्यायमार्ताण्डप्रचण्डकिरणैः प्रतिपक्षखद्योतान् म्लापयितुं प्रगल्भन्त इति । प्रतिवादिरसनानालिकाभ्यो निःसृताभिर्मर्मस्पृग्भिर्वाग्गयोगुडिकाभिराविद्धा न्यायैकशरणा आस्तिकाग्रेसरा न्यायतनुत्राणमेवासाद्य न्यायदम्भोलिप्रहारैर्विवादसमराङ्गणे कुतर्ककापटिकान् नास्तिकप्रतिपक्षिण उरोविदारं विदारयन्ति। जेजीयन्ते च सर्वत्र विवादसमरभूमौ । देदीप्यतां न्यायरत्नदीप्तिरियमेवं लौकिकविषयेषु ।

शाश्वतिकसुखलाभाय कथंकारमुपकुरुतेऽयं न्यायकल्पतरुरिति समनन्तरमेवोत्पश्यामः । निरपायसंश्रयो हि मोक्षः । तल्लब्धये खल्वैहिकसुखमसारं मन्वाना ज्ञानिनः सर्वदा यतन्ते । निःश्रेयसं हि नान्तरा तत्त्वज्ञानं नितरां सुलभम् । तथा च वैशेषिकसूत्रं न्यायसूत्रञ्च (१) "धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसाभ्युपगमः" (२) "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः" ।

तत्त्वं नाम समानासमानजातीयव्यवच्छिन्नं विविक्तानारोपितं रूपम् । तस्य ज्ञानं साक्षात्कारः । तस्मान्निःश्रेयसस्य लाभ इति हि सूत्रयोरनयोरर्थः । अमुमेवाशयं स्थिरीकुर्वन्ति श्रुतयोऽप्येताः—"य इत् तद् विदुस्तेऽमृतत्वमानशुः" (ऋग्वेदः) "तमेव विदित्वाऽतिमृत्युमेति, नान्यः पन्था विद्यतेऽयनाय" (यजुर्वेदः) "तमेव विद्वान् न बिभाय मृत्योः" (अथर्ववेदः) "यस्मिन् द्यौः पृथिवीचान्तरिक्षमोतं मनः सह प्राणैः सर्वैः । तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ । अमृतस्यैष सेतुः"। (माण्डूक्योपनिषत्) "ब्रह्मविदाप्नोति परम्" (तैत्तिरीयोपनिषत्)

आत्मसाक्षात्कार एव निःश्रेयसापरपर्यायस्य मोक्षस्य परमं साधनमित्येतावता सुप्रपञ्चितम् । आत्मसाक्षात्कारश्चात्मतत्त्वज्ञानमुपजीव्य वरीवर्त्ति । तच्च तत्त्व-

ज्ञानं मननशास्त्रायत्तमिति मन्त्रब्राह्मणोपनिषद्भिः सुस्फुटं प्रत्यपादि तत्र तत्र। "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इत्याप्तोपनिषद्वाक्यं हृदि निधाय मोक्षलाभार्थं यतमानाः सर्वे श्रुत्यादिभिः समुपलब्धमर्थं मननशास्त्रेणानुमानादिप्रमाणद्वारा सुष्ठु विविच्य परीक्षन्ते। मोक्षसाधनीभूतमात्मतत्त्वज्ञानं नान्तरा जीवात्मपरमात्मतत्त्वज्ञानं सेत्स्यति। जीवात्मपरमात्मविवेचनञ्च न झटित्येव पदार्थानां साधर्म्यवैधर्म्याभ्यां समुपलभ्यते। उपलब्धं वा नातिदृढं न मोक्षाय कल्पते। अन्तरा च कुटिलवादिवृन्दा महाजटिलैस्तर्कजालैः श्रुतीनां शास्त्राणाञ्च श्रवणात् समुपलब्धे आत्मतत्त्वविवेके बहुमुखान् संशयानाविष्कुर्वन्ति। बहुविधशङ्काकालुष्यमपोह्यात्मतत्त्वनिर्द्धारणाय तर्कतत्त्वविद एव प्रभवन्ति। साधकबाधकयुक्तिभ्यां यदवधारणं सैवान्वीक्षा, तया प्रवर्तमानां विद्यामेवान्वीक्षिकीमाचक्षते तर्ककोविदाः। अमूमेवान्वीक्षिकीं मननमिति च सङ्गिरन्ते वेदान्तविशारदाः। एवञ्च निखिलमेव मननशास्त्रं तर्कविद्यामेवोपजीव्य लालसीतीत्यहो महान् परिमळोऽनितरसाधारणो न्यायकुसुममञ्जर्याः।

आन्वीक्षिकी न्यायशास्त्रञ्चेति नाम्ना परं भिद्यमानस्य तन्त्रस्यास्यादर्शग्रन्थौ द्वावेव वैशेषिकदर्शनं न्यायदर्शनञ्चेति। तत्र कश्यपस्य गोत्रापत्येन उलूकापरनाम्ना कणादेन महर्षिणा प्राणायि वैशेषिकदर्शनम्। गौतममुनिप्रणीतञ्च न्यायदर्शनम्। उपनिषदर्थप्रकाशनाय हि प्रवृत्तानि दर्शनानि नाम। तेषाञ्च द्वयी रीतिर्दरीदृश्यते प्रतिपादनविषये, बहिर्मुखी अन्तर्मुखी चेति। तत्र बाह्यपदार्थप्रतिपादनद्वारा आत्मतत्त्वप्रकाशनाय प्रवृत्तं न्यायं वैशेषिकञ्च दर्शनं बहिर्मुखीं रीतिमवलम्बते। आत्मवस्तुतत्त्वमात्रप्रतिपादनपराणीतराणि दर्शनानि। तत्रापि वेदविहितयागादिकर्मप्रतिपादनायारब्धं मीमांसादर्शनम्। वैशेषिकन्याय, सांख्ययोग, पूर्वोत्तरमीमांसात्मकेषु षट्स्वपि दर्शनेषु वैशेषिकदर्शनस्यैव प्राचीनत्वं निर्धार्यते चारित्रगवेषकैः। क्रिस्ताब्दात् पूर्वं द्वितीये तृतीये वा हायनशतके प्रादुरभवदेतद् वैशेषिकदर्शनमिति केचिदभिप्रयन्ति। द्वित्रिकेषु दर्शनेषु न्यायं वैशेषिकञ्चेति द्वयमेव पदार्थतत्त्वविवेचनाय प्रवृत्तं जगदुत्पत्तिक्रमादिप्रपञ्चनेनारम्भवादस्यादर्शभूतमास्ते। किं बहुना—

"प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां तर्कविद्या प्रकीर्तिता।"

"न्यायचर्चेयमीशस्य मननव्यपदेशभाक्।
उपासनैव क्रियते श्रवणानन्तरागता॥"

एवमादिकं सूक्तिरत्नमान्वीक्षिक्या विश्वतो विसृमरत्वं सुष्ठु समावेदयत्येव ।

मननञ्चानुमानम् । तच्च द्विविधं स्वार्थं परार्थञ्चेति । तत्र परार्थानुमानं न्यायैकोपजीवि । स च न्यायः समस्तरूपोपपन्नलिङ्गप्रतिपादकवाक्यजातम् । वाक्यसमुदायात्मकस्य तस्य न्यायस्य पञ्चावयवा विद्यन्ते—प्रतिज्ञा हेतुरुदाहरणम् उपनयो निगमनञ्चेति । एतेषु चावयवेषु "पक्षः साध्यवान्" इत्याकारेणाविष्क्रियमाणा प्रतिज्ञाऽऽगमप्रमाणसादृश्यमावहति । "हेतुमत्त्वाद्" इत्येवं बोध्यमानो हेतुरनुमानेन तुलामर्हति ।

"यो यो हेतुमान् स स साध्यवान् यथाय"मितिरीत्या निर्दिश्यमानमुदाहरणञ्चोपमानेनौपम्यमुपयाति । "तथाचाय"मिति प्रदर्श्यमान उपनयस्तु प्रत्यक्षेण समतामेति । "तस्मात्तथे"त्येवं समाह्रियमाणं निगमनन्तु सर्वेषां प्रमाणानामेकार्थसमवाये सामर्थ्यं प्रदर्शयतीत्यपरोऽयं महिमा न्यायामृतस्य ।

यथाचास्मदादीनां शरीरं पञ्चभूतात्मकं, तद्वत् न्यायशरीरमपि पञ्चभूतोपमृद्धसाम्यमादधातीत्ययमभ्यूहोऽपि जजागर्ति । तत्र तावत् प्रतिज्ञा सर्वाधारभूता भूमिः । "अप एव ससर्जादा" वित्यनेन विधातुः प्रथमसृष्टिः सर्वकारणं सलिलं हेतुः । हविषां देवेभ्य उदाहर्तृत्वाद् दर्शकत्वाच्च तेजोरूपोऽग्निरुदाहरणम् । सर्वत्र प्रचारक उपनेता च कुसुमपरागादीनां वायुरुपनयः । विभुनि व्योम्नि सर्वेषां समन्वयाद् आकाशं निगमनमिति चोक्तिर्युक्त्यविरुद्धा प्रकृतोपयोगिनी च सती समुज्जृम्भते । अत एवावयवत्रिकमुत्सृज्य पञ्चकमेव स्वीकृतं भगवता न्यायदर्शनकारेण गौतममहर्षिणा ।

एतेन चावयवत्रिकवादिनां पाश्चात्यानामभ्यूहात् वरीयानेव वरीवर्ति पौरस्त्यानां तर्कशास्त्रपारावारपारीणानां गवेषणमार्ग इत्यहो चारितार्थ्यं नः । किं बहुना चर्वितचर्वणेन । "द्वे ब्रह्मणी वेदितव्ये परञ्चापरमेव च"त्युपनिषद्वचनमुररीकृत्य योऽस्माभिरुपास्यो विष्णुः सच्चिदानन्दघनः श्रीमन्नारायणः, यश्चास्माकीनो जीव उपासकस्तयोः परापरब्रह्मणोस्तत्त्वज्ञापनाय प्रवृत्तयाक्षोभ्यया चान्वीक्षिकीनाम्न्या न्यायविद्यानौकया बहुविधवादवैखर्युद्घुष्टेन रागादियादोभिरापूरितेन भवाब्धिवर्त्मना सञ्चरमाणाः सर्वे वयं निरपायं संश्रयमेत्य नित्यपरमानन्दमुपभुञ्ज्महे इति सर्वमवदातम् ॥

# पत्रिकाप्रशस्तिः ।

( पण्डितशङ्करसुब्रह्मण्यशास्त्री । )

मन्दारो नमतां भवन्नवति यः क्ष्मामब्जनाभप्रभोः
मन्दारद्रुममालिकामदहराः खेलन्ति यस्मिन् दृशः ।
तन्नक्षत्रसुमं मनोज्ञसुषमं मूर्ध्नावहन्त्यादरात्
कं न प्रीणयति प्रसन्नवचना चित्राकृतिः पत्रिका ॥

येन स्वा समदर्शिता जगति सा सन्दर्शिता कर्मणा
तस्य क्ष्मारमणस्य संस्कृतमहाविद्यालयादुद्गताम् ।
प्रत्युद्गम्य सभक्ति सूक्तिमणिभिश्चित्रे ! न कः पत्रिका-
राज्ञीं त्वां मतिमान्सपर्यतितमां प्राज्ञीधुरां बिभ्रतीम् ॥

अध्यक्षानुगुणा मताः सुमनसां वैदुष्यमुख्या गुणाः
प्रध्यां प्रेयसि यत्र जाग्रतितमां, गोपालविद्वन्मणेः ।
तस्योत्साहफलायिता मधुमुचां वाचामगारायिता
सैषा खेलतु संस्कृतज्ञहृदयोद्यानेऽत्र चित्राशुकी ॥

वैदुष्यस्य खनिर्महाकविरतिस्निग्धो नृपामात्ययोः
प्रख्यातः परमेश्वरोऽर्चयति यां वाक्स्रग्भिरत्यादरात् ।
पी यच् डी पदभासुरः स मतिमान्गोदोऽपि यल्लेखक-
स्तामेतां नवपत्रिकां सहृदयः को नाम न श्लाघताम् ॥

सत्काव्यामृतसंभृतात्सरसतावासायिताभिज्ञहृ-
न्मुक्तास्फोटसमुद्गकात्समुदितैर्मुक्ताफलैर्वाङ्मयैः ।

चित्रे ! सम्यगलङ्कृता विबुधवाङ्मित्रेण संरक्षिता
चित्रेन्द्रेण दयावता जय जगत्यस्मिन्समाः शाश्वतीः ॥

सरलतरपदघटितसरसकविकर्मा-
कलितगुणरसिकजनहृदयपरितोषा ।
जयतु चिरमिह जगति विबुधहितचित्रा-
भवधरणिधवमकुटमणिदृगवितैषा ॥

# कालिदासस्य नाटकत्रयम् ॥

(M. MADHAVAN UNNI, VYAKARANA SIROMANI CLASS III)

अयि भोः! साहित्यामन्दानन्दामृतपायिनः सुकृतिनः! सुविदितमेतत्तत्रभवतां समेषामपि विदुषाम्, यत् कविकुलसार्वभौमेन संस्कृतसाहित्यनभोदेशनिशीथिनीनाथेन कालिदासेन विरचितं नाटकत्रयं साहित्यलोके वरीवर्तीति। 9848

एतच्च भरतशास्त्रलक्षणलक्षितत्वेनासाधारण्यास्तस्यास्तस्या रुचिरकल्पनाया गाम्भीर्येणात्मतत्त्वानां प्रपञ्चरहस्यानाञ्च प्रतिपादनेनाखण्डानन्दानुभूतिं सर्वेषामपि सहृदयानामुत्पादयतीति निश्चप्रचम्। अस्मिंश्च लालित्यं, प्रसादः, शान्तगम्भीरा वैदर्भी रीतिरित्येतेऽन्ये च बहवो गुणाः प्रतिवाक्यं प्रतिपदं च प्रकाशन्ते। वाक्यानि साधारण्येनानर्घरत्नानीवाकारतो लघूनि। तेषां पुनरर्थगाम्भीर्यस्य ध्वनेश्च मधुरस्य नास्तीयत्ता। कविरयं सरलानि मधुराणि च पदानि तेषु तेषु समुचितेषु स्थानेषु निवेशयति शाणघर्षणोद्रेचितप्रभापूराणि वैडूर्याणीव कटकादिषु सुवर्णकारः। स्थाने निवेशितानि पदानीषदपि विनिमयं नार्हन्ति। उज्ज्वला प्रसन्ना चास्य कविप्रकाण्डस्य रीतिः। किं बहुना—

"सुललितपदविन्यासा रुचिरालङ्कारशालिनी मधुरा।
मृदुलापि गहनभावा" महाकवेरस्य सूक्तिः।

अथ च शृङ्गग्राहिकया, प्राधान्यात्प्रथमं तावत् शाकुन्तलमालोकयामः। इदं च महाकवेः कृतिषु प्राथम्यमर्हतीत्युक्तं पूर्वैरपि—"कविता कालिदासस्य तत्र शाकुन्तलं मत"मिति। श्राव्यदृश्यभेदेन द्वेधावस्थितेषु काव्येषु दृश्यभेदेऽन्तर्भवतीदं नाटकम्। तल्लक्षणं च।

"वीरशृङ्गारयोरेकः प्रधानं यत्र वर्ण्यते।
प्रख्यातनायकोपेतं नाटकं तदुदाहृतम्"॥ इति।

अस्मिंश्च राज्ञः कण्वाश्रमप्रवेशः, ततश्च शकुन्तलाया दर्शनमित्येते प्रथमेऽङ्के, विप्रलम्भवर्णनं राज्ञा विदूषकस्य राजधानीप्रेषणं च द्वितीये, शकुन्तलायाः

पुनर्दर्शनं तृतीये, चतुर्थे च दुर्वाससः शापः, कण्वेन शकुन्तलाया राजसमीपे यापनम्, पञ्चमे शकुन्तलायाः कण्वशिष्याणां च राजसन्निधौ प्रवेशः, राज्ञा तस्याः प्रत्याख्यानमित्यादीनि, राज्ञः पश्चात्तापः, इन्द्रादेशहारिणो मातलेः प्रवेश इत्येते षष्ठे, सप्तमे च शकुन्तलायाः स्वपुत्रस्य च प्राप्तिरित्येते च वर्ण्यन्ते ॥

राजा शकुन्तलायै स्वनामाङ्कितमङ्गुलीयकमयच्छत्, वल्लभैकतानायाः शकुन्तलायाः "स्वमनादृतवती" इति दुर्वाससः शापः, शक्रावतारे अङ्गुलीयकस्य च्युतिः इत्यादिरितिवृत्तांशो नायकगुणोत्कर्षार्थं कविना स्वप्रतिभाकल्पितः। अप्रतिमञ्चेदं कल्पनागाम्भीर्यं कस्य वा हृदयमानन्दसम्पूर्णं न कुर्यात्।

नाटकस्यास्येतिवृत्तांशे सुरहस्यान्याध्यात्मिकतत्त्वान्यन्तर्भवन्तीतीदं महदाश्चर्यम्। तथा हि—राजा सांसारिकः पुरुषः, शकुन्तला चात्मविद्या, सूतः प्राणः, मननं रथः, वाहका अश्वाश्चेन्द्रियाणि, संसाराभिलाषो मृगश्च। अनसूया प्रियंवदेत्येते शमदमादयः, मृगया हिंसा। सांसारिकाः पुरुषा आश्रमप्रवेशेनात्मविद्याधिकारिणो भवन्तीति द्योतयति राज्ञः शकुन्तलाप्राप्तिः। ततश्च पुरुषः संसारपरवशः स्वकृत्यानि विस्मरतीति तत्त्वं प्रकाशयति राज्ञः शकुन्तलाविस्मृतिः। ततश्च दिव्यक्षेत्रसंसर्गात् आत्मविद्यालाभेनाखण्डानन्दमनुभवतीति समनन्तराद्राज्ञश्चरिताज्ज्ञाप्यते। आत्मविद्यायां प्रवर्तमानस्य हिंसा नोचितेति प्रतिपादयति मृगयानिवृत्तिः। अनसूयत्वं वाङ्माधुर्यं चात्मविद्यानुसारिणीति बोधयति अनसूयाप्रियंवदयोः संकीर्तनम्। एतादृशान्यनेकानि तत्त्वानि अध्यात्मशास्त्रानुसारेण चर्चायां जाग्रत्यां प्रकाशन्त इति महदिदमाश्चर्यस्थानम्। लौकिकान्यप्यनेकानि तत्त्वानि शाकुन्तलाल्लभ्यन्ते। विधेः क्वापि न प्रतिबन्ध इति प्रकटयति 'अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्रे'ति राज्ञो वचनम्। स्वामुपोढयौवनां दुहितरं यथाकालं नोचिताय वराय ददौ मुनिः, अतस्तया यथेष्टं कश्चित् स्वीकृतः, इतीदं ज्ञापयति कञ्चित्सारमर्थम्, एतादृशी उपेक्षा नोचिता पितॄणां, यया महाननर्थः सम्पद्येतेति। अमङ्गलाश्चैतादृशाः प्रवृत्तय इत्युपदिशति महाकविः दुष्यन्तप्रत्याख्यातायाः नायिकायाश्चरितेन। सुविदितमेव सर्वेषां अद्यत्वे युवचापल्येन स्वाच्छन्द्येन विचरमाणा दुःसहमवस्थान्तरं कालान्तरे प्राप्नुवन्तीति। असाद्विपरीत्येन प्रतिभाति कुमारसंभवे पार्वतीचारितम्; पार्वती तपसा परमेशं प्रत्यक्षीकृत्यापि पित्राज्ञयैव विवाहिता, यतोऽस्वतन्त्राहमित्यबोधि सा देवी ततश्च दम्पत्योः पूर्ण एवानन्दोऽजायत। अतश्चावबुध्यते विवाहस्य माहात्म्यम्। दुर्वाससः शापादिना

तपसो माहात्म्यम् नैसर्गिकानुरागस्य फलसाधनत्वेत्यादयो बहवः प्रतिपाद्यन्तेऽस्मिन् ।

रजस्तमोबहुलं नायिकानायकयोरनुरागसुवर्णं पश्चात्तापवह्निप्रक्षेपेण परिशुद्धमनुभवयोग्यं च करोति कविः । एवंविधकरणं च सात्त्विकानुरागस्य वैशिष्ट्यं प्रकटीकर्तुमेव । राजत्वं नागरिकजीवितं आडंबरप्रतापादीनि च लौकिकानां परमभिनन्दनीयानि, नतु वास्तवद्रष्टॄणामितीममाशयं प्रकटयति, 'अभ्यक्तमिव स्नातः' इत्यादिना । "महाभागः कामं..........हुतवहपरीतं गृहमिव" इति शार्ङ्गरवोक्तिर्वनवासस्य महनीयतां नगरजीवितस्यायोग्यतां च प्रतिपादयति । प्रकटयतीदं पद्यं तपसोऽभिलषणीयतां लौकिकसुखस्य परित्याज्यतां च, यत्—"प्राणानामनिलेन वृत्तिरुचिता" इत्यादि । साधारणदृष्ट्या शृङ्गारनाटकेनानेन शुद्धं सारञ्च जीवितादर्शं स्फुटतरमुपपादयति महाकविः ।

( क्रमशः )

# भारताम्बिका ।

(K. Kesavan Poti Sahitya Siromoni Final.)

*शुभ्रवर्णतुषारनिर्मितमुत्तरत्नसमुच्चयं
हा ! किरीटमवर्ण्यरश्मि धृता नितान्तमनोहरम् ।
मस्तकोपरि; मन्दवायुविलोलमुद्वहती परं
मेघमेदुरचूर्णकुन्तलमम्बुजेन सुगन्धितम् ॥

नैकचित्रितशुद्धवृक्षलतावितानविराजिता
हैमनिर्झरमन्दहासमनोरमा मधुरानना ।
लोललोलुपभृङ्गसङ्कुलमालतीवनमालिका
सस्यनीलनिचोलकावृतविन्ध्यपीनपयोधरा ॥

तुङ्गभङ्गुरभङ्गनिर्मलगङ्गया नवहारिणी
दन्तुराचलया सुसूक्ष्मवलित्रयोदरशालिनी ।
रेवया पुरुपुण्यया मृदुमेखलागुणभारिणी
ताम्रपर्णिकया विनिर्मितरत्ननूपुरधारिणी ॥

हा ! दयाकुलमानसा परपादनिष्ठुरताडना-
द्वेदनावशगा विसंष्ठुलवेपमानहृदन्तरा ।
पुत्रदर्शनमात्रसौख्यविनीयमानसुजीविता
चिन्तया शयिताम्बिकेह विनिश्चला भुवि तिष्ठते ॥

पार्श्वभागमलङ्कृता मृदुगानलोलहृदा सदा
फेनसुस्मितशोभिताखिलविष्टपा विनयानताः ।
वीचयः परिचारिकाः सुखसेवनार्थमिहागता-
वीजयन्ति विलोलशीकरचामरेण निराकुलाः ॥

---

*मल्लिकाभिधमिदं वृत्तं कैरल्यां "ഓമനക്കുട്ടൻ" इति प्रथितम् ॥

पश्चिमास्वपरिष्कृतासु दिशासु वानरवच्चिरं
तत्र जीवति मानवे गहने वने विजने पुरा ।
तावकः पुरुपुण्यरूपसुता नितान्तमलोकयन्
वेदनिर्मलसिन्धुपारमनन्तलोकगतिप्रदम् ॥

सूक्तिरत्नसहस्रानिर्मितया विराजिततया तया
काठकादिसमाख्यया परया मनोहरमालया ।
नायिकाविधयान्तरा स्थितया तदा त्वरया च हा!
गीतया तव हृत्तटं परमुत्तराङ्कितमद्भुतम् ॥

त्याग एवनितान्तसुन्दरजीवितं सुमनायितं
हिंसया रहितः क्रमः पुरुपुण्यसाश्वितदधिकम् ।
शोणितारुणवाहिनीष्विह वारुणीषु दिगङ्गना-
स्वित्थमम्बिकयोच्यते स्वसमीपवर्त्तिजनान् प्रति ॥

त्यागिभिर्मुनिपुङ्गवैरिहसादरं परिपोषिता
त्यागिभिस्सचिवोत्तमैस्सहराजभिस्सुखसेविता ।
त्यागिभिस्सुतसञ्चयैः परमादरं परिलालिता
त्यागलोकसुचक्रवर्त्तिनि, राजसे परिपावना ॥

॥ शम् ॥

# खण्डकाव्यानि ।

N. Raghava Paniker, Sahitya Siromony Final.

निसर्गसुन्दराणां प्रकृतिविलासानामैश्वर्यसम्पन्नानां तत्तद्विशेषाणां च सन्दर्शनेन सञ्जायमानालौकिकानन्दसन्दानितान्तरंगविनिर्गलदनर्गलवाग्विलासानामुपनिबन्धनेन, नश्वरानश्वरपदार्थविचारपारावारावगाहनसाश्रितसूक्तिरत्नसंचयसंग्रथनेन च कामपि कमनीयतामावहतां, वाल्मीकिव्यासकालिदासप्रभृतिभिस्सहृदयशिरोमणिभिर्विभिन्नप्रस्थानावलम्बिभिरारचितानां ग्रन्थतल्लजानामन्तरालपातीनि खण्डकाव्यानि परमधिकसंख्यतया द्रष्टुमिदानीं वयं पारयामः । तदिदं प्रस्थानमधिकृत्य किञ्चिदिव विचारयामस्तावत् ।

क्रौञ्चद्वन्द्ववियोगावलोकनसमुत्थितस्य वासनारूपतयावस्थितस्य शोकस्थायिभावस्य श्लोकात्मतया परिणतस्य विवृतिस्वरूपमद्यापि—

"यावत्स्थास्यन्ति गिरयः सरितश्च महीतले ।
तावद्रामायणकथा लोकेषु प्रचरिष्यति ॥" इति जगत्स्रष्टुरनुग्रहवशादिव सर्वादरणीयतामधिगतं वाल्मीकिरामायणं, धर्मोपदेशविश्रान्तानां संभवबहुलानां वीरपुरुषचरित्राणामुपनिबन्धनस्वरूपं पञ्चमवेदत्वेन परिगणितं भारतं च नवनवोन्मेषशालिप्रतिभासम्पन्नानां महाकवीनां कालिदासप्रभृतीनामप्यादर्शभूतमिति खलु सुविदितं विमर्शकानां विपश्चिताम् । एवमितिहासपुराणादिप्रसिद्धं वस्तु यथेच्छमङ्गीकृत्य औचित्यानौचित्यविचारेण, नीरक्षीरन्यायेन, स्वस्वमनोधर्मसङ्कलनेन परिष्कृत्य च सहृदयसमक्षमर्पितानामेव काव्यानां अत्र प्राचुर्यं यद्यपि दृश्यते तथापि "नहि सर्वः सर्वं जानाति" इति न्यायमवलम्ब्य किञ्चिदिव क्षम्यतां नाम; अथवा वैचित्र्यदर्शनेन भूयस्तत्तत्संस्कारपल्लवनेन वा तुष्यन्तु । इतोऽप्यधिकतरं तदेव शोचनीयं, यदालङ्कारिकाणां, प्रतिपाद्यवस्तुनो मुहुर्मुहुरामर्शनेन वासनया रसानुकूलमनर्गलं प्रसृताया वाक्स्रोतस्विन्या मार्गानुशासनविधायित्वम् । नगरार्णवादीनां वर्णनमन्तरा तन्न महाकाव्यं भवितुमर्हतीति चिन्तयेत्र महाकवीनां तन्मार्गानुयायित्वं दरीदृश्यत इति न विवादास्पदम् । पश्यत, सर्वतन्त्रस्वतन्त्रोऽपि भारविः स्वकीये

किरातार्जुनीये, अर्जुनतपःप्रभावदर्शनसमुद्दीपितासूयस्य देवेन्द्रस्य निदेशेन नियमान्तरायकरणाय सत्वरं संयमिनो निकटमायान्तीभिःस्वर्वेश्याभिर्मध्येमार्गं सलिलक्रीडां कारयति । एवं सर्वेष्वपि महाकाव्येषु सूक्ष्मेक्षिकया निरूपयताम् इदं नागोचरमौचित्यविलोपप्रसञ्जितं लक्षणदलोपवर्णनम् । अत एव, मन्ये, महाकाव्यत्वपरिगणनार्हं रामायणमतीव रसनीयं; यन्नाम नियमवलयीकरणात्पूर्वमुत्पन्नं कवेरुच्छृङ्खलवाग्विलासलालसितम् । इत्थं परीक्ष्यमाणे च खण्डकृतीनां सर्वातिशायित्वं पर्यवस्येदित्यवैमि । यतो हि कविभिः स्वकीयवासनानुरूपं परिकल्पितस्य प्रतिपाद्यवस्तुनश्चमत्कारमलौकिकं जनयतां रसालङ्कारादीनां सन्निवेशने नातिविस्तृता नियमपरिधिरेव समाश्रयणीया दृश्यते ।

महाकविकुलतिलकायमानस्य कालिदासस्य मेघसन्देशकाव्याविर्भावनन्तरं संस्कृतसाहित्यस्यानितरसाधारणं किमपि परिवर्तनं समापन्नम् । तच्च पृथङ्निरूपणार्हैरनेकरूपैः सन्देशकाव्यैः, घटकर्परप्रभृतिभिर्लघुकाव्यैः, अमरुकशतकादिभिश्शतकैर्विलापादिकाव्यैश्चेति सुविशदम् । एवं सर्वत्र लब्धप्रचारेण काव्यमार्गेण स्वच्छन्दं सञ्चरतां कवीनामाशयाविष्करणेषु स्वातन्त्र्यं सर्वतोमुखम् दृश्यत इत्येतावानेव हेतुस्तेषां सहृदयसम्माननायाः प्रतीयते ।

नायिकाविरहेण कातरतां गतैर्नायकैश्चेतनाचेतनवस्तुविचारमन्तरा यं कमपि नायिकासकाशं प्रेषयद्भिर्मार्गोपदेशपुरःसरं सन्देशः क्रियते । स कदाचिन्नायकः कविरेव स्यात् । अतीव प्राधान्यमश्नुवतां पूर्वानुभूतानां संभवानां, वियोगकालिकानां शोचनीयानामवस्थाभेदानां च विप्रलंभश्रृंगाररसानुकूलतया मन्दाक्रान्ताच्छन्दसा उपनिबन्धनमेव सन्देशकाव्यानां स्वभावः । मेघसन्देशशुकसन्देशपवनदूतहंसदूतादिकं सुप्रसिद्धमेवेति न पृथङ्निरूपणमिष्यते । घटकर्परकाव्यशृङ्गारतिलकादीनि तु शृङ्गारादिषु यं कञ्चिद्रसं प्राधान्येनाश्रित्य प्रवृत्तानि । कानिचि"दर्थकृते शिवेतरक्षतये" च केवलं विक्रमार्कादिराजस्तुतिपराणि दृश्यन्ते । इतोऽप्यधिकतरश्रद्धास्पदमलोकसामान्यप्रयोगे चातुरीधुरीणतानिदर्शनं संगीतैकरसायनं गीतगोविन्दादिकम् । साक्षात्परब्रह्मध्यानार्द्रचित्तस्य सांसारिकोपभोगपरितृप्तस्य दासीकृतवाग्देवताकस्य कस्यचित्काव्यकर्तुर्गानभीश्वरस्तुतिपरं कस्य वा न हृदयमुत्तरलीकरोति ? अन्या च सरणिस्तावत्तत्त्वप्रबोधनपरा शतकरूपेण प्रवृत्ता । अस्माकं समन्ततः प्रवर्तमानानां संभवानां सुसूक्ष्मां गतिं सम्यक्परीक्ष्येव करणीयमुपदिशतीदं काव्यमिति सिद्धमेव

प्राधान्यमेतेषाम् । अन्यथापि बहूनि शतकानि द्रष्टुं शक्यानि । भर्तृहरिविरचिता सुभाषितत्रिशती सातावाहनस्य गाथासप्तशती गोवर्धनस्यार्यासप्तश, मयूरशतकं चेत्येतान्यत्र प्राधान्यमश्नुवते । विलापकाव्यानि परं प्रविरलानि लक्ष्यन्ते । परस्परानिरपेक्षाणां भिन्नकालोत्पन्नानां पद्यानामपि खण्डकृतिषु नातिहीनं स्थानमेव दरीदृश्यते ।

एतेषां लघुकाव्यानां कवितारीतिस्तावत्सुकुमारा अनपेक्षितपण्डितपामरभेदा समेषामपि हृदयमानन्दसान्द्रं करोति । द्रुतिदीप्तिविकासकारिणो माधुर्यौजःप्रसादाख्या गुणा रसोत्कर्षाधायका महाकाव्येष्विवात्रापि सुलभतया द्रष्टुं शक्याः । अत्रैकमुदाहरणं प्रदर्श्यते—

"मारोन्मादी मदकलगिरामत्रभृङ्गाङ्गनानां
श्रावं श्रावं श्रवणहृदयग्राहिगीतामृतानि ।
वृत्ताभोगस्तबकवहनव्यानतानां लतानां
मूले मूले मुकुलितधृतिर्मूर्छनामभ्युपैमि ॥"

विरहकातरस्य कस्यचिन्नायकस्यावस्थावर्णनपरोऽयं श्लोकः कं नाम सहृदयं नाश्रुपूर्णेक्षणं कुर्यात् ? एवमविरलप्रयोगचातुरीमुदाहर्तुं न मामनुमनुते लघुरयमुपन्यास इति सहृदयैः स्वयमूह्यताम् ।

अविमृष्टविधेयांशादयो दोषा अपि एतादृशेषु काव्येषु तत्र तत्र दृश्यन्ते, अथापि, अनौचित्यप्रवर्तितानां वर्णनानां विरलतया सन्तोष्टव्यम् ।

खण्डकाव्यप्रस्थानपरिपोषणतत्पराः कवयो विद्वांसः सर्वतोमुखमयतिषतेति तादृशकाव्यस्य बाहुल्येन प्रचारेण चानुमातुं शक्यते ।

औत्तराहाणां परं महाकाव्यकर्तृत्वं समर्थयितुं व्ययीकृतायुषः पण्डिताः खण्डकाव्यविषयेऽपि तथासमर्थनाय प्रवर्तन्ते । तथापि सुसूक्ष्मम् अवलोकयतामसौ न क्षोदक्षमो यतो दाक्षिणात्यानां नैसर्गिकप्रतिभाशालिनां कर्तृत्वमद्य गवेषकैः स्फुटं निश्चीयते । तत्रापि केरलीयानां कवीनामेवाधिकतरा श्लाघा । बाणभट्टकुलशेखरोद्दण्डशङ्करनारायणभट्टप्रभृतयो बहवः केरलीयाः कवयः प्रथन्ते । एतेषां खण्डकाव्यानि कानिचिदिदानीं न लभ्यन्ते । लब्धाश्च केचन तालपत्रग्रन्था मुद्रणालयकारागारानयनाय सुदृढसूत्रावबद्धा वेश्मकोणेषु विक्षिप्ता वर्तन्ते । तदिदं संस्कृतसाहित्यप्रणयिनामतीव शोकस्थानम् ।

हास्यरसप्रधानानां श्लोकानां विरचने समर्था दाक्षिणात्या विशिष्य केरलीया लक्ष्यन्ते । अथापि यतिभंगनिरर्थकशब्दप्रयोगादयो दोषास्तेषां साधारणा इति पण्डितवरेण्येन केनचिदुक्तं सम्यक् सहृदयैः परिचिन्त्यतां नाम । अस्तामिदम् । इदानीं केरलेषु अन्यत्र चाङ्गलभाषामनुकृत्य मिस्टिक्आत्मगीतजीवत्साहित्यादयः प्रस्थानभेदा अङ्कुरिताः, प्रयतन्ते च तत्परिपोषणाय पण्डिताः । एताः सर्वा अपि रीतयः संस्कृतसाहितीमण्डनायिते खण्डकाव्यप्रस्थान एवान्तर्भवन्ति । यत्तु गूढ-प्रयोगचातुर्येण विवक्षितमर्थमस्फुटत्वेनान्यथा प्रतिपादयितुमभिलषन्ति, तन्न शोभनं मन्ये । जगत्तत्त्वबोधनेन जीवतः साहित्यं कर्तुं यद्यभिनिवेशस्तत्किमिति भुजंगप्रयातं परिशीलयन्ति ? एतावानेव कविभिर्मार्गोऽवलंबनीयो यावता क्लेशमन्तरा सुख-वेद्यं भवति काव्यं साधारणानामपि जनानाम् । अतः किञ्चिदिव प्रगृहीत-निबन्धरश्मयस्सन्तो लोकोत्तर—खण्डकाव्य संग्रथनेनानुगृह्यतां कैरलीमाता च भगवती गैर्वाणी ।

---

महोन्नतमहामहिम श्री सचिवोत्तम

# सर्. सि. पि. रामस्वाम्यार्य षष्टिपूर्त्तिपञ्चदशी

---

मार्ताण्डाह्वयवञ्चिभूवलरिपोरासीदमात्यः पुरा
रामो नाम समस्तसत्तमगुणग्रामाभिरामाकृतिः ।
रामस्वाम्यभिधो महान् विजयते तस्यावतारो नव-
श्श्रीचित्रोदयबालरामनृपतेर्मन्त्री सुमन्त्रोपमः ॥ १ ॥

आवासः पौरुषाणा, मपि दिवसकरस्साधुहृत्सारसाना-
मालम्बः किं कलाना, मुत नियमगभीरांबुधेः कुम्भयोनिः ।
आविर्भावो महिम्ना, मथ फलविभवो वञ्चिपुण्योत्कराणा-
मारामो वा गुणानां, खलदमनलसत्पाटवो बाडवोऽयम् ? ॥ २ ॥

बाल्येऽप्यद्भुतमात,ताति धिषणापोषात्समेषां भवान् ;
तारुण्येऽप्यभिभाषकाग्रिमपदं प्राप्तोऽच्छकीर्त्योच्छ्रितः ।
आरूढो विजयश्रियस्तदनु च न्यक्षेण निश्रेणिकां
कस्यैवं कलधौतशैलसदृशश्श्लोकोऽस्ति लोकोत्तरः ? ॥ ३ ॥

धीरोदात्तगुणोत्तरोऽयमिति यश्शिष्टैरभिष्टूयते;
तिष्ठन्ते भरतक्ष्माहरिहयास्सन्दिह्य यस्मिन् समे; ।
आशाभित्तिसुधीभवन्ति सुधियो यस्य प्रशस्यप्रथा-
वृत्तान्ता न तथाविधा भुवि कथं त्वत्काश्चमत्कारिणः ? ॥ ४ ॥

सोमापीडमहानटोत्कटजटाजूटोल्लुठज्जाह्नवी-
रङ्गत्वङ्गदभङ्गभङ्गविसरस्पर्द्धानुबद्धाशया ।
प्रौढोदारगभीरचारुमधुरा संसत्सु संदृयात्रतां
बाभाति श्रवणेन्द्रियामृतझरी भावत्कवाग्वैखरी ॥ ५ ॥

चेतोऽधःस्थितनिस्सहायकृपणत्राणैकतानं सदा
वाणी निर्जितपारिजातकुसुमच्छ्योतन्मरन्दद्रवा; ।
व्यापारश्च समस्तसाधुजनताहर्षप्रकर्षप्रद-
स्सामग्र्यं न परत्र सद्गुणततेरीदृग्दरीदृश्यते ॥ ६ ॥

क्ष्माभृत्स्थूलशिलेव सर्वनृवृषाहङ्कारभङ्गावहा,
वाह्यानन्तबलेन, वञ्चिधरणीसाचिव्यधौरन्धरी, ।
सौहित्योन्मदसाधुभृङ्गसततप्रोद्गीतमाध्वीरसा
मालेवाद्य महानुभाव! भवतः स्कन्धे समिन्धेतराम् ॥ ७ ॥

यत्नोऽकारि पुरा गिरीशमुकुटाद्भूम्यापगां भारतं
नेतुं भूरि भगीरथेन विधिवत् सन्तर्पितुं स्वान् पितॄन् ; ।
विद्युत्काञ्चनवाहिनीं कृतमतिस्सद्यस्कसन्तर्पणे
वञ्चिक्ष्मावलयं सुखेन नयसि; त्वत्तोऽपि वित्तो नु सः ? ॥ ८ ॥

स्यानन्दूरपुरेऽधुना विरचितो विज्ञानदीपायितः
श्रेष्ठस्सर्वकलालयोऽत्र भवतस्सूक्ष्मेक्षिकां ख्यापयन् ।
भावत्कप्रचुरापदानविजयश्रीलास्यरङ्गोपमो
वञ्चिक्ष्मातलनित्यभावुकयशोलाभाय बोभूयते. ॥ ९ ॥

भक्त्युद्रेकवशीकृतेन विभुना रामेण दत्ता परै-
र्दुष्प्रापा "सचिवोत्तमा" ख्यबिरुदग्रैवेयकालंकृतिः ।
हेलातीर्णविघातसागर! भवत्कण्ठे लसत्यद्भुता
जानक्या पवमाननन्दनगळे बद्धेव मुक्तावली. ॥ १० ॥

सन्त्वेताश्शतशस्समग्रविभवाश्चर्यास्तवार्यादृता-
श्श्रीमन्! सम्प्रति वर्णबाह्यभजनप्रत्यूहविध्वंसिनी ।
देवागारमुखाग्रसंवृतकवाटोद्घाटनव्यापृति-
स्सर्वासामुपरि प्रकृष्टमहिमा भूजीव! जेजीयते. ॥ ११ ॥

न स्वप्नेऽपि निरूपितं नरवरैः पूर्वै,र्न वाऽऽलोचितं
धन्यम्मन्यतमैस्तदुत्तममहामात्रैर्दयार्द्रैरपि; ।
एतन्मात्रतया सनातनमतप्रत्यक्षसंस्थापनं
श्रीवञ्चीश्वरदक्षहस्त ! भवता वर्वर्ति निर्वर्तितम् ॥ १२ ॥

स्तोत्रैस्सूक्तिकृतां समं जयजयोद्घोषैस्समेषां सता-
माशीर्भिर्म्महतामनुग्रहवचःपूरैर्निजस्वामिनः ।
वञ्चिक्षोणितले विनिर्मितनवस्वाराज्य ! राराज्यते
भावत्कस्सकलानुमोदविषयष्षष्ट्यब्दपूर्त्युत्सवः ॥ १३ ॥

आशैलादासमुद्रादखिलजनपदे तावकीनावदात-
ख्यातिप्रत्यग्रगङ्गापयसि सुकृततःप्राप्तदुग्धाभिषेके, ।
अस्यां षष्ट्यब्दपूर्त्तौ भरतधराणिभूरात्मदेशाभिमानी
कस्कः कौतस्कुतो न श्रुतिमतिमधुरांस्त्वद्गुणानुद्गृणाति ? ॥ १४ ॥

यद्यद्वस्तु चकास्ति, विश्ववरदे हस्ते कृपार्द्रे, धृतं
भक्तन्यासतया, समस्तमपि तत्तुभ्यं प्रदातुं द्रुतम् ।
पाथोराशिसुतापयोधरतटीपाटीरपङ्काङ्कितं
वञ्चिस्वामिनमब्जनाभमनिशं वन्देऽरविन्देक्षणम् ॥ १५ ॥

**Mahakavi Ullur.**

॥ श्री ॥

# श्रीमतां एन्. गोपालपिल्ल एं. ए. महाशयानां अनन्तशयनस्थराजकीयसंस्कृतविद्यामन्दिराध्यक्ष-पदप्राप्तिमनुस्मृत्यानुमोदनम्.

---

व्युत्पन्नशुद्धबुद्धिः सहृदयाग्रेसरः एं. ए. बिरुदधारी श्रीमान् एन्. गोपालपिल्लमहाशयः सुतरां मे यथा परिचितस्तथा समेषामपि विदितः। वैदुष्यपुष्यत्सुभाषितविभूषितः विदुषां लोकस्य तोषमावहन्नयं महाशयः केरलसंस्कृतभाषानभोमण्डलं मण्डयतां पण्डितप्रकाण्डनक्षत्राणां मध्ये समुज्ज्वलमृक्षं चकास्ति।

त्रिवाङ्कूरराष्ट्रेऽस्मिन् राजकीयमहीरुहस्य प्रधानावयवभूतेयं विद्याभ्यासशाखा बह्वीभिरुपशाखाभिः प्रतानिनी अध्यापकाध्येतृरूपाणां शुकशकुनिकुलानां निरन्तरं निषेवणयोग्या एधते। तत्र संस्कृतशाखायां बहुतिथात् कालादारभ्यैव महनीयं गौरवभूयिष्ठं चाचार्यकं समधिगम्य श्लाघ्योपदेशगर्भैः सारतराभिर्वाचोयुक्तिभिरापादचूडं रूषितैः उपन्यासैः शिष्यगणहृदयान्यावर्जयन्, सहकृत्वनो भ्रातृनिर्विशेषं भावयन्, अदभ्र-शुभ्रेण साहितीविज्ञानेन नैपुण्येन च सहृदयप्रीतिमुपजनयन्, अनवद्येन हृद्येन विद्याव्यासङ्गेन उपर्युपरि विद्योतमानं वैशारद्यमुपेयिवांश्चायं मान्यः समेषामपि परितोषभाजनमास्त।

संस्कृतभाषाया विशृङ्खलप्रसरं सर्वतोमुखमुच्छ्रायमभिलषन्नयं तदर्थमश्रान्तपरिश्रमं करोतीत्यत्र, पुराणप्रथितायामस्यामनन्तशयननगर्यां

पण्डितपरिषदः प्रस्थापने, राजकीयाङ्गलकलामन्दिरे संस्कृतऑणेर्स् (Honours) विभागकल्पने, संस्कृतरूपकाभिनये, अखिलभारतवर्षीयप्राच्यविद्याविपश्चित्सम्मेलने, संस्कृतविद्यार्थिनां प्रोत्साहने चैतदीयं पुरस्करणं साक्षात् साक्ष्यमावहति ।

अस्य च मान्यस्य, इदानीं महति गैर्वाणीविद्यापीठेऽत्रत्यराजकीयसंस्कृतविद्यामन्दिरे अध्यक्षपदरूपौद्योगिकाभ्युदयलब्धौ, तस्मिन्नेव मन्दिरे आप्रथमभागादामहोपाध्यायभागं भूतचरेषु छात्रेष्वध्यापकेषु चान्यतमोऽहम् —तस्य प्रत्येकाभिमानबहुमानभाजनमहम्—संस्कृतोपजीवी कश्चिदहम्—प्रमोदप्रकर्षप्रफुल्लचित्तप्रसूनः संवृत्तोऽस्मि ।

अयं च मान्यः, राष्ट्रेऽस्मिन् नचिरादेव संघटिते विश्वविद्यालये संस्कृतशाखां प्रतिनिधीकरोति । यथा च गैर्वाणी वाणी उत्तरोत्तरं सुपरिवृद्धा भवेत्, यथा च यथावसरं न्याय्यमुत्कर्षमलभमानाः संस्कृतोपजीविनः शास्त्रज्ञा उत्तरोत्तरमुत्कर्षमवाप्नुयुः, यथा च राष्ट्रेऽस्मिन् गैर्वाण्यभिमानिनोऽतीवोपचिता भवेयुः, तथा तथा नवोद्योगलाभादस्य यशस्यं वृत्तं सस्पृहमुदीक्षमाणः तस्य दिष्टवृद्धिमनु बहुकं प्रसश्चक्षाणश्च सबहुमानं विरमामि ॥

अनन्तशयनम्.
१५-३-१११५.

वे. वेङ्कटरामशर्मा विद्याभूषणः,
कार्यदर्शी,
श्रीचित्रोदयपण्डितपरिषत् ।

## दिवं गतानां श्री-कृष्णन्तम्पिमहाशयानाम्

# किञ्चिदनुकीर्तनम् ।

(Pandit, N. P. Paniker.)

कथं हा सह्येयं भवदुपरतिर्दुर्विधिकृता
 कथं वा सोढव्यस्तव च विरहो दुष्परिहरः ।
तदास्तां; त्वत्स्थानं कृतिवर, यथारञ्जितमतः—
 परं कः संस्कर्तुं प्रभवति; भवानेव हि भवान्! ॥ १ ॥

न तावत्, चित्रीये महित! तव पाण्डित्यविभवे
 परं तु प्रोत्तुंगे तव हृदयसौभाग्यनिचये ।
लभन्ते विद्वत्तां प्रचिततरयत्नेन मनुजा-
 स्तथापीदृङ्नाप्यं किमपि हृदयं केनचिदपि ॥ २ ॥

न दूये मर्त्यानामपरिहरणीयेऽथ मरणे
 यतस्तद्धर्माणो जनिमुपलभन्ते जगति ते ।
विषादस्थानं मे ह! ह! ह! नचिराद्दुर्विधिकृत-
 स्त्वदायुःसंकोचः, स तु हृदयनाडीं दलयति ॥ ६ ॥

सदा विद्यातत्त्वं बहुविषयविक्रान्तधिषण-
 स्त्रयीतः सञ्चिन्वन् बहुविधमशोधीस्स्वहृदयम् ।
अतः संवृत्ता ते मतिरशरणस्नेहमसृणा
 ततस्त्वत्सौहार्दं विगतकलुषं स्तौति हि जनः ॥ ४ ॥

त्वदन्ये प्रौढा अप्यतिपटुतरा जाग्रति महा-
 प्रभावास्तत्पार्श्वेऽप्यनघगुणमाध्याय भवतः ।
मनो मे रोमन्थं व्रजति सुगुणाराम! रमते
 यथा भृङ्गः पुष्पान्तरपरिगतश्चूतकलिकाम् ॥ ५ ॥

समत्वं व्याहर्तुं वचनकुशलास्सन्ति बहवः
परं तद्व्याकर्तुं जगति विरळस्त्वादृशजनः ।
गुणी, सारग्राही, त्वमिव गुणरागी, च सुजन-
स्त्वदन्यः को वा स्यात्; विधिविकटतास्मिंश्च घटिता ! ॥ ६ ॥

कवित्वं कारुण्यं हहह तव वैदुष्यमनघं
महामेधावित्वं सुकृतिवर ! निश्चञ्चमिह ।
अहो ! तत् सर्वस्वं मृतिखरकरान्तर्न्निपतितं
सतां सन्नष्टोऽभूत्; नहि नहि तदर्थे परिहृतिः ॥ ७ ॥

सुधासारस्पर्द्धि, प्रतनु, रुचिरार्थप्रललितं,
परस्मान्न श्राव्यं ध्रुवमवसितं तेऽत्र वचनम् ।
इदन्त्वेकं स्मृत्वा दिनमनु न शाम्यामि हतधीः
कृपालो धन्यात्मन् ! किमुत भवतः प्राणविगमम् ॥ ८ ॥

अतीतो वाग्वृत्तेरहह ! कृतिनस्तत्र भवतः
प्रभावः क्वाप्रह्वीकृतपदचया मे क रसना ? ।
तथापि त्वत्पुष्यत्गुणगणसुधालोडनपरा
सदा सास्तु; स्वस्थः प्रभवतु भवान् गीष्पतिनिभः ॥ ९ ॥

सदा मेधाकान्तिप्रसरसरलं नेत्रयुगलं
स्फुरत्स्फीतश्रीकं मुखपुटमुदाराकृतिमपि ।
हहा ! ध्यायं ध्यायं तव गुणमहाकाव्यघटनां
चिरं गायं गायं गमयतु मनो मेऽत्र दिवसान् ॥ १० ॥

# संस्कृतनाटकानि, आधुनिकरङ्गवेदिश्च ।

(एन् . ई. विश्वनाथशर्मा, राष्ट्रभाषाविशारदः)

"उद्धृत्योद्धृत्य सारं यमखिलनिगमान्नाट्यवेदं विरिञ्चि-
श्चक्रे यस्य प्रयोगे मुनिरपि भरतस्ताण्डवं नीलकण्ठः ।
शर्वाणी लास्यमस्य प्रतिपदमपरं लक्ष्म कः कर्तुमीष्टे
नाट्यानां किन्तु किंचित्प्रगुणरचनया लक्षणं संक्षिपामि" ॥ (दशरूपकम्)

श्लोकेनानेन खलु नाट्यकलाया अतिप्राचीनकालनिष्पन्नत्वमितरातिशायित्वं च सुखावगमम् । सर्वथानुकरणसंभवैषा तौर्यत्रिकोपस्कृता प्रचचार चिरकालं राजसदस्सु विद्वद्गोष्ठीषु सहृदयमण्डलीषु च ।

"चतुर्विधैरभिनयैस्सात्त्विकाङ्गिकपूर्वकैः ।
धीरोदात्ताद्यवस्थानुकृतिर्नाट्यं रसाश्रयम्" ॥

इत्यनेन लक्षणेनापि अनुकरणमेव नाट्यतत्त्वमुच्यते । नाट्यं चेदं रूपरूपकशब्दाभ्यामपि व्यवह्रियते । भाषान्तरेषु तु नाटकशब्देनैव व्यवहारः ।

साहित्यसहकारस्य नाटकशाखा अनितरसाधारणं प्राधान्यमावहति । यथा आलोकसहकृतेनैव चक्षुषा द्रव्याणि गृह्यन्ते तथा समाजस्य स्थितिः केवलं साहित्यालोकसहकृतेनैव बुद्धिरूपेण चक्षुषा गृह्यते, यतः भाषागतसाहित्यानुरोधेन तद्व्यवहर्तृसमाजपौष्कल्यादिकम् ज्ञातुं शक्यम् । अतश्च साङ्घिकतत्त्वशास्त्राध्येतृणामवश्यं महत्साहाय्यमादधते नाटकानि इति वक्तव्यमास्ते । कथानुकृतिरूपमिदं नाटकं सात्त्विकादिभिरभिनयैर्द्रष्टॄणां चेतस्सु स्वप्रभावं जनयति । नाटकं च दशधा विभज्यते तत्तत्स्वरूपादिभेदेन—

(१) "नाटकं सप्रकरणं—दश" । इति ।
लक्षणानि चाऽऽह पृथक् पृथगेतेषामाचार्यः ।

---

(१) नाटकं सप्रकरणं भाणः प्रहसनं डिमः
व्यायोगसमवाकारौ वीथ्यङ्केहामृगा दश ॥ (दशरूपकम् ।)

प्रथमतः रूपकान्यतमस्य नाटकस्य —

वीरशृङ्गारयोरेकः प्रधानं यत्र वर्ण्यते।
प्रख्यातनायकोपेतं नाटकं तदुदाहृतम् ॥ इति।

वस्तुतस्तु रूपकान्तराणि नाटकावान्तरकोटावन्तर्भूतान्येव। अङ्कनायकादिभेदो व्यतिरेचयति रूपकान्तराण्यस्मात्। उक्तकारिकायां, 'वीरशृङ्गारयोरेक' इत्यनेन तयोरन्यतरस्याङ्गित्वं नाटके स्पष्टीकृतम्। परस्ताज्ज्ञायत एवेतरेषां रसानां तत्र शृङ्गारवीरान्यतराङ्गत्वम्। 'प्रख्यातनायकोपेत' मित्यनेन नायकस्य पुराणेतिहासादिप्रसिद्धत्वं वर्ण्यते, तद्वारा कथावस्तुनश्च उत्पाद्यत्वामिश्रत्वे अपि क्वचित्क्वचिद्दृश्यते कथाया यथा मृच्छकटिकादौ। कल्पितं खलु तदितिवृत्तं तत्र भवता शूद्रकेण।

प्रतिपाद्याश्च कथास्तावत्प्रायेण शुभपर्यवसायिन्य उपलभ्यन्ते; क्वचिद्दुःखान्ता अपि। अतश्च शुभमात्रपर्यवसायित्वं संस्कृतनाटकानां वदतां मतं न समञ्जसम्। नाटकरचयितॄणां शुभाशंसकत्वम्, अशुभकर्मोपरोधतत्परता च बहुलमुपलभ्येते एव, यतस्तानि राजधानीषु, उत्सवादिमंगलावसरेषु च, प्रायुज्यन्त। शुभाकांक्षा तावन्नान्दीभरतवाक्यप्रयोगादेवानुमातुं शक्या। किं चैतत्प्रयोजनमेवोद्दिश्य 'दूराह्वानं वधं युद्ध' मित्यादिना केचन प्रत्यक्षतः प्रयोगानार्हकोटौ प्रवेशिताः। अनतिप्रधानास्सूच्याश्चापरे केचन विषया विष्कम्भचूलिकाङ्कास्यप्रवेशाङ्कावतारणात्मिकभिः पञ्चभी रीतिभिर्निर्दिश्यन्ते। प्रयोगरीतिः प्रयोक्तारः भाषादिकमपि भिद्यन्ते परस्परमेतेषाम्। अवश्यसूच्या अपि कथाप्रक्रमेऽनतिप्रधानाः केचन विषया भूमिकान्तरप्रवेशं विनैव निर्दिश्यन्ते। "[2]आकाशे कर्णं दत्वा" इत्येवमादिभिरुपायैरङ्गवेदिस्थेन शैलूषेण श्राव्यते सूच्यो विषयः। इत्थंरीत्या सर्वथा कवितारसनिष्यन्दीनि मंगलमयानि च संस्कृतनाटकानि कालेऽधुनातने न बहुलं रंगभूमौ प्रयुज्यन्ते।

आश्चर्यो वक्ता कुशलोऽस्य लब्धा।
आश्चर्यो ज्ञाता कुशलानुशिष्टः ॥ (काठकोपनिषत्)

(क्रमशः)

(१) दशरूपकम्.
(२) उदाहरणमस्य शाकुन्तले ऋषिकुमारवचनम्।

# * चित्प्रकाशः ।

( लघुनाटकम् )

(N. Gopinathan Nair, Sahitya Siromani Final.)

कथाकालः—पौराणिकः

## कथापात्राणि

(१) **श्यामा**—वाराणस्यामतिप्रसिद्धा संपन्ना चतुर्विंशतिवर्षदेशीया कलानिपुणा प्रगल्भा च काचित्सुन्दरी गणिका ।

(२) **वज्रसेनः**—तक्षशिलाभिजनः कश्चिद्वणिग्वरः । पञ्चविंशतेस्त्रिंशतश्चान्तःपात्यस्य वयः। ऊर्जस्वलः सुन्दरश्चायं प्रांशुकायः तक्षशिलासर्वकलाशालायामुन्नतविद्याभ्यासं कृतवानासीत्। निष्कलङ्कं तद्वदनं सान्मार्गिकजीवितचर्यां कुलीनतां च द्योतयति ।

(३) **वासन्ती**—श्यामायाः समवयस्का सखी सुन्दरी नयनिपुणा च । चिन्ताक्रान्तमपि तस्या मुखं समाकर्षकमासीत् ।

(४) **रणसिंहः**—भटनायकः, मध्यवयस्कः । स्वस्थानोचितं गांभीर्यं क्रौर्यं चास्य वदने प्रकाशेते ।

(५) द्वे ग्रामीणस्त्रियौ ।

### ॥ रङ्गः प्रथमः ॥

[ प्रशान्तसुन्दरः सायङ्कालः । श्यामा मनोहरे स्वमन्दिरोद्याने कस्मिंश्चिच्छिलातले उपविशति । सा हि परिमिताभिरेव भूषाभिर्भूषिताऽसीत् । स्वाङ्गप्रभाप्रसरो यथा विलोक्येत तथाऽतिमृदुलं दुकूलं वसाना दृश्यते । तस्या म्लानं मुखं आमीलिते लोचने च चिन्ताकुलतां द्योतयन्ति । वासन्ती सविनयमविदूरे उपविशति । तस्याश्चालोचनाभावो म्लानता च कस्यचित्प्रधानकार्यस्य विवक्षां द्योतयति । ]

* Adapted from a short play by 'Pushpamangalom.'

श्यामा—(व्याकुलतया सह) सखि, त्वमप्येतावता सहवासेन न सम्यग्जानासि मे हृदयगतिम्। अहं तावद्विजने स्थित्वाऽतिदुस्सहं मनःक्लेशं दुःखचिन्तां च विस्मृत्य भावनालोके विहर्तुमभिलषामि। तदा तावत्ते तत्त्वोपदेशः!। किमर्थमियं वक्रगतिः। स्पष्टं कथय वक्तव्यम्।

वासन्ती—तवेयं स्थितिः—मनःक्लेशचिन्ताकुलतादयो—यत्सत्यं मेऽतीव भीतिमादधाति। कोऽत्र हेतुः? । अपरिमितं धनं, आर्यावर्ते निखिला अपि धनिनो रसिकाश्च कामिजनास्ते आज्ञापालकाः; नहि दृश्यते तवाभिमुख्यमेतेषु। (सखेदम्) मन्ये ममैव मन्दभागिन्या दुर्दशात्र हेतुरिति।

श्यामा—(सेर्ष्यम्) न कस्यापि दुर्दशा, ममैव। आर्यावर्ते सर्वेषु रसिकेषु धनाढ्येषु कामुकेषु सन्तुष्टा भवेयमिति कतमच्छास्त्रमनुशास्ति? (सवैरस्यम्) अहं विजने अभिरमे। दौर्भाग्यतो वा स्यात्, विभिन्नो हि मदीयः स्वभावः।

वासन्ती—अधुनात्वे भवत्यास्संजातं परिवर्तनमतीव मां संभ्रमयति। केनापि पिशाचेनेव—अथवा गन्धर्वेणेव—रक्तचूषं हन्यते हृदयशल्येन तवेदमुपभोगक्षमं तारुण्यम्। तवायं चिन्ताहेतुर्द्वितीयहृदयभूतायाः—तवाऽस्सुखस्य हेतोर्जीवितमपि सन्त्यक्तुं सन्नद्धायाः—ममापि निकटे त्वया न कथ्यते। हा! दौर्भाग्यातिरेकोऽस्य जनस्य! (तस्याः कपोले बाष्पकणा लुठन्ति)

श्यामा—(सकरुणम्) सखि, ते प्रेमार्द्राणि हृदयचलनानि मां गाढं स्पृशन्ति। (दृढस्वरेण मन्दमन्दम्) अहं तावत् अविहितस्य कस्यचित् प्रणयस्याधीना संवृत्ता। कस्तदालम्बनमिति न वक्तुमुत्सहे। अप्रकाशितं हि प्रेम अलौकिकं सोदरि! तद्धि पावनं शोभनं च। नूनं प्रेमपूर्णे मद्भावनासाम्राज्ये नितरामानन्दतुन्दिला संपद्येय।

वासन्ती—(सगाम्भीर्यम्) कुलधर्मस्य विरुद्धं—गणिका भवति किं प्रणयाधीना?।

श्यामा—मूढे किं कथ्यते। न खल्वनुरागजीवितस्योपरि कस्यापि जन्मायत्ता स्वामिता। पापपङ्किले मदीयेऽस्मिन् जीविते यद्यलौकिकं प्रेमानुभवगोचरं स्यात्, किं तस्य स्वामिनी मा भूवम्? वासन्ति, नहीतःपरमार्यावर्तीयानां धनिकानां सुखोपकरणतया जीवितं नेष्यामि।

वासन्ती—हा! परिभ्रान्तेव दृश्यते ते मतिः।

श्यामा—(सखेदम्) कष्टं! त्वमप्येवं कथयसि? । हा वासन्तिके, वज्रहृदयाऽसि ।

वासन्ती—(स्मरणमभिनीय) सखि, स्मारितास्म्यनेन वचनेन वज्रसेनस्य ।

श्यामा—(ससंभ्रमम्) किं वज्रसेनस्य?

वासन्ती—जानासि, स खलु तक्षशिलाभिजनः कश्चिद्वणिक् ।

श्यामा—(सोत्कण्ठम्) तत्तु प्रसिद्धम् । ततः?

वासन्ती—नियतिगत्याऽधुना विहतमस्य वाणिज्यम् ।

श्यामा—कथं पुनरेतेषु दिवसेषूज्ज्वलवेषोऽश्वारूढः सोऽत्र सञ्चरन् दृष्टः ।

वासन्ती—स हि अत्रत्यानां सर्वेषां प्रभूणां धनिनां च स्नेहभाजनम् ।

श्यामा—अस्ति तथाविधमाकर्षकत्वं तस्य सत्स्वभावस्य । सकृद्दृष्टं तस्य मोहनमाननं न विस्मर्यते केनापि । ततः?

वासन्ती—(शान्ततया महता दुःखभावेन च निर्निमेषा सती) अद्य तावदकस्मात्स भाण्डागारभेदनापराधितया कारागारे बन्धनं गतवान् । विचारणायां स्पष्टीभूतेऽपराधे…

श्यामा—(ससंभ्रमम्) किम्?

वासन्ती—(सवैमनस्यम्) वधदण्डश्च विहितः ।

श्यामा—(झटिति ससंभ्रममुत्थाय) हा! वज्रसेन! हा प्रियतम! त्वमपि कश्चिच्चोरः? सखि, [किंचिदालोच्य] शीघ्रं तं पश्येयम् ।

वासन्ती—कीदृशी तेऽक्षमा? तत्तु विमृश्य कर्तव्यम् । स हि बन्धनस्थः । कथं स द्रष्टुं शक्यते ।

श्यामा—(दृढस्वरेण) वासन्ति, न हि स महात्मा चोरः । नूनं नापराधी सः ।

वासन्ती—न स्यान्नाम । सद्यपराधित्वेन गण्यते । अद्य रात्रौ तस्य दण्डोऽपि निर्वर्तयिष्यते ।

श्यामा—(सावेगमुपविश्य शिशुवद्विलप्य) हा हृदयनाथ! इयमप्यागच्छामि । निस्सहायास्मि संवृत्ता । (विलपति)

वासन्ती—श्यामे, सर्वं ज्ञायते मया । अत एवासह्यः स्याद्भवत्या अयं वृत्तान्त इति मत्वैव न स्पष्टं मयाऽकथ्यत । दुःखकारिणोऽस्मात् प्रणयबन्धान्मोचय तावदात्मानम् ।

श्यामा—(सनिःश्वासम्) सखि, सान्दिग्धावस्थायामासीदयं प्रणयः । तं समूलमुच्छेत्तुं मया यतितम् । तथापि सः प्रतिदिनं परिपुष्टिमासादयत्येव (आलोच्य) येन

केनाप्युपायेन स रक्षितव्यः। मदीयं सर्वस्वमपि विनियुज्य तं परित्राये। कुत्र सः? गच्छावस्तत्र। (उत्तिष्ठति)

**वासन्ती**—(सान्त्वस्वरेण) अलं संभ्रमेण। जीवितमपि तदर्थं त्यक्तुमहं सन्नद्धा। किन्तु असत्त्यागो बुद्धिपूर्वस्त्यागफलं त्यागादपि महत्तरश्च सम्पद्येत। सम्यगालोच्य कर्तव्यम्। (श्यामां बलादुपवेशयति)

**श्यामा**—वधाधिकारिणं रक्षिजनं च प्रलोभ्य समीहितं सम्पाद्यम्। त्वं तावत्सत्वरं गत्वा निभृतं सेनापतिं रणसिंहमत्रानय। लघु लब्धागन्तव्यम्। हा जगदीश!

[ यवनिका पतति ]

## ॥ रङ्गो द्वितीयः ॥

[प्रदोषवेला। श्यामायाः सौधे स्वीकरणकक्ष्या। दीपप्रभया समुज्ज्वलितायां तस्यां पौराणिकरीतेः पावनत्वं शुचित्वं च दृश्यते। श्यामा वासन्ती च प्रतीक्षाभावेन उपविशतः। समुज्ज्वलवेषो रणसिंहः शृंगारलोलः कामदेवत्वमभिनयन् प्रविशति। श्यामा सखी चोत्तिष्ठतः]

**श्यामा**—आर्य, स्वागतम्। कृतार्थास्मि भवदागमनेन। उपविशत्वार्यः। (रणसिंह उपविशति। ते अपि स्वस्थानं स्वीकुरुतः)

**रण**—(मन्दस्मितं कृत्वा) भवति, श्यामसुन्दरि, किमतिबहुमानेन? भवत्याः कस्यचित्कटाक्षस्य संसिद्धिः स्वर्गलब्धेर्गरीयसीति मन्ये। कस्य नियोगस्यानुष्ठानेन कृतार्थीभवेयमयं दासः?

**श्यामा**—आर्य, मम—मम—(तस्याः वाक् विह्वलतयोपहन्यते।)

**वासन्ती**—आर्य, ज्ञायते खलु वज्रसेनो नाम कश्चिद्बध्यपुरुषः।

**रण**—(साशङ्कम्) ज्ञायते। अद्यैव रात्रौ तस्य दण्डो निर्वर्त्तयिष्यते।

**श्यामा**—नूनं स नापराधी। न खलु तादृशो विद्वान् विदेशादागतो युवा तादृशं हीनकर्म कुर्यात्।

**रण**—ह ह, तस्य ह्यपराधः सम्यङ्निर्णीतः, विहितश्च दण्डः।

**श्यामा**—(अपेक्षाभावेन करुणस्वरेण) आर्य, स खलु महात्मा नूनमनपराध एव। अतः कृपया केनाप्युपायेन स मोचितव्यः। मदीयं सर्वस्वमपि तदर्थं प्रतिफलतया दातुं सन्नद्धास्मि।

**रण**—(ससंभ्रममुत्थाय) अहो किमिदमुच्यते! भाण्डागारभेदकस्य मोचने कस्तवाग्रहः? स एव मोषक इति प्रकाशम्। कथं स मुच्यते?

**वासन्ती**—नूनं तं दण्डतो मोक्तुं प्रभवत्यार्यः । श्यामायाः साहाय्यं कर्तुं लब्धोऽयमवसरो यथावदुपयुज्यताम् । पुण्यं चानपराधस्य रक्षणम् ।

**रण**—किमुच्यते । यद्यद्य दण्डो न निर्वर्त्यते, तदा वज्रसेनस्य ममापि च शिरः छेत्स्यते । नूनं स म्रियते तदेव हितं दैवस्य ।

**श्यामा**—[तस्य हस्तं गृहीत्वाऽसाधारण्या वशीकरणशक्त्या] महात्मन् ! मा मैवं भण । नूनमनपराध एव सः । आजीवनान्तं श्यामा कृतज्ञा स्यात् ।

**रण**—(निश्चयस्वरेण) श्यामे, अशक्यं तत् । किं क्रियते ? । (श्यामा सखी च अभिमुखमवलोकयतः आलोचनाभावेन)

**श्यामा**—यद्येवमस्य द्वे दिने अवधिर्दीयताम् ।

**रण**—(आलोच्य) भवत्वेवम् । अनुज्ञां सम्पादयामि ।

**वासन्ती**—आर्यस्य दयालुता कृतज्ञतापुरस्सरं स्मरिष्यते ।

**श्यामा**—आर्य ! अनुगृहीतास्म्यगतिरियम् ।

**रण**—(विलासानाभिनयन्) सुन्दरि, भाग्यवानस्मि संवृत्तः । (तस्याः करं गृह्णाति)

[यवनिका]

## ॥ रङ्गस्तृतीयः ॥

[अनन्तरदिने द्वितीययामान्त्यवेला । म्लानप्रकाशे कारागारे मलिनवेषो वज्रसेनः कवाटाभिमुखं अर्धनिद्रायितः शेते । तस्य हि विवर्णे मुखे ग्लानिर्निराशा च दृश्येते । दीपशिखया सह श्यामा प्रविशति । नीलनिचोलेन, समुज्ज्वलैराभरणैः, हर्षपूर्णेनाशाभरितेन रागदीप्तेनाननेन च सा काचिदप्सरःस्त्रीव मनोहारिणी दृश्यते । वज्रसेनश्चक्षुरुन्मील्य संशयाद्भुताभ्यां परितो विलोकते । तत उत्थाय निर्निमेषं तां प्रेक्षते ।]

**वज्र**—(साश्चर्यम् ) हा ! किमत्र दृश्यते ! केयं स्यात् ! (श्यामा सकरुणं मन्दं हसति)

**वज्र**—(लब्धधैर्योऽपि वेपमानस्वरेण) देवि ! प्रभाततारां गृहीत्वाऽऽगता उषोदेवतेव तेजस्विनी कासि ? । कश्चात्र कालगर्ते तवागमनस्योद्देश्यः ?

**श्यामा**—भवन्तं मोचयितुमस्म्यागता ।

**वज्र**—अहो ! मे भागधेयातिरेकः ! देवि ! किं मे परदेवतासि ? अथवा मत्प्रार्थनयानुकम्पिता काप्यन्या देवता ?

**श्यामा**—नाहं देवता । भवत्पादपद्मपरागायमाणतामभिलषन्त्यास्मि काचिदधःकृता ।

**वज्र**—(प्रवृद्धेनाद्भुतेन जिज्ञासया च) किमधःकृता ? कथय का त्वम् ? किमर्थमिदं साहसम् ।

**श्यामा**—आर्य, आकर्णिता स्यात् ....श्यामा नाम गणिका । सैवेयम् ।

**वज्र**—(ससंशयम) कथं मां स्वतन्त्रयसि ?

**श्यामा**—अस्त्युपायः सम्पन्नः ।

**वज्र**—हा ! अत्रास्ति किञ्चन दयामयं हृदयम् । अगतेर्मम कृते कीदृशस्त्यागो भवत्यानुष्ठितः । नूनं करुणामूर्तिर्देवांगनासि ।

**श्यामा**—(सनिःश्वासम्) मा मैवं । अस्याः कारागारभित्तेः कोऽपि शिलाखण्डोऽपि नैव मे हृदयात्कठिनतरः । तथापि मदीयस्य सर्वस्वस्यापि....परम्परागतस्य स्वार्जितस्य च....उत्सर्गस्त्वद्रक्षणायैव विहित इत्यस्ति वक्तुमभिमानः । गच्छावस्त्वरितम् ।

**वज्र**—कथं गम्यते ? श्यामे, महान्खलु ते त्यागः ।

**श्यामा**—राक्षिणस्तावदनुमन्येरन् । यात्रायाश्च सज्जीकरणं मया सम्पादितम् ।

**वज्र**—हा ! कथं हृदयंगमां मे कृतज्ञतां प्रकाशयामि । किमर्थं मत्कृते साहसं अनुष्ठीयते । त्वं तावत् विमृश्यमाना निस्सीमस्नेहस्य, निर्वर्ण्यमाना निरतिशयसौन्दर्यस्य च निधानमित्यवगच्छामि । किं तत्र कारणम् ?

**श्यामा**—(गद्गदस्वरेण) प्रेम ! प्रेम !

(अयस्कान्तशक्त्येव तावाश्लेषबन्धे पततः)

(यवनिका)

## ॥ रङ्गश्चतुर्थः ॥

[ पूर्वस्या एव रात्रेश्चतुर्थयामारम्भः । गङ्गातीरे कश्चित्काननप्रदेशः । म्लानप्रकाशा चन्द्रिकाऽस्ति । नातिदूरे कृषिभूमयो ग्रामप्रदेशाश्च दृश्याः ।

वज्रसेनः श्यामा च कस्यचित्तरोरध उपविशतः । अविश्रमया यात्रया तौ प्रक्षीणौ दृश्येते ]

**वज्र**—प्रिये, नौकायात्रयाऽतिमात्रं क्षीणासि संवृत्ता ।

**श्यामा**—प्रियतम, भवत्सान्निध्ये कीदृशमपि क्लेशं सोढुं श्यामा शक्तैव ।

**वज्र**—नौकायां, कथितं किल मया मे मातापितरौ, 'बाल्यकालं' तक्षशिलाकलालये विद्याभ्यसनं चाधिकृत्य । राज्यसन्दर्शनाकाङ्क्षा मां वाराणसीं प्रत्याकर्षत् ।

**श्यामा**—स हि मे भाग्योदयः ।

**वज्र**—अहो ! अमितं धनं बन्धुमित्रादिकं च मदर्थं अत्याक्षीः ।

श्यामा--नाथ, अतः खलु कृतार्थास्मि । तादृशो मे स्नेहातिरेकः । प्रथमदर्शन एवालौकिकं ते सौन्दर्यं मामतिमात्रमाकर्षत् । ततःप्रभृत्येव यथार्थं मे जीवितम् ।

वज्र--अहो ! विचित्रा गतिर्जीवितस्य । पूर्वं कतिचिद्वारं मया दृष्टा भवती । तथापि नैवाभिमुख्यं प्रतीक्षितम् । अद्य त्वं मे जीवितं प्रत्यानीतवती । प्रिये कीदृशः क्लेशोऽनुभूतो मदर्थम् ।

श्यामा—नाथ, मा प्राक्षीस्तदेव केवलम् ।

वज्र—श्यामे, नौकायात्रावसरेऽपि मया बहुवारं पृष्टापि नाकथयस्त्वम् । अपरिचिते मयि प्रत्ययेन कथं सर्वमत्याक्षीः ।

श्यामा—निष्कामं स्यात्प्रेम । नासीन्मे कापि प्रतीक्षा भवतः स्वातन्त्र्यलब्धेरन्यत्र ।

वज्र—नूनमतिविशुद्धा ते हृदयगतिः । आवयोस्तावत्, मम जन्मदेशे सुखसमृद्धं किमपि कुटुम्बजीवितं नेतव्यम् प्रिये, कथय, कथं मे स्वातन्त्र्यं संरक्षितं भवत्या ।

श्यामा—(अपेक्षाभावेन) तन्न प्रष्टव्यम्, अहमभ्यर्थये, तन्न प्रष्टव्यम् ।

वज्र—(सोत्कण्ठम) नहि नहि, अवश्यमिदानीं तदवगन्तव्यम् । कथय ।

श्यामा—(भीरुतया शङ्कया विश्वासेन च) नाथ, बिभेमि कथयितुम् । अतिनीचेन केनचित्कर्मणा-मदीयं समस्तं परलोकसुखं बलिं कृत्वा-तत्साधितं मया ।

वज्र—(सस्नेहम्) हा ! किं तत् ?

श्यामा—(करुणतरम्) आसीन्मय्यनुरक्त उदयनो नाम युवा । स खलु दयालुः मत्कृते त्वज्जीवितरक्षणाय स्वकीयं शिरः.... ....

वज्र—(सोद्वेगं सप्रकम्पं झटित्युत्थाय) हा ! धिक् हा धिक् । परिशुद्धया सह मर्तव्योऽहमेवं निन्द्यया रीत्या नीचेन मूल्येन जीवितं क्रीतवान् । हा ! त्यागिवरेण्य, युवतिलक, हा अभिनवजीमूतवाहन, कोऽन्य एतादृशं महत्तरं त्यागमनुतिष्ठेत् ? हा जगदीश, (निमिषं स्थित्वा उच्चैः) नश्यतु मे कलङ्कपङ्किलं जीवितम् । (दुःखाधिक्येन पतनोन्मुखो भवति)

श्यामा—(ससंभ्रमं गृहीत्वाऽश्लिष्य च) आर्यपुत्र, समाश्वसिहि, ।

(स विश्लेषायोद्युङ्क्ते, सा न विसृजति)

वज्र—अपसर्प नीचे, अपसर्प । कीदृशं महापापमनुष्ठितं त्वया । त्वं न मया द्रष्टव्या । गच्छ । (तां बलात्प्रक्षेपेण विश्लेष्य उन्मत्तवत्) नश्यतु मे निन्द्यं जीवितम् । नश्यतु वज्रसेनः । (शीघ्रं काननेऽन्धकारे तिरोभवति)

(यवनिका)

## ॥ रङ्गः पञ्चमः ॥

[अनन्तरस्मिन् दिने सायंकालः । पूर्वोक्तस्य काननस्य प्रान्तप्रदेशः । उन्मत्तवद्-वज्रसेनः प्रविशति । सः अतीव चिन्ताक्लान्तः खिन्नः प्रजागरकृशश्च दृश्यते]

**वज्र**—(उच्चैर्विवर्णस्वरेण) हा! किं कृतं मूढेन मया । प्रेमाधिक्येन सर्वमपि परित्यज्य कालगर्तगतं मे जीवितम् परित्रातवतीं देवयोषितं पापिष्ठोऽहमत्यजम् । हा! श्यामे, कुत्र गतासि ? किं त्वं कुपिता मां त्यक्तवती ?

(घटजलधारिण्यौ द्वे ग्रामीणयुवत्यौ प्रविशतः)

**एका**—सखि, कश्चिदयमुन्मत्तवद्दृश्यते ।

**द्वितीया**—नह्युन्मत्तः । क्षुधा तृषा चायमतिमात्रं पीड्यत इव । केनापि कारणेनायं अतिमात्रं दूयते । को वास्य दुःखहेतुः ?

**वज्र**—(तावुपसृत्य) भवत्यौ, किं श्यामाऽवलोकिता ?

**प्रथमा**—(सोपहासम्) ग्रामेऽस्मिन् बह्व्यः सन्ति श्यामाः । का त्वया द्रष्टव्या ।

**द्वितीया**—हला, प्रियावियोगादयमतिमात्रं खिद्यते । किं परिहासेन ?

**प्रथमा**—आर्य का श्यामा ? कुत्र गता ? कदा वियुक्ता ?

**वज्र**—ह्यो निशि मत्प्रियतमा अत्र मया पापिष्ठेन वियुक्ता श्यामसुन्दरी नाम ।

**द्वितीया**—नह्यावाभ्यां दृष्टा । आर्य, भवानतिमात्रं क्षुधितस्तृषितश्च दृश्यते । ननु निकटे वहति भगवती जाह्नवी । निर्मलेन तज्जलेन किं न दाहोऽपि शाम्यते ।

**वज्र**—किमर्थं पीयते । (अन्यतः परिक्रामति, निष्क्रान्ते युवत्यौ)

**वज्र**—(किञ्चिद्दूरं गत्वा स्थलीगतं नूपुरं नीलनिचोलं च गृहीत्वा) हा तस्या एवेदम् । हे नूपुर, निचोळ, अभाग्योऽहमिव किं युवामपि तामत्यजताम् (आलोच्य) सा नूनमत्रैव स्यात् । हा प्रिये, श्यामे श्यामसुन्दरि । (झटिति विद्युल्लतेव श्यामा प्रविशति)

**श्याम**—(सोद्वेगम्) हा प्राणनाथ, इहैवास्मि । [गाढं समाश्लिष्यति । स च विकारतरलो निश्चलं तिष्ठति । झटिति तस्य मनः क्षुभ्यति । स ऊर्ध्वमवलोक्य कांश्चित्क्षणान्-स्थित्वा महता केनचित् प्रकम्पेनोच्चलितः । ततः अपूर्वेण केनचिदात्मीयेन दिव्य-प्रकाशेनाविष्ट इव तेजस्वी लब्धधैर्यश्च भूत्वा तां बलात्प्रक्षिप्य पातयति ) आः पापिष्ठे, नीचे, नहीतस्त्वां प्रेक्षे गच्छ गच्छ (ऊर्ध्वमवलोक्य) अहो ! स दिव्यप्रकाशः । (उच्चैस्तरम्) अयमागच्छामि, अयमागच्छामि । (अन्धकारे तिरोभवति)

(यवनिका पतति)

शुभम् ।

श्री

# वञ्चिराजप्रशस्तिः ।

---

(Mahopadhyaya, A. Parameswara Sastry.)

चित्रोदयो जयति वञ्चिमहीमहेन्द्रः
श्रीपार्वती च जननी हितकामनास्य ।
सर् सी पि वर्णखचितं सचिवोत्तमाख्या-
विख्यातमस्ति च महो जनभागधेयम् ॥ १ ॥

लोकोत्तराणि मधुराणि फलानि भूरि
वञ्चिक्षमा भगवती फलतीहितानि ।
आस्वादयन्ति सममेव जनास्समेऽपि
चित्रोदयावनमिदं ननु तन्निदानम् ॥ २ ॥

श्रीभारतावनिमनन्यसमानमानां
सन्तन्वतां सुकृतिनां गणनेऽतिमान्यम् ।
स्थानं स्वकीयजननीसहितः प्रपद्य
चित्रोदयो जयति वञ्चिपवंशरत्नम् ॥ ३ ॥

सर्वान् जनानतनु रञ्जयतीति शब्द-
व्युत्पत्तियुक्तमवनौ ननु राजनाम ।
धत्ते नृपालकुलशेखरबालराम-
वर्मैव धर्मनिरतः खलु चैत्रराजः ॥ ४ ॥

श्रीवञ्चिराजकुलदैवतपद्मनाभ-
स्वाम्यालयादिसकलामरमन्दिराणि ।
कृत्वा दयाब्धिरखिलाभिगमोचितानि
चित्रोदयो जयति हैन्दवचक्रवर्ती ॥ ५ ॥

गाढान्धकारतिमिरेण समावृतस्य
भासा मनःकुवलयस्य विकासकारी ।
श्रविश्विराजकुलभूषणपार्वतीभाय्-
राज्याः सुतो विजयते भुवि चैत्रराजः ॥ ६ ॥

वञ्चिक्षमे ! तव महामहिमानमेन-
मन्या न कापि भुवने धरणिर्बिभर्ति ।
यत्त्वामनन्यसदृशप्रथया समृद्धां
पुष्णाति चैत्रनृपतिस्सुकृतायितस्ते ॥ ७ ॥

देवस्य सन्निधिसमायमहिन्दुवर्ज-
मर्चादि कर्तुमवनौ मनुजस्समानः ।
गत्वा कृती भवितुमत्र दयां वितन्वन्
मात्रा समं जयति चैत्रनृपालमौलिः ॥ ८ ॥

कारुण्यपूर्णहृदयं सततं प्रजानां
श्रेयःप्रदं प्रयतनं समभावनं च ।
नान्यत्र चैत्रनृपतेरवलोकनीय-
मस्माकमाकृतियुतं सुकृतं किलैतत् ॥ ९ ॥

लोकप्रशस्तिमवनौ तनुवाङ्मनोभिः
कर्माणि भूरि विरचय्य चिराय साध्या ।
चित्रोदयो नृपतिरेत्य धराधिपत्यं
श्लिष्टस्तया स्वयमतित्वरया वरेण्यः ॥ १० ॥

रात्रिन्दिवं दिविषदां नगरीव रम्या
नानामनोहरकलेबरवस्तुपूर्णा ।
चित्रोदयेन विधृता निभृताभिवृद्धिं
बाधाविहीनमवनिस्तनुते जनानाम् ॥ ११ ॥

विद्युत्प्रदीपपरिशोभितरम्यहर्म्य-
पङ्क्तिर्व्यनक्ति महिमानमहोऽनुनक्तम् ।
वञ्चिक्षितेर्धृतिमतां पुरतो गतेन
चित्रोदयेन नितरां परिवर्धितायाः ॥ १२ ॥

धाराधरस्य गुरुगर्वमहोऽतिखर्वं
कुर्वन्ति वारि वितरन्त इमेऽम्बुयन्त्राः ।
उर्वीं सुपर्वभुवनात् प्रथयन्ति गुर्वीं
श्रीपार्वतीतनयचैत्रधृतामपूर्वाम् ॥ १३ ॥

इष्टानुरोधमटनं भुवि साधयन्तो
धावन्ति यन्त्रघटिताः शकटाः सदापि ।
यत्पाटवेन निकटं गतमेव सर्वं
चित्रोदयस्य महिमा ननु तन्निदानम् ॥ १४ ॥

कालानुकूलममलां सफलां कलालिं
वञ्चिक्ष्मातलगताखिलमानवानाम् ।
वेलाविलंघिविभवः सुलभां प्रकल्प्य
चित्रोदयो लसति पुष्कलसत्कलावान् ॥ १५ ॥

कल्याणमाकलयता सकलप्रजाना-
माबालगोपकुलपालमिलापतीनाम् ।
आलिस्तुलां कलयितुं भुवि बालराम-
वर्माभिधेन खलु चैत्रनृपेण नालम् ॥ १६ ॥

चित्रालयो लसति नेत्रमुदे विचित्र-
चित्रैश्चरित्रपरिरक्षणदक्षगात्रैः ।
अन्यत्र कुत्रचिदवेक्षितुमप्यशक्यै-
श्चित्रोदयेन परिपूरितभूतिराशिः ॥ १७ ॥

आरामराजिरधरीकृतनन्दनश्री-
रारादमन्दसुमनोमुदमादधाना ।
राराजते भुवि पुरन्दरमाननीय-
रामाभिधाननरपालकपालितायाम् ॥ १८ ॥

भूमण्डलप्रथितकीर्तिमवेक्ष्य राम-
स्वाम्यार्यमत्र सचिवोत्तममादरेण ।
कृत्वा धुरन्धरमुदित्वरचातुरीक-
माखण्डलो गुरुमिव प्रविभाति चैत्रः ॥ १९ ॥

विद्यावतामभिनवः किमु भोजराज
इत्यादरेण मनुजैर्भुवि भाव्यमानः ।
चित्राजनिः श्रितजनामरकल्पकल्पो
वञ्चिक्षितिं सकलभव्यनिधिं विधत्ते ॥ २० ॥

आदित्यसूतिरिव सादितिरेधमान-
चित्रोदयस्य जननी महनीयकीर्तिः ।
श्रीपार्वती जयति वञ्चिनृपान्वयाब्धि-
पीयूषरश्मिरवनीसुकृतायमाना ॥ २१ ॥

जागर्त्यहर्निशमशेषहितैकतान-
श्चित्रोदयो नृपतिरत्र महाप्रभावः ।
तत्क्षेमदक्षममितं महितं स्वकर्म
श्रीपार्वती च सततं भुवि कुर्वती सा ॥ २२ ॥

(क्रमशः)

# किमपि विमर्शनम् ।

Mahopadhyaya, S. Neelakanta Sastry.

अयि, गीर्वाणवाणीपरिचरणपरायणाः, सहृदयधुरीणाः, सकरुणं किञ्चिदिदं कर्णे कुर्वन्तु ।

सहृदयहृदयाह्लादकस्य शब्दार्थयुगळस्य, रमणीयार्थप्रतिपादकशब्दस्य वा काव्यपदवाच्यत्वमाचक्षाणानां सर्वेषामपि शब्दादर्थो वृत्तिवेद्य इति निर्विवादम् । सा च वृत्तिरभिधालक्षणाव्यञ्जनात्मना त्रिरूपा भवति । एतद्व्यापारत्रयजन्यबोधाविषया अप्यर्था वाच्यलक्ष्यव्यङ्ग्यभेदेन त्रैविध्यं भजन्ते ॥

तत्र वाच्यस्तावदर्थः शब्दादभिधया प्रतिपाद्यमानोऽदोषत्वविशेषितो, रसाद्यनुगतवर्णविन्यासादिरूपैः शब्दालङ्कारैः शब्दद्वारा सञ्जातसमुल्लासः, अर्थालङ्कारैरुपमादिभिः स्वयं परिपुष्टः, गुणकृतां चमत्कृतिमादधानः, कचिद्व्यङ्ग्यैश्च वस्त्वलङ्काररसादिभिः गुणीभूतैरुपस्कृतः सहृदयहृदयमारोहति ।

व्यङ्ग्यार्थोऽपि पद,पदैकदेश,वर्णरचनादिभिः, प्रायशः सर्वैरपि वाच्यलक्ष्यव्यङ्ग्यैरर्थैरभिव्यक्तः प्राधान्येन प्रतीयमानो वाच्यातिशायिनीं चमत्कृतिमादधत्काव्यस्यात्मेति व्यवस्थीयते ।

लक्ष्यार्थस्य पुनः स्वात्ममात्रे चमत्कृतिजनकत्वं न विश्राम्यति, किन्तु व्यङ्ग्यार्थोपस्थापनद्वारैव । यदि लक्षणायाः प्रयोजनं व्यञ्जनाव्यापारगम्यं किमपि नाङ्गीक्रियते तदा 'गङ्गायां घोषः' 'गङ्गातटे घोषः' इति वाक्यद्वयजन्यबोधयोः वैलक्षण्याभावात् लक्षणा निरवकाशा स्यात् ।

अत्र केचित्— 'मुखं चन्द्र' इति रूपके वस्तुतो भिन्नपदार्थयोरुभयोरभेदान्वयबोधस्य बाधबुद्धिपराहतत्वात् विषयिवाचकशब्दानां तत्सदृशे लक्षणाऽवश्यमभ्युपेया । तथा सति चन्द्रसदृशाभिन्नं मुखमिति नामार्थयोरभेदान्वयबोध उपपद्यते । अत्र लक्षणायाः, चन्द्रसदृशात्मकार्थस्य प्रत्यायनेन चरितार्थत्वे 'चन्द्रसदृशं मुखमिति' उपमातः 'मुखं चन्द्र' इति रूपकस्य कथं वैलक्षण्यम् ? अतो रूपकोपमयोर्भेदप्रतिपत्त्यर्थं लक्षणास्थले ताद्रूप्यप्रत्ययः प्रयोजनं वक्तव्यम् । अत एव गङ्गातटे घोष इति वाचकशब्दप्रयोगं परित्यज्य गङ्गायां घोष इत्यादि लाक्षणिकार्थबोधके तस्मिन् कविसंरम्भः प्रयोजनप्रतिपिपादयिषाधीन इति तादृशवाक्यजन्यबोधयोर्वैलक्षण्यमुपपद्यते । तदनुरोधेनैव लक्षणया शब्दप्रयोगः सार्वजनीनोऽपि संगच्छत इत्याहुः ।

तच्च प्रयोजनं अभिधालक्षणातो भिन्नेन व्यापारान्तरेण व्यञ्जनात्मना सिध्यति । इत्थं च व्यङ्ग्यार्थोपस्थापकतया लक्ष्यार्थस्य काव्य उपयोग इति सिद्धम् ।

अन्ये तु—एवमादिस्थलेषु लक्षणां विनाऽभिमतं सम्पादयन्ति । तथा हि 'मुखं चन्द्र' इत्यत्राभेदान्वयबोध एव । बाधबुद्धौ सत्यामपि आहार्यज्ञानस्यानुभविकत्वात् बाधबुद्धिप्रतिबध्यतावच्छेदककोटौ यथाऽनाहार्यत्वं निवेश्यते, तथा शब्दजन्यज्ञानस्यापि सम्भवेन शाब्दान्यत्वमपि तत्र विशेषणं निवेशनीयम् । एवं चानाहार्यशाब्दान्यतद्वत्ताबुद्धिं प्रति तदभाववत्तानिश्चयस्य प्रतिबन्धकत्वं सिध्यति । वह्निना सिञ्चतीत्यादितो योग्यताज्ञानविरहाच्छाब्दबोधोऽप्रामाणिकः । अत्र त्वाहार्ययोग्यताज्ञानेन शाब्दबोध उपपद्यते ।

अथवा लाघवात् आहार्य एवाभेदप्रत्ययोऽस्तु इति ।

एवं च वाच्यव्यङ्ग्ययोरर्थयोः प्रधानेतरभावमाश्रित्य काव्यं, ध्वनिः गुणीभूतव्यङ्ग्यं चित्रं चेति त्रैविध्यं प्राप्नोति । तत्र ध्वन्यमानोऽर्थः वस्त्वलङ्काररसाद्यात्मना त्रिविधो भवति ।

तत्र वाक्यार्थोपस्कारकत्वमलङ्कारसामान्यलक्षणम् । वाक्यार्थो नाम वाक्यतात्पर्यविषयीभूतोऽर्थः । स च वस्त्वलंकाररूपो वाच्यार्थः, वस्त्वलङ्काररसादिरूपो व्यङ्ग्यार्थश्च भवति ।

सर्वेषामप्येतेषामर्थानां साक्षात्परंपरया वोपस्कारका रामणीयकप्रयोजकास्सर्वेऽप्यलङ्कारसंज्ञां लभन्ते । शरीरस्य हारादय इव काव्यस्य शोभाधायका अप्यलङ्कारा आत्मानं शरीरद्वारा भूषयन्ति । ये च आत्मसमवेतास्तदुत्कर्षकाः गुणास्तेषामपि शौर्यादीनां शरीरावच्छेदेनैव 'शूर' इत्यादि व्यवहारविषयत्वमुपपद्यते । अत एव माधुर्यस्यात्मगुणत्वेऽपि 'मधुरो वर्ण' इत्यादयः प्रयोगा दृश्यन्ते । तत्र 'मधुरो रस' इति मुख्यः प्रयोगः । मधुरो वर्ण इत्यादयश्चौपचारिकाः ।

वस्तुतस्तु माधुर्यं द्रुत्यादिचित्तवृत्तिप्रयोजकत्वं, प्रयोजकतासम्बन्धेन द्रुत्यादिमत्त्वं वा । एवञ्च सर्वोऽपि प्रयोगः मुख्य एव भवितुमर्हति । 'मधुरो रस' इत्यत्र आत्मवृत्तित्वेन 'मधुरो वर्ण' इत्यत्र शरीरवृत्तित्वेन च प्रतीत्योर्भेदेऽपि द्रुत्यादिप्रयोजकत्वरूपं माधुर्यं शरीरात्मनोरविशिष्टम् ॥

(क्रमशः)

# തിരുനാൾ.

BY

T. S. RAGHAVAN.

ഭാരതാംബികേ ! നിന്റെ പാവനഹൃദയത്തി-
ലേതൊരു നാമം സ്വൈരം മാറ്റൊലിക്കൊൾവൂ നിത്യം;
ഏതിനാലദ്വൈതമാം നിർവൃതി കൊണ്ടൂ ലോക,-
മേതൊന്നാൽ പുളകിതഗാത്രിയായുർവീദേവി,
അജ്ഞാനമനാചാരമിവയെത്തകർത്തൊരു
കല്പവൃക്ഷത്തെ നട്ടതേതൊന്നു ജഗത്തിങ്കൽ,
നിർവാണപ്പുലരിയിലാനന്ദകിരണങ്ങൾ
നീളവേ വീശിയജ്ഞലോകത്തെയുണർത്തിയ
ആ ദിവ്യ ജ്യോതിസ്സിന്റെ—യധർമ്മധർമ്മത്തിന്റെ-
യാ സത്യസത്യത്തിന്റെ പൊരുളു ജയിക്കുന്നു !
അപ്പുണ്യപുഞ്ജത്തിന്റെ ജന്മത്താൽ പവിത്രമാം
ചിത്തിരനക്ഷത്രമേ ! നീയിപ്പോൾ കൃതാർത്ഥമായ്.
ക്ഷത്രിയകുലോദ്ഭൂതമാകുമത്തേജസ്സിനെ
മർത്ത്യരൂപത്തിൽ കാണ്മാൻ വഞ്ചിമാതാവേ ! നീയും
എത്രയോ കാലം പുണ്യം ചെയ്തു വാണവിരതം,
മാത്രമോ ? മഹത്തപം ചെയ്തതുമില്ലല്ലല്ലീ ?
ഭൂമിയിലവതാരമെടുത്തൊരു ധർമ്മശീലൻ-
തന്നുടെ ജന്മദിനം മംഗളം പരത്തുന്നു.
ആ ദിനമിതാ വീണ്ടും വന്നല്ലോ ജനങ്ങളി-
ങ്ങാമോദഹൃദയരായ് കോൾമയിർക്കൊണ്ടീടുന്നു;
ആനനം മന്ദസ്മിതരശ്മികൾ തൂകീടുന്നു ;
ആനന്ദക്കടലിങ്കലാറാടി മറിയുന്നു.
പൂർവരാമൃഷീന്ദ്രന്മാരോതിയ 'ധർമ്മ' മന്ത്രം
സർവസിദ്ധിയും നേടി വിശ്രമം കൊള്ളുന്നല്ലോ.
നൂതനയുഗം തീർത്തതേതൊരു ദിവസത്തി-
ലാതപം കുളുർനിലാവായതേതൊരു ദിനം,
പിച്ചക്കാരനെക്കല്പവൃക്ഷമെന്നെതിരേറ്റു
സർവ്വം സമർപ്പിച്ചു സ്വാഗതോക്തികൾ ചൊല്ലി,
സാമ്രാജ്യസിംഹാസനം ധർമ്മഭൂവാഴുന്നതും,

ഭാരതാവനി ഹർഷകഞ്ചുകം പുതച്ചതും,
ഏതൊരു ദിവസത്തിലായതു വീണ്ടും വന്ന
ആ "ക്ഷേത്രപ്രവേശന" സ്മാരകദിനമേ! നീ
ദ്യോവിലോ? ക്ഷിതിയിലോ? തെളിഞ്ഞു വിളങ്ങുന്നു.
നീ ലോകചരിത്രത്തിൽ നൽതങ്കലിപികളിൽ
മായാത്ത മട്ടിലെന്നും മേല്ക്കുമേൽ തെളിഞ്ഞീടും
ആയതിൻ ഹേതുവായ "ത്തിരുനാൾ" ദിനമേ! നീ
താരമെങ്കിലും താരാനാഥനേക്കാളും യശ-
ശ്ചന്ദ്രിക നിത്യം വീശി ശ്ലോഭിക്ക ഭുവനത്തിൽ.

ശുഭം.

---

# കാമവും പ്രണയവും

BY

A. KUMARAN, SIROMONY IV.

ഇന്നത്തെ യുവസാഹിത്യകാരന്മാരിൽ ഏറിയ കൂറും കാമവും പ്രണയവും കൊണ്ടു് സാഹിത്യവ്യവസായം ചെയ്യുന്നവരാണു്. പക്ഷേ, അവയെപ്പററി അവക്കുള്ള ജ്ഞാനം വളരെ പരിമിതമാണെന്നു തന്നെ പറയേണ്ടിയിരിക്കുന്നു. അതുകൊണ്ടു് കാമത്തേയും പ്രണയത്തേയും പററിയുള്ള ഒരു ലഘുവിചാരം ഇവിടെ അസംഗതമായിരിക്കയില്ലല്ലോ.

കാമത്തിനും പ്രണയത്തിനും തമ്മിൽ ഈഷദ്വ്യത്യാസമുണ്ടു്. ഒന്നു് മറെറാന്നിൻെറ പരിണാമമാണു്; പ്രണയത്തിൻെറ പരിണാമം കാമം. രണ്ടും ഒരേതരം മനോവൃത്തിയുടെ രണ്ടുനില എന്നു ചുരുക്കിപ്പറയാം. പ്രണയം കാമത്തിൻെറ ബീജമാണു്. പ്രണയമില്ലെങ്കിൽ കാമമില്ല. പക്ഷേ, കാമമില്ലെങ്കിലും പ്രണയമുണ്ടാകാം. ഇതിനു് മനഃശാസ്ത്രം തെളിവു തരും. നമുക്കു പരിശോധിക്കാം.

ഹൃദയത്തിനു് പലതരം വൃത്തികളുണ്ടു്. അവയുടെ വിഭാവാദി പരിപുഷ്ടമായ പരിണാമങ്ങളെ പൊതുവിൽ രസങ്ങൾ എന്നു പറയും. രസങ്ങളിൽ ഏററവും പ്രധാനപ്പെട്ടതു് ശൃംഗാരമാണു്. ശൃംഗാരത്തിൻെറ രണ്ടു ഘടകാംശമാണു് കാമവും പ്രണയവും. എല്ലാ രസങ്ങളും ഓരോ

ബീജഭാവത്തിൽനിന്നും ജനിക്കുന്നു. ഏതെങ്കിലും ഒരു വിഷയത്തെ അഭിമുഖീകരിക്കുമ്പോൾ ഹൃദയത്തിനുണ്ടാകുന്ന പ്രഥമവികാരമാണ് ഭാവം. 'നിർവ്വികാരാത്മകേ ചിത്തേ ഭാവഃ പ്രഥമവിക്രിയാ' എന്ന് ശാസ്ത്രസമ്മതിയുണ്ട്. ഈ ഭാവം തന്നെയാണ് ബീജഭാവം. ബീജഭാവത്തിൻെറ സാങ്കേതികസംജ്ഞ സ്ഥായിഭാവമെന്നാണ്. ശൃംഗാരത്തിൻെറ സ്ഥായിഭാവം രതിയാകുന്നു. പ്രസ്തുത രതി ഉപാധിഭേദത്തെ ഉപജീവിച്ച് നാലു തരത്തിൽ പരിണമിക്കും. അവ ഭക്തിയും സ്നേഹവും (പ്രണയം) വാത്സല്യവും ആബദ്ധവുമത്രെ. രതി ഒന്നുമാത്രം; അത് ഉപാധിവിശേഷം നിമിത്തം നാലു തരത്തിൽ അറിയപ്പെടുന്നുവെന്നേയുള്ളു.

ഇനി രതിയെപ്പററി ചിന്തിയ്ക്കാം. 'യൂനാമന്യോന്യവിഷയസ്ഥായിനീച്ഛാ രതിഃ സ്മൃതാ' (രസസുധാകരം). യുവതീയുവാക്കൾക്കു തമ്മിലുള്ള സ്ഥിരമായ അഭിലാഷബന്ധമാകുന്നു രതി. 'സ്ത്രീപുംസയോഃ അന്യോന്യാലംബനഃ പ്രേമാഖ്യശ്ചിത്തവൃത്തിവിശേഷോ രതിഃ (രസഗംഗാധരം). സ്ത്രീപുരുഷന്മാൎക്കു പരസ്പരാശ്രയവും പ്രേമമെന്നു പേരുള്ളതുമായ മനോവൃത്തിവിശേഷമത്രെ രതി. 'മനോഽനുകൂലേഷ്വത്ഥേഷു സുഖസംവേദനം രതിഃ' (സരസ്വതീകണ്ഠാഭരണം). ഇഷ്ടവസ്തുക്കളിലുള്ള സുഖസംവേദനത്തെ രതിയെന്നു പറയുന്നു. 'രതിർമനോഽനുകൂലേഽത്ഥേ മനസഃ പ്രവണായിതം' (സാഹിത്യദപ്പണം). അനുകൂലപദാത്ഥങ്ങളിലുള്ള മനസ്സിൻെറ താത്പര്യാതിരേകമാകുന്നു രതി.

എന്തുകൊണ്ടോ മനുഷ്യഹൃദയത്തിനു ചിലപ്പോൾ ചില വസ്തുക്കളിൽ ഒരുതരം പ്രത്യേകത ഉണ്ടാകുക പതിവാണ്. ഈ പ്രത്യേകതയെ താത്പര്യമെന്നു പറയാം. ഏവംവിധമായ താത്പര്യം ചിരസ്ഥായിയായും അചിരസ്ഥായിയായും വരും. ചിരസ്ഥായി യാവജ്ജീവം നിലനിൽക്കുന്നതും അചിരസ്ഥായി ക്ഷണത്തിൽ നശിക്കുന്നതുമാകുന്നു. ചിരസ്ഥായിയായ താത്പര്യമേ രതിയാകൂ. ഇതിലേക്ക് മേലുദ്ധരിച്ച ആചാര്യസിദ്ധാന്തങ്ങൾ മതിയായ തെളിവുകളാണ്.

ഏതാദൃശമായ രതി യുവതീയുവാക്കന്മാരെ ഉപാധീകരിച്ച് പ്രണയമായിത്തീരുന്നു. പ്രണയത്തിൻെറ അനിയന്ത്രിതമായ പ്രാകട്യമാണ് കാമം. ഇങ്ങനെ നോക്കിയാൽ പ്രണയത്തിൽ നിന്നുമാണ് കാമത്തിൻെറ ഉത്ഭവമെന്നു കാണുവാൻ പ്രയാസമില്ല. രതിയുടെ വ്യക്തഭാവമാണല്ലോ ശൃംഗാരം. അതിനു വിപ്രലംഭമെന്നും സംഭോഗമെന്നും രണ്ടു പിരിവുകളുണ്ട്. വിപ്രലംഭത്തെ പൂൎവ്വരാഗാദികളായി നാലു തരത്തിൽ വിഭജിച്ചിരിക്കുന്നു. പൂൎവ്വരാഗത്തിന് അഭിലാഷം തുടങ്ങി മൃതിപര്യന്തം

പത്തു ദശകളുണ്ടെന്നാണ് ആചാര്യസിദ്ധാന്തം. ഇവയ്ക്ക് കാമദശകൾ എന്നത്രെ സംജ്ഞ. ഈ കാമാവസ്ഥ രതിനിഷ്പന്നമാണെന്നുള്ളത്, ഇവിടെ അനുക്തസിദ്ധമാണല്ലൊ. ഇതുകൊണ്ടാണ് 'കാമവും പ്രണയവും' ശൃംഗാരത്തിന്റെ രണ്ടു ഘടകങ്ങളാണെന്നും കാമം പ്രണയ (രതി) ത്തിൽ നിന്നുമാണുണ്ടാകുന്നതെന്നും മുകളിൽ പ്രസ്താവിച്ചത്.

അടുത്തതായി കാമപ്രണയസംബന്ധമായ പുരാണഭാഗം കൂടി ചിന്തിക്കുന്നതു് ഉചിതമായിരിക്കും. വിഷ്ണുവിന്റെ പുത്രനാണ് കാമദേവൻ. അയാളുടെ ഭാൎയ്യ രതി. ഇങ്ങനെയാണ് പ്രകൃതത്തെ സംബന്ധിച്ചുള്ള പൗരാണികഭാവനയുടെ നില. ഇതും മുകളിൽ പറഞ്ഞ സിദ്ധാന്തത്തിന് ഉപോദ്ബലകമായിരിക്കുന്നു. നോക്കുക—'സ്ഥായീ ഭാവോ രതിഃ ശ്യാമവർണ്ണോഽയം വിഷ്ണുദൈവതഃ' എന്ന അംശം കൊണ്ടു് ശൃംഗാരത്തിന്റെ അധിദേവത വിഷ്ണുവാണെന്നു സിദ്ധിയ്ക്കുന്നു. വിഷ്ണുദൈവതമായ ശൃംഗാരത്തിന് തദംശമായ കാമത്തെ പുത്രനാക്കിക്കല്പിച്ചിരിയ്ക്കുന്ന പുരാണഭാഗം ഏററവും സമഞ്ജസമെന്നു തന്നെ പറയണം. രതിയുടെ വ്യാപാരം മൂദുലവും വ്യവസ്ഥിതവുമാണ്. നേരേ മറിച്ച് കാമത്തിന്റേതു് അങ്ങനെയല്ല. അതു പ്രകടവും അവ്യവസ്ഥിതവുമാണ്. തന്മൂലം രതിയിൽ സ്ത്രീത്വവും, കാമത്തിൽ പുംസ്ത്വവും അദ്ധ്യാരോപിച്ച് അവയ്ക്കു തമ്മിലുള്ള നിത്യബന്ധത്തെ ഭാൎയ്യാഭൎത്തൃത്വത്തിലാക്കിയതും യുക്തം തന്നെ. ഇങ്ങനെ പൗരാണികമതത്തെ ഉപജീവിച്ചു നോക്കുമ്പോഴും കാമത്തിന്റെ ഉത്ഭവം പ്രണയത്തിൽനിന്നുമാണെന്നു തന്നെ പറയേണ്ടിയിരിക്കുന്നു.

കാമപ്രണയങ്ങളുടെ ഒരു ശാബ്ദികവിചാരം കൂടി സാധിച്ചു കൊണ്ടു് പ്രകൃതത്തെ തത്കാലം ഉപസംഹരിയ്ക്കാം. ശബ്ദങ്ങൾക്ക് പ്രകരണത്തെ ആശ്രയിച്ച് അൎത്ഥങ്ങൾ പലവിധത്തിലും വരും. പ്രതിപാദ്യവിഷയത്തിലെ പ്രണയശബ്ദത്തിന് സ്നേഹമെന്നുംകൂടി അൎത്ഥാന്തരമുണ്ടു്. 'ഗൃഹാനുപൈതും പ്രണയാദഭീപ്സവഃ' 'പ്രണയവതാമമൃതാശനദ്രുമഃ' ഇവിടുത്തെ പ്രണയശബ്ദങ്ങൾക്ക് സ്നേഹമെന്നാണൎത്ഥം. കാമശബ്ദത്തെ കോശകാരന്മാർ ഇച്ഛാൎത്ഥവാചികളായ ശബ്ദങ്ങളുടെ കൂട്ടത്തിൽ പരിഗണിച്ചുകാണുന്നു. ഇച്ഛാൎത്ഥത്തിൽ കാമശബ്ദത്തിന് വളരെ പ്രസിദ്ധിയുമുണ്ടു്. ഏതുതരമിച്ഛകളേയും കുറിയ്ക്കുന്നതിന് കാമശബ്ദത്തിനു കഴിവുണ്ടെന്നു തോന്നുന്നു. 'താം നാരദ: കാമചര: കദാചിത്' ഇതിലെ കാമചാരിത്വം സ്വേച്ഛാചാരിത്വമല്ലാതെ മറെറാന്നുമല്ലല്ലൊ. 'ന ജാതു കാമഃ

കാമാനാമുപഭോഗേന ശാമ്യതി' ഇവിടെ കാമശബ്ദത്തിന് ഭൗതികേച്ഛ എന്നത്രെ നിഷ്കൃഷ്ടമായ അർത്ഥം. ഇങ്ങനെ കാമപ്രണയശബ്ദങ്ങളുടെ അർത്ഥഭേദം കാണിക്കുവാൻ പലതുമുദ്ധരിക്കാവുന്നതാണ്. പക്ഷേ, പ്രകൃതത്തിൽ കൂടുതൽ തെളിവുകൾ ആവശ്യമുണ്ടെന്നു തോന്നുന്നില്ല.

---

# പ്രണയഗാനത്തിൻെറ ആത്മകഥ

BY

SIVASANKAR, MAHO. II

ഒരു പ്രേമഗാനം 'ആ...യി...രുന്നു' ഞാൻ. (അതെൻെറ ഭാവിയിൽ വിശേഷാർത്ഥമില്ലാത്ത ഒരു ക്രിയാപദമാകുമെന്നു ഞാൻ ലേശം കരുതിയിരുന്നില്ല.) കാലത്തിൻെറ കടങ്കഥയിൽ എന്നെപ്പലർ ഇടയിടെ മൂളിയിരുന്നു. നിശാന്തവായുക്കളിലും നിമ്നഗകളിലെ നേരിയ അലകളിലും അന്നെൻെറ ഇഴഞ്ഞ രാഗം കരുണരംഗങ്ങൾക്കു മേളമിട്ടു. കാറിനെക്കണ്ടു കരയുന്ന വേഴാമ്പലിലും, വഴിയരുകിലെ യാചകപ്പരിഷയിലും, എൻെറ ഈണങ്ങൾ ക്രമേണ ലയിച്ചു. യോദ്ധാക്കളുടെ ഉരസുന്ന ഖഡ്ഗങ്ങളിൽ അതാരോഹിച്ചു. പ്രണയക്ഷുഭിതരുടെ കണ്ഠങ്ങളിൽ അതവരോഹിച്ചു. കുഞ്ഞുങ്ങളുടെ പിഞ്ചുനെഞ്ചുകളിൽ അതലകൊണ്ടു. രക്തസിരകളിൽ മുദ്ര വച്ചു. കാലം പിന്നെയും നിശ്ശബ്ദതയിൽ നിന്നിഴഞ്ഞു കയറിക്കൊണ്ടിരുന്നു.

ഞാൻ പ്രകൃതിയുടെ തീരായിരുന്നു. എൻെറ പേർ സുന്ദരമധുരമായ ആരാദ്ധ്യതയ്ക്കു അനുഗ്രഹവാക്കായിരുന്നു. ക്രമേണ നിശ്ശബ്ദതയുടെ തീരാശ്ശാപമായിത്തീർന്നിരുന്നു ഞാൻ.

ചുംബനസീൽകാരങ്ങളിലും പുളകോദ്ഗമപാടനങ്ങളിലും എൻെറ മധുരിമ ലോകം സപദിച്ചു. ഓരോ അണുക്കളും ഏകാന്തപ്രേമഗായകരെന്നു വിധിച്ചു. ഓരോ നിമിഷവും അനന്തഗാനങ്ങളുടെ വിശാലാന്തരീക്ഷമെന്നു വീക്ഷിച്ചു.

എന്നെപ്പലർ ഏററു പാടി; പല തരത്തിൽ പാടി; ഞാനന്ന് എങ്ങും നിറഞ്ഞു തുളുമ്പിയ വിശ്വസൗന്ദര്യം ആയിരുന്നു.

എൻെറ ആ 'ശാന്തസമുദ്രം' അകാലക്ഷുഭിതങ്ങളായ തരംഗങ്ങൾ ആക്രമിച്ചു. വ്യാമോഹങ്ങളുടെ പേമഞ്ഞുകൾ എന്നിലും കെട്ടു

പിടിച്ചു തുടങ്ങി. ഞാൻ ക്രമേണ ഒരു ദുർദ്ദിനത്തിലെ സായംകാലമാക്കപ്പെട്ടു. അലസവായുക്കളുടെ ആയാസമേഘപടലങ്ങൾ അന്തരീക്ഷത്തിലെങ്ങും ഇരുൾ പൊഴിച്ചു. എൻെറ സായാഹ്നങ്ങളും പിന്നീടുള്ള കറുത്ത പുള്ളികളാൽ കാളം നിറച്ചു.

എൻെറ ചരിത്രം പാടേ മറിഞ്ഞു. എൻെറ ഗായകർ എൻെറ മരണവേളയെ സൂചിപ്പിക്കുമാറു മോങ്ങിത്തുടങ്ങി. എൻെറ നിശ്ശബ്ദത പോലും അധൈര്യമായി. ക്ഷീണിച്ച ഗായകരുടെ തൊണ്ടകൾ മരണഗുഹാഗഹ്വരങ്ങളിലെ പിശാചുക്കളുടെ ശ്വാസോച്ഛ്വാസമെന്നു തോന്നി.

എങ്ങും കറുത്ത പുക. പീരങ്കികളുടെ ലോകാവസാനനിശ്വാസങ്ങൾ പോലുള്ള യാമധ്വനികൾ. മേഘപടലം പൊഴിച്ച മഴ മാറി. അന്തരീക്ഷമാകെ പ്രളയച്ചുഴിയിലെന്നോണം ഫൂൽകാരമാത്രമായി. സമുദ്രഗർഭങ്ങളിൽ ഭാവിയുടെ പരിമാണതത്ത്വസൃഷ്ടികൾ പോലെ പൊട്ടിത്തെറിച്ച ചില ഗോളത്തുണ്ടുകൾ പാതാളഭൂതങ്ങളെന്നോണം ഓടിത്തുടങ്ങി. വായുക്കൾ പോലും ഭാവം പകൻു. എൻെറ ഗായകരിൽ കാലത്തിൻെറ നാമമുദ്രകൾ തങ്ങിനിന്നു. ആ ഫലകങ്ങൾ നോക്കി ഇന്നത്തെ നിമിഷങ്ങൾ വഴി കണ്ടു പോകുന്നു.

ഞാനാകെ വിമ്മിഷ്ടത്തിലായി. എൻെറ ഓരോ തുള്ളി രക്തത്തിലും മരണത്തിൻെറ സുഷിരങ്ങൾ വീണു തുടങ്ങി. ഞാൻ ജീവിതാനന്ദത്തിൻെറ സന്ദേശഹരൻ ആയിരുന്നു. ഞാൻ ഏകാന്തതയുടെ ആജ്ഞാവാഹകനായി രൂപാന്തരപ്പെട്ടു. ഞാൻ ഭയങ്കരനിശ്ശബ്ദതയിലേക്കു ഇടയിടെ പതുങ്ങുന്ന ഒരു ചലനചിത്രം പോലെ പ്രകൃതിയുടെ അന്തർനാളങ്ങളിൽ പററിയിരിക്കുന്നു.

എൻെറ ദിവ്യസന്ദേശങ്ങളിൽ മുദ്രവയ്ക്കപ്പെട്ടു. എൻെറ ആത്മാവിൻെറ കൊച്ചുവിളക്കിൽ കറുത്ത തുണി മൂടി. എൻെറ പൊൻ-പേന നിറമററ മഷിയിലാഴ്ത്തി.

ഞാൻ കാലത്തിൻെറ കടത്തുകാരനായി. നീചതയുടെ നിരത്തിലെ വഴിതിരിപ്പുകാരനായി. ആത്മാർത്ഥതയുടെ ചുങ്കക്കാരനായി. ഞാൻ എന്നന്നേയ്ക്കുമായി നിശ്ശബ്ദതയാൽ ഗ്രസിക്കപ്പെടുന്നു. എൻെറ പ്രാണവേദന വെറും ഇഴഞ്ഞ വീചികളുമായി അകാലശൈലങ്ങളിലെങ്കിലും കനകസാരം ചൊരിയട്ടെ! അമൃതധാരയാവട്ടെ। ഞാൻ മറയട്ടെ। ഞാനൊരു പ്രണയഗാനമായിരുന്നു.

# മൂകനായ മൂങ്ങ.

BY

K. R. NAIR.

(താരാട്ട്.)

തങ്കക്കതിരോൻ വിളങ്ങീ—ലോകം
പൊങ്കതിരേററു തിളങ്ങീ.
മന്ദപവനൻ തഴുകി—ഭ്രുവ-
മന്ദാനന്ദത്തിൽ മുഴുകി.
ആരാമലക്ഷ്മി ഹസിച്ചൂ—നല്ല
താരുകളും വികസിച്ചു.
തെണ്ടി വിരണ്ടു മുരണ്ടു കൊണ്ടു
വണ്ടിണ നന്മധുവുണ്ടു.
സങ്കടമെല്ലാം മറന്നു—പാടി
പൈങ്കിളിക്കൂട്ടം പറന്നു.
സൗരഭ്യമെങ്ങും നിറഞ്ഞു—ഹിമ
സാരം വെയിലിൽക്കുറഞ്ഞു.
ശ്രീലരസാലത്തിൽ മന്ദം—രസ-
ലോലസംഗീതമരന്ദം,
ഉണ്മയിൽപ്പൂങ്കുയിൽ പാടി—മന്ദം
നന്മയിൽ നന്മയിലാടി.
പൊന്നശോകത്തിൻെറ കൊമ്പിൽ—ഏദി-
വന്ന, ശോകത്തിൻെറ മുമ്പിൽ
മൂകനായേകനായ് ചിത്രം—ഒരു
മൂങ്ങയിരിപ്പൂ വിചിത്രം !!
മാനിച്ചിടേണ്ടൊരു ഭാവം—തന്നിൽ
ധ്യാനിച്ചിടുന്നുണ്ടു പാവം.
ഒട്ടു വയസ്സൻെറ മുമ്പിൽ—ച്ചെറു
കുട്ടികളെന്ന പോൽ, കൊമ്പിൽ
പക്ഷികളാമൂങ്ങ തന്നെ—ചുററി-
ത്തൽക്ഷണം നിന്നിതു പിന്നെ,

ചീത്ത പറഞ്ഞു രസിച്ചു—ചില
തത്തകൾ പാരം ഹസിച്ചു.
എങ്കിലും മിണ്ടിയതില്ലാ—ഭാവം
പങ്കിലമാക്കിയതില്ലാ.
ആയതിന്നത്ഥമിതല്ലേ ? —"എൻെറ-
യാനനം പ്രാകൃതമല്ലേ
സുന്ദരഗീതങ്ങൾ പാടും—ദേവ-
നന്ദനം പോലെ പൂങ്കാടും
കക്കശമാമെൻെറ നാദം—കൊണ്ടു
ധിക്കൃതമാകിൽ മേ ഖേദം.
കുങ്കുമം തൊട്ടൊരു ഫാലം—തന്നിൽ
പങ്കക്കുറിയലംകോലം !!
പാടുവിൻ നിങ്ങളെല്ലാരും—തൻെറ
പാട്ടുപോൽ ദ്വേഷിക്കില്ലാരും
ഞൊന്നു കേട്ടു മോദിക്കും —സമാ-
ധാനമെനിക്കുമുദിക്കും.
ത്യാഗം !! പവിത്രം ജയിപ്പൂ—എന്നു-
മൂകനാം ഞാൻ നിശ്ചയിപ്പൂ !!"

ശുഭം.

॥ श्री चित्रा ॥

# THE
# Sanskrit College Magazine
## TRIVANDRUM

License No. 399. Dated 29th March 1940.

Vol. I | 1941 | No. 2, 3

## THE MAGAZINE BOARD

*Chairman :—*

SRI N. GOPALA PILLAI M. A.

*Staff Editor :—*

SRI A. PARAMESWARA SASTRI,
*Mahopadhyaya.*

*Student Editors :—*

SRI K. PURUSHOTHAMA PAI.
SRIMATI M. SARASVATI AMMA

## ॥ विषयानुक्रमणिका ॥


*Page*

1. प्रस्तावना— अध्यक्षः .... 1

2. सीताविचारलहरी— N. Gopala Pillai, M A. .... 3

3. साहितीसरसो न्यायः—
Mahopadhyaya A. Parameswara Sastri .... 11

4. श्रीचित्राप्रशस्तिपत्रिका—
Mahopadhyaya N. Sadasiva Sastri .... 13

5. प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधसमर्थनम्—
Mahopadhyaya K. Mahadeva Sastri .... 15

6. किमपि विमर्शनम्—
Mahopadhyaya S. Neelakanta Sastri .... 21

7. किञ्चिदुत्कीर्त्तनम्—
Vidwan Mahopadhyaya N. P. Panikkar .... 25

8. ज्योतिषं केरलाश्च—
Jothisha Mahopadhyaya K. Padmanabha Pillai Sastri .... 27

9. भगवान् कणादस्तदीयसंस्कारश्च—
Nyaya Meemamsa Mahopadhyaya V. Rama Sarma .... 30

10. गर्भश्रीमान् वञ्चिमहाराजः—
Mahopadhyaya M. Sivasubrahmonya Sastri .... 35

11. शब्दविचारः—
Mahopadhyaya K. Yajnanarayana Sastri .... 42

| | | Page |
|---|---|---|
| 12. | "कर्मणि व्यज्यते प्रज्ञा"— Mahopadhyaya Siromoni E. V. Damodaran .... | 47 |
| 13. | श्रीनारायणगुरोर्मतं तत्त्वचिन्ता च— Pandita Mahopadhyaya Siromoni K. Balarama Panikkar .... | 49 |
| 14. | धीररुक्मांगदम्— K. Ramakrishnan Nair, Maho: III .... | 53 |
| 15. | अनुमाननिरीक्षणम्— K. Purushotham Pai, Siromoni Final .... | 61 |
| 16. | कालिदासस्य नाटकत्रयम्— M. Madhavan Unni, Siromoni Final .... | 64 |
| 17. | नाटकद्वयम्— M. R. Kesava Ganakan, Maho: III .... | 68 |
| 18. | "आर्याः कुतश्चिदपि नागताः"— K. E. Gopala Pillai, Kurissery .... | 71 |
| 19. | भावनापुरुषोत्तमनाटकम् (प्राचीनकृतिः) Discovered by Mahakavi Ulloor .... | 73 |
| 20. | കാവ്യവിമർശനം— N. Krishna Pillai, B. A. (Hons:) .... | 75 |
| 21. | ദാരിദ്ര്യത്തിൽ (പദ്യം) K. Neelambaran, Maho: III .... | 79 |
| 22. | ഒരു മായാസ്വപ്നം— G. Krishna Pillai, Maho: III .... | 80 |
| 23. | "ഭൃംഗത്തിന്റെ ജീവഗീതി" (പദ്യം) Sivasankar, Maho: III .... | 84 |

# ॥ श्री चित्रा ॥

## अनन्तशयनस्थराजकीयसंस्कृतमहाकलाशालातः

प्रकाश्यमाना चातुर्मासिकी पत्रिका ।

सञ्चिका १ ॥ १११६ तमे कोळम्बवर्षे मकरमासः ॥ सम्पुटः २, ३

## प्रस्तावना

वञ्चिराज्यवासिनां समेषामपि जनानाम् अभिमानानन्दसन्दोहम् अभिनवमादधद् विबुधजनविनुतिचोदनो नूतनः संभवः सकलजनविदितः प्रथमतः प्रथानुरूपं प्रस्तावमर्हति। पूर्वमेव महनीयबहुबिरुदललामभूषिताः सचिवोत्तमाः सर् सी. पी. रामस्वाम्यार्याः अपूर्वगुणानुभावग्रहणनिपुणेन चक्रवार्त्तिना भूयोऽप्यधुना समलंकृताः अनन्यसचिवसुलभेन के. सी. एस्. ऐ. बिरुदेनेति प्रमोदमवाहे प्लवामहे भूयः। स्वमहिमातिशयेन समस्तभारतीयनृपाणां पुरस्तात् प्रतिष्ठितस्य श्रीचैत्रमहाराजस्य महिततरं मन्त्रिपदमलंङ्कुर्वतां प्रतिभावतां महतामेतेषां एतदधिकापि बहुमतिः समुचिता प्रतिभाति प्रज्ञावताम्। प्रसरतु प्रकामं अखिललोकाह्लादिनी कीर्त्तिकल्लोलिनी राजन्वतो वञ्चिराज्यस्य। अनुमोदामहे वयं अमात्यसम्माननमहामहेऽस्मिन्, भवेम धन्यधन्याश्च।

क्षन्तुमर्हन्ति महाजनाः अस्मदीयश्रीचित्रापत्रिकायाः प्रसाधने संजातमिमं विलम्बं बहुहेतुकम् । इतः परमविळम्बं क्रमशः प्रकाशं नेतुमिमां नितरां प्रयतामहे ।

अस्मत्समारम्भेषु सर्वेष्वपि सर्वदा जाग्रतीं अनुजिघृक्षामावहतां वश्यवचसां महाकवीनां उळ्ळूर् एस्. परमेश्वरार्याणां उपपन्नमुचिततरं प्राच्यविद्याकलाध्यक्षपदमभिनवं कं वा न करोत्यामोदमेदुरं सुमनोनिवहम् । अस्माकं सविनयमनुमोदनं प्रकटयामः पुलकितैरन्तःकरणैः ॥

# ॥ सीताविचारलहरी ॥ *

(N. GOPALA PILLAI, M. A.)

सुतयोर्गतयोर्महर्षिणा
सह साकेतपुरीं दिनात्यये ।
उटजोपवने स्थितैकदा
बहुचिन्तामथिता हि मैथिली ॥ १ ॥

विटपोऽभजदत्र कस्यचित्
सुशिरीषस्य नवातपत्रताम् ।
हरिनीलतृणानि चाभव-
न्नथ तस्या मृदु भद्रमासनम् ॥ २ ॥

अपि चास्तमयं विवस्वतो
जगतश्चान्द्रिकयाभिपूरणम् ।
स्थितमेव विविक्तमात्मनो
नहि सस्मार वसुन्धरेश्वरी ॥ ३ ॥

पुळकान् कुमुदैः स्फुटं ह्रदे
तमसागन्धवहेन तन्वता ।
चलिता वनराजिरादधौ
कलधौतश्रियमैन्दवार्चिषा ॥ ४ ॥

---

* "कुमारन् आशान्" नामकस्य केरळीयमहाकवेः "चिन्ताविष्टा सीता" इत्यस्य खण्डकाव्यस्य विवर्त्तनम् ।

विधुतां वनमल्लिकातते-
र्मरुतेवोपहृतां सुमावलिम् ।
घनवेणिरुवाह कैशिके
कलितां तैजसकीटपङ्क्तिकाम् ॥ ५ ॥

रुचिरः कबरीभरस्तदा
परिशोभाभरितो बभूव सः ।
विशदोडुपथांशको यथा
निशि दृश्यस्तरुवाटिकान्तरे ॥ ६ ॥

शुशुभेऽशुकपल्लवेन सा
किल देव्यास्तनुवल्लिरावृता ।
मृदुलोरुतले निधाय ते
भुजशाखे निषसाद सुन्दरी ॥ ७ ॥

स्फुटलक्ष्यमृते स्थिते दृशा-
वविकासे दरमीलिते उभे ।
वहता मरुता प्रसारिते-
ष्वनिमेषे परुषालकेष्वपि ॥ ८ ॥

अलसावयवापि निश्चलं
प्रगुणं सास्त तदानताङ्ग्यपि ।
नियमेन विना यथानिलो
विनिशश्वास वतान्तरा सती ॥ ९ ॥

अतिवेलमथोत्तरङ्गितो
  हृदि देव्यास्तु विचारसागरः ।
सुकपोलतटे विनिर्मले
  नवभावान् विविधानकल्पयत् ॥ १० ॥

भ्रमदाकुलमक्षमा मनो
  विनिरोद्धुं तु विचारभाषया ।
निजगाद सखेदमन्तरा
  वच एवं हि महामनस्विनी ॥ ११ ॥

नियमोऽस्ति न कोऽपि कस्यचित्
  परमायान्त्यपि यान्ति वा दशाः ।
भ्रमतीह नरः कुतोऽथवा
  भवतत्त्वं न हि वेद कश्चन ॥ १२ ॥

तरळः सुतरां कणो यथा
  रसशाल्योश्चलभृज्यमानयोः ।
अनवस्थितमीर्यते मनो
  गुरु भूयो लघु हेतुनाधिना ॥ १३ ॥

भुवनस्य सुविभ्रमावहान्
  सुखकालानपि तान् स्मराम्यहम् ।
अपि दुर्ललितांश्च दुर्विधे-
  र्मुखहासानिव तांस्तिरोहितान् ॥ १४ ॥

अपयाति च तापदस्तपो
भुवि वर्षाः स्युरथानुवत्सरम् ।
अपि मुञ्चति पत्रकं तरुः
क्रमशः पल्लवति प्रपुष्यति ॥ १५ ॥

सुलभेषु मृगादिजन्मिना-
मवकाशेषु शुचोऽपि सा द्रुतम् ।
अवसास्यति, मानहेतुना
मनुजस्यैव रुजास्त्यनत्यया ॥ १६ ॥

कृमिवत् स्फुरतीह मेंऽसको
ननु वामोऽप्यधुना वृथा किल ।
अनुभोगमतः परं शिशु-
र्न निजच्छायमिव भ्रमाम्यहम् ॥ १७ ॥

निशमय्य मुनेर्मनोहरं
नवकाव्यं मनुवंशनायकः ।
अनुतापमुपैति वाधुना
स पिता स्वौ तनयाववैति वा ॥ १८ ॥

यदि वा न लयं गताः स्वयं
प्रियभावाः पतिरागजाः समे ।
हृदि न प्रकटं लगन्ति ते
प्रतिनादा लघवः श्रुताविव ॥ १९ ॥

क्षणमात्रवियोग एव हृद्-
व्रणमापादयदुल्बणो हि यः ।
निजशीर्षमनुन्नमय्य स
स्वपितीव प्रणयः शयुर्यथा ॥ २० ॥

स्वयमिन्द्रियमोदहेतुषु
स्वकभावेषु गतेषु केषुचित् ।
भजते दयनीयतां मनो
गतपारावतपञ्जरोपमम् ॥ २१ ॥

उदयास्तमयौ विना सदा
हृदयाकाशतले समुज्ज्वलम् ।
विरराज करं प्रसार्य यः
स च चन्द्रः स्मृतिदर्पणे स्थितः ॥ २२ ॥

उचिता व्रतवृत्तिरीयते
सशमः काल इहात्मविद्यया ।
विशुचास्म्यवमानशल्यम-
प्यवशिष्येत विवेकशक्तितः ॥ २३ ॥

अविहाय शरीरकं मया
दयया गर्भभरो यतो धृतः ।
पृथुकौ प्रियचेष्टितैर्हि मे
व्यदधातां कुतुकं स्वनिष्कृतिम् ॥ २४ ॥

हृदयद्रुतिकारिणा तमो
ह्रियते यैर्मृदुहासरश्मिना ।
नरजीवितवेदनामिमां
शिशवस्ते प्रतिहन्तुमौषधम् ॥ २५ ॥

स्फुटतारततिर्द्दिवे तम-
स्युदधौ द्वीपगणोऽस्ति चान्तरा ।
उपयात्यपनेतुमामयं
नहि हेतुर्न महाविपत्स्वपि ॥ २६ ॥

इदमेवमवेयते ततो
नहि जन्तौ नियतेः स्थिरारिता ।
प्रहरत्यमुमेकबाहुना
ननु संवाहयतीतरेण सा ॥ २७ ॥

तत एव निरन्तरं समा
सरणिः स्याद् विषमेह जीविनः ।
स्फुरतः सुखदुःखके उभे
खलु तेजस्तमसी यथा मुहुः ॥ २८ ॥

अथवास्ति तदेकमेव यत्
परिवर्तेत सुखासुखे इति ।
अत एव न विभ्रमन्ति ते
मतिमन्तस्त्वनयोर्द्वयोरपि ॥ २९ ॥

सविपन्न सुखं मयेष्यते
तदहं दुःखमितः परं वृणे ।
स्पृहयेदसुखाय चेन्मनः
स्वयमीर्ष्यां विजहाति दुर्विधिः ॥ ३० ॥

तम एव चिराय संस्तुतं
प्रतिपद्येत शनैः प्रकाशताम् ।
सुतरां मधुरायते स्वयं
स च तिक्तः परिशीलितो रसः ॥ ३१ ॥

अवियुक्तशुभाशुभे दधत्
सततं श्रान्तिदमेव जीवितम् ।
भुवने भ्रमति क्षपाकरो
दिवि पक्षद्वयसंयुतो यथा ॥ ३२ ॥

गहनेषु परं निमज्ज्य वा
मुहुरुन्मज्ज्य सुखासुखोर्मिषु ।
सुचिरेण तु मोहवारिधे-
र्विवशः पारमुपैति चेतनः ॥ ३३ ॥

अधिरोपयितुं शरीरिणं
सुखदुर्गं दययैव सुस्थिरम् ।
अपि कोऽपि भुजः प्रचोदय-
त्यनुवेलं व्यथया हि पद्यया ॥ ३४ ॥

उपयाति शुभेऽपि मानसं
विपदित्येव विशङ्क्य भेष्यति ।
कृपया परिलाल्य पोषितुं
सुगृहीतो विहगस्त्रसन्निव ॥ ३५ ॥

विशदामकरोत् स लक्ष्मणो
नृवराज्ञामिह मामपासितुम् ।
सहसा भुवनं तमोऽवृणो-
दपतं वज्रहता हता ह्यहम् ॥ ३६ ॥

स्वहतौ न मनो धृतं हिते
   मरणे वा मम गर्भचिन्तया ।
व्रणजे तु किणे पुरा पुनः
   क्षतमेत्याप्यतिविह्वलाभवम् ॥ ३७ ॥

अभितप्तमृते गतिं मनो
   मम नोन्मादमवापदाकुलम् ।
यदि वाभ्यलषं ततो धुरा-
   मसितुं ग्रन्थिमपोह्य मे शुचः ॥ ३८ ॥

अथवा द्विगुणां व्यथां ददत्
   स गदो बाढमनागतो वरम् ।
करणक्षतिमेत्य चेन्नृणां
   मरणं स्यादपि जीविताद् वरम् ॥ ३९ ॥

कलये वनमर्कटाय तां
   नहि दातुं गुणपुष्पवाटिकाम् ।
नहि चालपितुं वनानिले
   वहति छिद्रितवेणुवत् स्वयम् ॥ ४० ॥

मनुजस्य नहीतरो गुरु-
   र्नहि बन्धुश्च परस्तथैव यः ।
प्रददाति विदां शुभव्रतं
   विदधातीह यथा व्यथाक्षमे ॥ ४१ ॥

(क्रमशः)

# साहितीसरसो न्यायः।

(Mahopadhyaya A. PARAMESWARA SASTRY)

'प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः'। तेषु पुनरद्वितीयस्समजनि तत्त्वचिन्तामणिकारो गङ्गेशोपाध्यायः। स किल बाल्ये वयसि गुरुकुलमधिवसन् धिषणाबलेन सकलान् निजसतीर्थ्यानधरयन् विद्याभ्यसनपरायणो बभूव। सत्सु बहुषु शिष्येषु कुशाग्रधिषणे गङ्गेशे परं गुरुनाथस्य क्रूरतरं शासनतोदनमनुदिनमनुस्यूतमासीत्। स हि मुहुर्गङ्गेशं 'गौः, गौः' इति निन्दया सङ्केतेनाह्वयति स्म।

गते बहुतिथे काले, सम्पन्ने चासाधारणे वैदुष्ये, तारुण्यरमणीये च सञ्जाते वयसि, सर्वज्ञताकन्यकया कीर्त्तिस्वयंवरणमाल्यवत्या मन्दं मन्दमुपयातुमभिलषिते च सन्दर्भे कदाचिद् यथापूर्वमध्यापको गङ्गेशोपाध्यायं गौरिति वचनेन समाक्षिपत्। हन्त! निन्दास्फोरणमेतदसहनीयमेव सन्तापमन्तेवासिनः स्वान्ते सन्तनोति स्म। प्रकृतिरपगता। विकृतिरुपगता। अब्रवीत् स सब्रह्मचारिसान्निध्ये गुरुमभिमुखीकृत्य—

"उत[2] गवि गोत्वमुतागवि गोत्वं, यदि गवि गोत्वं नहि मयि तत्त्वम्।
अगवि च गोत्वं यदि भवदिष्टं, भवतु भवत्यपि सम्प्रति गोत्वम्"॥

अशृणोदाचार्यः शिष्येणैवमुदीरितं वचनम्। अतुष्यदत्यन्तं न पुनरक्रुध्यत्। बभाषे स मनीषिणामग्रगण्यः स्वशिष्यम्—

'वत्स गङ्गेश! तुष्यामि तव मनीषया। हृष्यामि वैदुष्येण। परिणतमखण्डञ्च ते पाण्डित्यम्। निवर्तस्व गुरुकुलात्'। गङ्गेशोपाध्यायस्तदाकर्ण्य

---

(१) तर्करसिकास्तर्केऽनुमानं तत्र रसिकास्तद्रसनसमर्थाः प्रत्यक्षपरिकलितमप्यर्थं प्रत्यक्षप्रमाणेन ज्ञातमपि पदार्थमनुमानेन बुभुत्सन्ते बोद्धुं ज्ञातुमिच्छन्ति। बुभुत्सन्त इति 'बुध' अवगमे, इति धातोः सनि लटि प्रथमपुरुषे बहुवचनान्तः शब्दः॥

(२) गोत्वं गवि वा वर्तते गोभिन्ने देशे वा। गवि चेद् गोत्वं, कथं वा मयि तद् वर्तेत। गोभिन्नदेशेऽपि गोत्वं वर्तत इति यदि भवान् मन्यते तर्हि सम्प्रति भवत्यपि तदस्त्येव। यद्यहं गौरिति भवान् वदति तर्हि भवानपि गौरित्यहं वदामीत्यभिसन्धिः॥

कर्णरसायनं वचनं, प्रणम्य गुरुचरणौ, तदाशिषाश्लिष्टो हृष्टश्च गेहमगमत् स्वकीयम् ।

तेन प्रणीता बहवो ग्रन्थाः । तेषु चायं न्यायसरणावसाधारणमेव किमपि प्रमाणं तत्त्वचिन्तामणिग्रन्थश्चिन्तामणिरिव 'रघुनाथशिरोमणि' 'लक्ष्मीधर' 'जगदीश' 'गदाधरा'दिकानां स्वस्वाभिलषितमर्थं जातमनुकूलयन्ननुग्राहको भवति ।

"अपक्षवृत्तिर्न सपक्षवृत्तिर्विपक्षवृत्तिः करवाळधूमः ।[3]
अबाधितासत्प्रतिपक्षितत्वात् प्रतापवह्नेरनुमां तनोति ।"

गङ्गेशोपाध्यायविरचितं राजवर्णनपरमिदं पद्यमस्य काव्यनिर्माणनैपुणीं विवृणोति ।

कणभक्षाक्षचरणादिमुनिपुङ्गवैः परिगणितां सरणिमाश्रित्य सञ्चरणाय बद्धकङ्कणानां प्रामाणिकानां नव्यनैयायिकानां मध्ये तत्त्वचिन्तामणिकृतो गङ्गेशोपाध्यायस्य बहुमतमग्रगण्यं स्थानमधिकृत्य नास्त्येव विवादो विदुषाम् । अवशिष्टमुपरिष्टात् ॥

---

(३) करवाळधूमः प्रतापवह्नेरनुमां तनोतीति योजना । 'अयं राजा प्रतापवह्निमान् करवाळधूमा'दित्यनुमानस्वरूपम् । अपक्षवृत्तिः पक्षे सन्दिग्धसाध्यवति स्वीयपक्षे चावर्तमानोऽप्रवर्तमानश्च । न सपक्षवृत्तिः सपक्षे निश्चितसाध्यवति मित्रपक्षे च वर्तनहीनः प्रवर्तनरहितश्च । विपक्षवृत्तिर्विपक्षे निश्चितसाध्याभाववति शत्रुपक्षे च वर्तमानः प्रवर्तमानश्च । करवाळधूमः करवाळः खड्ग एव धूमः । अबाधितासत्प्रतिपक्षितत्वाद् बाधसत्प्रतिपक्षरूपाभ्यां हेत्वाभासाभ्यां रहितत्वात् । प्रतापवह्नेः प्रताप एव वह्निस्तस्य । अनुमामनुमितिम् । तनोति करोति ।

सता हेतुना पक्षवृत्तिना सपक्षवृत्तिना विपक्षावृत्तिना च भाव्यम् । यथा—पर्वतो वह्निमान् धूमादित्यनुमाने हेतुर्धूमः पक्षे पर्वते सपक्षे महानसे च वर्तते । विपक्षे ह्रदे न वर्तते च । तस्मिन् हेतौ—अबाधितत्वमसत्प्रतिपक्षितत्वं चाक्षतम् । अतः स हेतुर्धूमो वह्नेरनुमितिं जनयतीति युज्यते । प्रकृते तु—करवाळरूपो धूमो हेतुधर्मान् पक्षवृत्तित्व, सपक्षवृत्तित्व, विपक्षावृत्तित्वरूपान् त्यजन्नपि अबाधितत्वमसत्प्रतिपाक्षितत्वं च भजन् प्रतापवह्नेरनुमितिं जनयतीति महदाश्चर्यमित्याशयः ॥

॥ श्रीः ॥

# श्रीचित्राप्रशस्तिपत्रिका ।

Mahopadhyaya, N. SADASIVA SASTRY,
Pandit, English High School, Quilon.

स्यानन्दूरपुरस्थसंस्कृतकलाशालाधिपाः ! स्वस्ति भोः
स्थाने सत्पुरुषार्थवर्द्धनधियामभ्युद्यमः श्रीमताम् ।
क्षन्तव्यं वचनं मदीयमधुना चित्राभिधा पुत्रिका
भावत्काभिनवा भिनत्ति निभृतं यन्मौनमुद्रां मम ॥ १ ॥

श्रीचित्रेति यथार्थमाह्वयमियं सत्यं ब्रुवे, बिभ्रती
मामभ्येत्य "सदाशिवं" भजभजेत्युद्बोधयत्यद्भुता ।
कल्यश्रीपरमेश्वराकलितभाः संसेविता सा कथं
कल्याणाय भवेन्न कस्य विदुषो या सर्वतोमङ्गला ॥ २ ॥

गैर्वाणीपरमत्वमद्वयमतं न्यायामृतं जीवनं
मीमांसाविवृतिः प्रसन्नसमयः श्रीकालिदासत्रयम् ।
वर्णाभ्यन्तरयत्ननिर्णयविधिः सत्तारतम्यध्वनि-
बोधः शाब्द इहेष्यते किमपरं दृश्यः प्रपञ्चोऽखिलः ॥ ३ ॥

श्रीचित्रामणिदर्पणे न सरणिर्या दृश्यते मार्गणे
सा का संस्कृतकोविदाः ! सुविशदं संवीक्ष्य नः कथ्यताम् ।
तत्स्वालस्यमपास्य जागृत बुधाश्चित्रासमालोकने
गैर्वाणीपरिपोषणे च सततं यत्नः समाधीयताम् ॥ ४ ॥

चित्रैर्वर्णमरीचिवीचिनिचयैरुद्भासिताङ्गा कलं
कूजन्ती मम हृल्लतानिलयने संक्रीडमाना चिरम् ।

तत्त्वादक्षभवातिरूक्षदहनैः सन्तापितं मामकं
स्वान्तं हन्त! निरन्तरं शिशिरयत्येषा विचित्रा शुकी ॥ ५ ॥

सेयं भाविशुभं व्यनक्ति विपुलं गीर्वाणवाण्या दृढं
हा! तस्याममिमानिनो विगणितास्तुष्यन्तु विद्वज्जनाः ।
भूयात्सापि भवादृशैः किल कलाशाला सनाथा चिरं
श्रीभूनाथकृपावशेन भवतात् सर्वं जगन्मङ्गलम् ॥ ६ ॥

अपरिचितचरेणाप्यात्तकौतूहलेन
स्वयमितिलिखितं यत् संस्कृते बन्धुबुद्ध्या ।
गुणवदगुणवद्वा सर्वमेतत् क्षमन्तां
रसिकनिवहमालारत्नभूता भवन्तः ॥ ७ ॥

# ॥ प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधसमर्थनम् ॥

(पूर्वतोऽनुवृत्तम्)

(महोपाध्यायः, के. महादेवशास्त्री)

यदि च 'पश्य मृगो धावती'त्यत्र द्वितीयान्तं तच्छब्दमध्याहृत्याध्याहृततच्छब्दोत्तरद्वितीयोपस्थाप्यकर्मत्वस्य 'दृश' धात्वर्थेऽन्वयोपगमेन कर्मत्वप्रकारकबोध इत्युच्यते, तर्हि 'धावति मृगः, तं पश्य'इति वाक्यभेदापत्त्या महाभाष्याभिमतस्यैकवाक्यत्वस्य भङ्गः। यदि च मृगपदोत्तरं विभक्तिव्यत्ययेन द्वितीयोपस्थाप्यकर्मत्वस्यैव धात्वर्थेऽन्वयोपगमेन 'तमि'त्यध्याहाराभावान्नैकवाक्यत्वभङ्ग इत्युच्यते, तर्हि अप्रथमासामानाधिकरण्ये तिङो बाधितत्वेन शत्राद्यापत्त्या 'धावन्तं' 'धावमानं' इति वा स्यात्। न चेष्टापत्तिरिति वाच्यम्। अस्माभिर्धावन्तं धावमानं वा मृगं पश्येत्यत्र शाब्दबोधानुपपत्तेरकथनेन' 'पश्य मृगो धावति' इत्येकवाक्यत्वेन भाष्याभिमतस्थल एवानुपपत्तेः प्रदर्शितत्वेन तत्स्थलीयानुपपत्तिपरिहाराय धावन्तं धावमानं वा मृगं पश्येति स्थलीयबोधसमर्थनस्य पृष्ठताडनेन दन्तभङ्गायितत्वात्।

न च मृगपदोत्तरं विभक्तिव्यत्ययं नाङ्गीकुर्मः। येनाप्रथमासामानाधिकरण्याच्छत्राद्यापद्येत। किन्तु मृगपदोत्तरप्रथमाया एव कर्मत्वे लक्षणामङ्गीकृत्य लक्षणया प्रथमाविभक्त्युपस्थापितकर्मत्वप्रकारकबोध इति च वक्तुं युक्तम्। आनुशासनिकातिरिक्तार्थे सुब्विभक्तेर्लक्षणाया व्यत्ययानुशासनवैयर्थ्यभयेनानङ्गीकारात्। न वा व्युत्पत्तिवैचित्र्येण मृगकर्तृकधावनस्य कर्मतासम्बन्धेन धात्वर्थदर्शनेऽन्वयः। 'आनय, मृगो धावति' 'आमन्त्रय, शिष्यो धावति' इत्यादौ तथाऽप्यगतेः। मृगादिकर्तृकधावनादेरानयनकर्मत्वासंभवात्।

(६) एवमेकविशेषणविशिष्टे धर्मिणि तत्सजातीयसम्बन्धेन विशेषणान्तरान्वयस्याव्युत्पन्नतया 'चैत्रः पचति' इत्यादौ सुबर्थसंख्याविशिष्टतयोपस्थिते चैत्ररूपधर्मिणि आख्यातार्थकृतेरन्वयासम्भवात्। एतादृशव्युत्पत्त्यनङ्गीकारे राजपुरुषो भार्याया इति प्रयोगप्रसङ्गः। स्वत्वसंबन्धेन राजात्मकविशेषणविशिष्टतयोपस्थिते पुरुषे तेनैव सम्बन्धेन भार्यान्वयस्य, आश्रयतासंबन्धेन राजस्वत्वविशिष्टतयोपस्थिते पुरुषे आश्रयतया भार्यास्वत्वान्वयस्य वा संभवात्।

एवं 'घटो द्रव्य'मित्यर्थे 'घटो द्रव्यत्ववस्ये'त्यपि स्यात्। समवायेनैकत्वविशेषणतयोपस्थिते घटे समवायेन द्रव्यत्वान्वयस्य सम्भवात्।

(७) 'एवं चैत्रेण सुप्यत' इत्यादिभावाख्यातस्थले, 'न कलञ्जं भक्षये'दित्यादिनिषेधस्थले च चैत्रकर्तृकः स्वापः' 'कलञ्जभक्षणं बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वाभाववत्' इति क्रियामुख्यविशेष्यकस्यैव बोधस्य नैयायिकैरङ्गीकृतत्वेन शाब्दबोधस्य प्रथमान्तार्थमुख्यविशेष्यकत्वव्याप्यत्वभङ्गश्च। प्रथमान्तपदसमभिव्याहारस्थल एव शाब्दबोधस्य प्रथमान्तार्थमुख्यविशेष्यकत्वमिति नियमसंकोचेनाप्यनिस्तारः। चैत्रः पचति भवतीत्यादौ चैत्रकर्तृकपाकानुकूलकृतौ तिङर्थे धात्वर्थभावनान्वयबोधस्यैवाङ्गीकरणीयत्वेन तावताऽपि व्यभिचारापरिहारात्।

(८) एवं प्रथमान्तार्थस्य प्राधान्ये 'पिकः कूजति, शृणु' इत्यादौ शाब्दबोधानुपपत्तिः। कूजनानुकूलव्यापारविशिष्टस्य पिकस्य श्रवणकर्मत्वासम्भवात्। अस्मन्मते तु पिककर्तृककूजनस्य धात्वर्थस्य श्रवणकर्मत्वसम्भवेन नानुपपत्तिः।

(९) एवं 'पचन्तिकल्पं पुरुषाः' इति प्रयोगोऽविप्रतिपन्नः क्रियायाः प्राधान्याङ्गीकार एवोपपद्यते। क्रियायाः प्राधान्याङ्गीकारे कल्पबर्थस्येषदपरिसमाप्तत्वस्य प्रधानीभूतक्रियायामन्वयोपगमेन तस्याश्च लिङ्गसङ्ख्यान्वयायोग्यतया 'कल्प'शब्दस्य 'सामान्ये नपुंसक'मिति क्लीबत्वं, साधुत्वार्थमेकवचनं च युज्यते।

प्रथमान्तार्थस्य प्राधान्ये तु प्रथमान्तार्थस्य कर्तुर्लिङ्गसंख्यान्वययोग्यतया कल्पबुत्तरं पुंस्त्वबहुवचनयोः सम्भवेन 'आचार्यकल्पा द्विजा' इतिवत् पचन्तिकल्पाः पुरुषा इत्यपि स्यात्॥

(१०) एवं प्रथमान्तपदासमभिव्याहारस्थले केवलं "पचती"त्यादौ भावनामुख्यविशेष्यकस्यैव बोधस्य स्वीकरणीयतया मीमांसकमतप्रवेशापत्तिश्च।

तस्मात् प्रथमान्तार्थस्य प्राधान्ये निरुक्तानुपपत्तीनां दुष्परिहरतया धात्वर्थमुख्यविशेष्यकबोध एवाङ्गीकरणीयः॥ इति॥

अत्र ब्रूमः—यत्तावदुक्तं 'भावप्रधानमाख्यात'मिति निरुक्तेन भावशब्दार्थस्य क्रियायां प्राधान्योक्त्या तद्विशेष्यकबोध एव समुचितः। न तु प्रथमान्तार्थमुख्यविशेष्यको बोधः। उपदर्शितग्रन्थविरोधादिति—तन्न, तत्र भावयतीति व्युत्पत्त्या णिच्प्रत्ययान्तभावशब्दस्य कृतिरूपभावनापरतयोपदर्शितनिरुक्तग्रन्थेन चाख्यातार्थेषु संख्या-

वर्तमानकालकृतिषु भावशब्दार्थकृतेरेव धात्वर्थं प्रति प्राधान्यमिति प्रतिपादनेनोपरितननिरुक्तग्रन्थे 'सत्त्वप्रधानानि नामानि' इत्यत्र प्रधानपदस्य वाचकपरतया 'भावप्रधानमाख्यात'मिति निरुक्तग्रन्थस्य 'कृतिवाचकमाख्यात'मित्यर्थकतयाऽस्मदभिमतप्रथमान्तार्थमुख्यविशेष्यकबोधस्योपरिनिरूपितनिरुक्तग्रन्थविरोधलेशासंस्पर्शात् ॥

अथवा—'भावप्रधनमाख्यात'मिति निरुक्तग्रन्थघटको भावशब्दो धात्वर्थपर एवास्तु। तावताऽपि न निरुक्तग्रन्थविरोधः प्रथमान्तार्थमुख्यविशेष्यकबोधस्य। 'भावस्य प्रधानः' इति षष्ठीतत्पुरुषाश्रयणेन भावशब्दार्थधात्वर्थं प्रति आख्यातार्थकृतेर्विशेष्यत्वलाभात् प्रथमान्तार्थमुख्याविशेष्यकबोधमङ्गीकुर्वतां मत एव 'पाकानुकूलकृतिमांश्चैत्र'इति बोधाङ्गीकारेण कृत्यंशेऽनुकूलतासम्बन्धेन प्रकारतयाऽन्वयोपगमेनोपदर्शितनिरुक्तग्रन्थस्यास्मत्समीहितसाधकत्वात्। उत्तरत्रापि 'सत्वप्रधानानि नामानी'त्यत्र प्रधानपदं विशेष्यपरम्। तत्रापि 'सत्त्वानां प्रधानानी'ति षष्ठीतत्पुरुष एवाभिमतः। तत्र सत्त्वशब्देन लिङ्गसंख्यादि विवक्षितम्। तथा च नामानि लिङ्गसंख्यादिकं प्रति विशेष्याणीत्यर्थः। एवञ्चास्मदभिमतार्थस्य निरुक्तग्रन्थानुगुण्यमपि। न च निरुक्तग्रन्थस्यास्माभिः शिक्षयितुमशक्यतया भवदुक्तार्थ एवेति कुतो निश्चीयते? अस्मदभिमतार्थस्वीकारेऽपि क्षतिविरहेणास्मत्समीहितक्रियाप्राधान्यसाधकत्वमेवास्त्विति शंक्यम्। 'भावप्रधानमाख्यात'मिति ग्रन्थस्य धात्वर्थमुख्यविशेष्यकबोधजनकमाख्यातमित्यर्थं स्वीकृत्य अस्याख्यातार्थलक्षणपरत्वे हि भवत्समीहितक्रियाप्राधान्यसिद्धिः स्यात्। सैव न संभवति। अस्याख्यातलक्षणपरत्वे 'काष्ठैः पाकः' इत्यत्राख्यातलक्षणस्यातिव्याप्तिः। तत्र भावकृतां प्रयोगसाधुत्वमात्रार्थकतया 'पच' धातूपस्थाप्यपाकस्यैव तादृशवाक्यजन्यबोधे मुख्यविशेष्यत्वात्।

न च तिङर्थकर्तृनिष्ठप्रकारतानिरूपितधात्वर्थनिष्ठमुख्यविशेष्यताशालिबोधजनकमाख्यातमित्यर्थविवक्षणान्नोक्तस्थलेऽतिव्याप्तिः। 'काष्ठैः पाक' इत्यत्र तिङोऽभावेन तिङर्थकर्तुः 'पच्' धातूपस्थाप्ये पाकेऽप्रकारत्वादिति वाच्यम्। एवमपि 'चैत्रस्य पाक' इत्यादावतिव्याप्तिः स्यात्। चैत्रः पचतीत्यादौ तिङर्थभूतकर्तुरेव 'चैत्रस्य पाक' इत्यादौ षष्ठ्यर्थकर्तृत्वात्।

अथ तिङ्पदजन्योपस्थितिसहकारेण तिङर्थकर्तृनिष्ठप्रकारतानिरूपितधात्वर्थनिष्ठमुख्यविशेष्यताशालिबोधजनकत्वमाख्यातलक्षणमिति ब्रूमः। एवं च 'चैत्रस्य पाक' इत्यादौ धात्वर्थपाके विशेषणीभूतकर्तुः 'चैत्रस्ये'ति षष्ठ्यैवोपस्थापितत्वेन तिङाऽनुप-

स्थापनान्न दोष इति चेत्—एवमपि 'चैत्रः पचति' 'चैत्रस्य पाक' इत्यादिवाक्यजन्यसमूहालम्बनबोधमादाय 'चैत्रस्य पाक' इत्यंशेऽतिव्याप्तिर्दुर्वारैव ।

एवं 'कर्तव्य'मित्यादिनाऽन्यातिव्याप्तिः । एतेन तिङर्थकालप्रकारकसाध्यत्वोपरक्तधात्वर्थमुख्यविशेष्यकबोधजनकत्वमाख्यातलक्षणमित्युक्तावप्यनिस्तारः । 'चैत्रेण पच्यत' इत्यादावतिव्याप्तेः । एवञ्चोपदर्शितदूषणगणेन निरुक्तग्रन्थस्योक्तरीत्याऽऽख्यातलक्षणपरतया व्याख्यानासम्भवेनास्मदुपदर्शितार्थस्यैव निर्दोषस्य स्वीकरणीयतया प्रथमान्तार्थमुख्यविशेष्यकबोधस्योपदर्शितनिरुक्तग्रन्थविरोधासंस्पर्श इति विदाङ्कुर्वन्तु विद्वांसः ॥

(२) यदपि प्रथमान्तार्थस्य प्राधान्ये 'ब्राह्मो विवाह आहूय यत्कन्या दीयते स्वय'मिति स्मृतिवाक्यस्यायोग्यत्वमुपदर्शितम् । तदपि न विचारसहम् । तत्र स्मृतौ विवाहस्याष्टधाविभागकरणेन सामान्यधर्माक्रान्तस्यैव विशेषजिज्ञासया विभागार्हतया निखिलविवाहसाधारणं विवाहत्वं तावत् परिष्करणीयम् । तत्तु न कन्यापितृकर्तृककन्याप्रदानरूपम् । तथात्वे गान्धर्वपैशाचाद्यसाधारण्यात् । येन भवन्मते धात्वर्थभूतकन्याप्रदाने विवाहाभेदस्याबाधितत्वेन योग्यत्वसमर्थनं सङ्गच्छेत । किन्तु सकलविवाहानुगतो वरनिष्ठकन्याप्राप्त्यनुकूलव्यापारविशेष एव विवाहपदप्रवृत्तिनिमित्तमिति वक्तव्यम् । एवञ्च प्रथमान्तार्थस्य प्राधान्यमिति नोक्तस्मृतेरयोग्यत्वम् । तत्र ब्राह्मो विवाह........ इत्यादिवाक्ये 'यदि'ति पदमुपदर्शितवरनिष्ठकन्याप्राप्त्यनुकूलव्यापारपरम् । इत्थं च यन्निरुक्तव्यापारमुद्दिश्य स्वयं कन्या दीयते स च व्यापारो 'ब्राह्मो विवाह' इत्यर्थपर्यवसानेनाध्याहृतप्रथमान्ततच्छब्दोपस्थापितनिरुक्तव्यापारविशेष एव ब्राह्मविवाहाभेदस्य तादृशवाक्यात् प्रत्यायनेन प्रथमान्तार्थप्राधान्ये नोपदर्शितस्मृतेरयोग्यत्वापत्तिरित्यवगन्तव्यम् ॥

(३) यदपि 'जातौ न सत्ते'त्यत्र प्रथमान्तार्थस्य प्राधान्यासम्भव इत्युक्तम्, तदपि तुच्छम् । तत्रापि प्रथमान्तार्थमुख्यविशेष्यकबोधसंभवात् । तथाहि—अत्र सप्तम्यर्थ आधेयत्वम् । तत्र प्रकृत्यर्थजातेर्निरूपितत्वसंबन्धेनान्वयः, नञर्थोऽभावः । तस्मिन् सप्तम्यर्थाधेयतायाः समवायसम्बन्धावच्छिन्नाधेयत्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगितासम्बन्धेनान्वयः । तादृशाभावस्याश्रयतासम्बन्धेन प्रथमान्तार्थसत्तायामन्वयः । एवं च जातिनिरूपिताधेयताया निरुक्तसम्बन्धस्य व्यधिकरणतया तत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावप्रसिद्ध्याऽदोषात् । विशेषरूपेण संसर्गताया अपि

'मासमधीत'इत्यत्र द्वितीयार्थाधिकरणतायां प्रकृत्यर्थतावच्छेदकमासत्वस्य स्वाश्रयचैत्र-कर्तृकाध्ययनाधारतात्वव्याप्यधर्मावच्छिन्नावच्छेद्यतासम्बन्धेनान्वयाभिधानेन भट्टाचार्य-सम्मतत्वात् ॥

(४) यच्च "प्रथमान्तार्थप्राधान्ये 'कः स्तूयत' इति प्रश्ने 'स्तोत्रं हरेरेवे-त्यस्योत्तरत्वं न स्यादि"ति—तदप्यकिंचित्करम्। 'कः कुलीन' इति प्रश्ने 'यस्य धन'मित्यस्याप्यसमानविशेष्यकबोधजनकस्य वाक्यस्य प्रश्ननिवारकत्वानुभवेन प्रश्नोत्तर-वाक्ययोः समानविशेष्यकबोधजनकत्वनियमे मानाभावात्। अन्यथा धात्वर्थप्राधा-न्यवादिनां वैयाकरणानामपि मते "कश्चैत्र" इति प्रश्ने 'यः पाचक' इतिवत् 'यः पच-ती'त्यस्यापि प्रश्ननिवर्तकत्वेनोत्तरवाक्यत्वेन सर्वसंप्रतिपन्नस्योत्तरवाक्यत्वं न स्यात्। तन्मते 'यः पचती'त्यनेन'यत्कर्तृकाभिन्नः पाक' इति क्रियाविशेष्यकस्यैव बोधस्याङ्गीकृ-ततया 'कश्चैत्र' इति प्रश्नवाक्यजन्यबोधासमानविशेष्यकत्वात्। तस्मात्—क्रिया-प्राधान्यवादिभिरपि प्रश्नोत्तरवाक्ययोः समानविशेष्यकबोधजनकत्वनियमस्याङ्गीकर्तुम-शक्यतयाऽस्मन्मतेऽपि तथात्वसंभवेनादोषात् ॥

(५) यदपि— 'पश्य, मृगो धावती'त्यत्र प्रथमान्तार्थस्य प्राधान्ये एकवाक्यत्वानुपपत्तिरित्युक्तं तदपि न सङ्गतम्। तत्रापि धावनानुकूलकृतेः कृतिवि-शिष्टस्य मृगस्य कर्मतासम्बन्धेन 'दृशू' धात्वर्थेऽन्वयसंभवात्। न च नामार्थधात्वर्थयोः साक्षाद्भेदसम्बन्धेनान्वयबोधस्याव्युत्पन्नत्वात् नोक्तमुपपन्नमिति वाच्यम्। नामार्थधा-त्वर्थयोरपि साक्षाद्भेदसम्बन्धेनान्वयबोधस्य 'काष्ठं भस्म भवति' 'घटो नीलो भवति' इत्यदावुत्पत्तिप्रयोजकनाशप्रतियोगित्वरूपधात्वर्थभवने आधेयतात्मककर्तृतासम्बन्धेन काष्ठादेरन्वयदर्शनेन व्युत्पत्तिवैचित्र्यात् प्रकृतेऽपि मृगस्य कर्मतासंबन्धेनान्वये बाधका-भावात्। प्रातिपदिकार्थविशेष्यतया कर्मत्वविवक्षायामेव 'कर्मणि द्वितीये'त्यादिना द्वितीयायाः साधुतया, प्रकृते च कर्मतायाः संसर्गत्वविवक्षणादेव न मृगपदोत्तरं द्वितीयाप्रसक्तिः। अन्यथा काष्ठादिपदोत्तरमपि द्वितीयापत्तेः। अत एव 'अर्घो नम' इत्यत्र नमःपदार्थत्यागेऽर्घस्य कर्मतासम्बन्धेनान्वयाङ्गीकारादेव नार्घपदोत्तरं द्वितीया-प्रसक्तिः। न च—धात्वर्थे नामार्थस्य साक्षाद्भेदसम्बन्धेनान्वये तण्डुलादेरपि कर्मता-सम्बन्धेन पाकादावन्वयसम्भवेन 'तण्डुलः पचती'ति प्रयोगापत्तिरिति शङ्कायाः किमु-त्तरमिति वाच्यम्, आख्यातार्थाविशेषितनामार्थधात्वर्थयोरेव साक्षाद्भेदसम्बन्धेना-

न्वयबोधस्याव्युत्पन्नत्वमिति नियमपर्यवसानाभ्युपगमेन 'तण्डुलः पचती'ति प्रयोगवारणस्य, 'पश्य मृगो धावती'ति प्रयोगोपपत्तेश्च सुकरत्वात्।

अथ धावनानुकूलकृतिविशिष्टमृगस्य कर्मतासम्बन्धेनान्वयाङ्गीकारे पाकानुकूलकृतिविशिष्टचैत्रप्रतियोगिकसादृश्यान्वयबोधतात्पर्येण 'पचति चैत्र इवाय'मिति प्रयोगाभावात् इतरविशेषणविशेषणतयाऽऽख्यातार्थभानस्याव्युत्पन्नताया अवयवग्रन्थे प्रतिज्ञालक्षणे प्रतिपादनेन प्रकृते धावनानुकूलकृतेराख्यातार्थस्य धात्वर्थदर्शनाविशेषणमृगविशेषणतया कथं भानमिति शङ्का दुरुद्धरेति चेत्— 'पश्य मृगो धावति' इति फणिभाष्याभिमतप्रयोगानिर्वाहाय, "पचति चैत्र इवाय" मिति प्रयोगपरिहाराय च धात्वर्थातिरिक्तविशेषणतावच्छेदकतयाऽऽख्यातार्थभानस्याव्युत्पन्नत्वमिति व्युत्पत्तिसंकोचेनादोषात्। 'पश्य मृगो धावती'ति वाक्योत्तरं कर्मत्वोपस्थापकं "इति"पदमध्याहृत्य वाक्यार्थकर्मकान्वयबोधं ब्रूमः। निपातातिरिक्तनामार्थयोरेव भेदसंम्बन्धेनान्वयबोधस्याव्युत्पन्नतया प्रकृते निपातभूतेतिपदोपात्तकर्मत्वे वाक्यार्थभूतस्य धावनानुकूलकृतिविशिष्टमृगस्याधेयतासम्बन्धेनान्वये, एवं निपातातिरिक्तधात्वर्थनामार्थयोरेव भेदसम्बन्धेनान्वयबोधस्याव्युत्पन्नतया 'इति' पदोपस्थाप्यकर्मत्वस्य निरूपकतासम्बन्धेन धात्वर्थदर्शने चान्वये, बाधकाभावात् ॥

(क्रमशः)

# किमपि विमर्शनम् ।

( पूर्वतोऽनुवृत्तम् )

(Mahopadhyaya, S. NEELAKANTA SASTRY.)

अतः शरीर उपस्कृतेऽप्यात्मन एवोपकारः, आत्मन्युपस्कृतेऽपि तत्तच्छरीरावच्छेदेनानुभवश्च सङ्गच्छते । यत्र तु विद्यमानमपि नागरिकाङ्गनालावण्यं ग्रामीणालंकारा न भूषयन्ति, तथा विद्यमानं रसं तद्विपरीतवर्णरचनादयो नोपकुर्वन्ति । किञ्च स्वाभाविकमेव सौन्दर्यं गुणादिविशिष्टं चमत्कारकम् । तत्तु विनाऽप्यलंकारं सर्वान् प्रीणयति । तथा माधुर्यादिगुणविशिष्टा रसादयो व्यङ्ग्यार्थाः स्वयं शोभन्ते । तदनुकूला अलंकाराश्च यदि सन्ति तर्हि हेम्नः परमामोदः । अतो व्यङ्ग्यरहितं काव्यं न हृद्यम् । 'अव्यङ्ग्यं त्ववरं स्मृत'मित्यत्राव्यङ्ग्यशब्दप्रयोगस्तु 'अनुदरा कन्ये'त्यादिवदीषदर्थे नञोपपादनीयः । अव्यङ्ग्यं स्फुटप्रतीयमानार्थरहितमिति यावत् ।

एवं च काव्ये वाच्यार्थस्य व्यङ्ग्यार्थस्य चोपस्कारका अलङ्कारा इति सिद्धम् ॥

"उपमैका शैलूषी
संप्राप्ता चित्रभूमिकाभेदात् ।
रञ्जयति काव्यरङ्गे
नृत्यन्ती तद्विदां चेतः" ॥

इति वचनेन अनेकालङ्कारमूलभूतोपमा किञ्चिन्निरूप्यते ।

"सादृश्यं सुन्दरं वाक्यार्थोपस्कारकं उपमालंकृतिः" । अनन्वये स्वसादृश्यसत्वेऽपि द्वितीयसब्रह्मचारिव्यवच्छेदफलकवर्णनविषयीभूतस्य तस्य तत्र प्रतिष्ठानाभावान्नातिव्याप्तिः । कल्पितमपि सादृश्यं चमत्कारकं उपमालङ्कारो भवति ।

यस्य तुलामधिरोहसि
लोकोत्तरवर्णपरिमलोद्गारैः ।
कुसुमकुलतिलक ! चम्पक !
न वयं तं जातु जानीमः ॥

यस्य तुलामधिरोहसि न तं वयं जानीम इत्यनेनास्माकमसर्वज्ञत्वादस्मदगोचरः कोऽपि तवोपमानं भविष्यतीति सादृश्यपर्यवसानादुपमानद्वैतैवेयमुपमा ।

वाणी सुधेव मधुरा, ज्योत्स्नेवात्यन्तनिर्मला कीर्तिः, ।
मतिरपि जलधिगभीरा, यस्य स चैत्रक्ष्मापतिर्जीयात् ॥

अत्र माधुर्यादिना वाण्यादेः सुधादिसादृश्यं सुन्दरं वाक्यार्थोपस्कारकं उपमालङ्कारः ॥ अस्याश्च राजस्तुत्युत्कर्षकत्वात् चमत्कृतिजनकत्वम् ।

अत्रोपमालक्षणं बहवो बहुधा वदन्ति । विद्यानाथस्तु—

स्वतः सिद्धेन भिन्नेन सम्मतेन च धर्मतः ।
साम्यमन्येन वर्ण्यस्य वाच्यं चेदेकदोपमा ॥ इति लक्षयति ।

अप्पय्यदीक्षितास्तु एतल्लक्षणे सर्वाणि विशेषणानि दूषयन्ति । तत्र वाच्यत्वविशेषणस्य वैयर्थ्यमेवं समर्थयन्ति । व्यङ्ग्योपमानिरासार्थं हि वाच्यत्वमावश्यकम् । तथा सति—

त्वदाननमधीराक्षमाविर्दशनदीधिति ।
भ्रमद्भृङ्गमिवालक्ष्यकेसरं भाति पङ्कजम् ।

अत्र'अधीराक्षं' 'आविर्दशनदीधिति' त्वदाननं भ्रमद्भृङ्गमालक्ष्यकेसरं पङ्कजमिवेति विशिष्टोपमयाऽऽक्षिप्तविशेषणोपमायां सादृश्यस्य वाच्यत्वाभावात् अव्याप्तिरिति । स्वयमपि तैरुक्तम्—

'उपमितिक्रियानिष्पत्तिमत्सादृश्यवर्णनमदुष्टमव्यङ्ग्यमुपमालङ्कारः' इति ।

तत्र वर्णनं नाम 'ज्ञायमानः शब्दः, शब्दज्ञानं वा । आद्ये शब्दस्य शब्दवाच्यत्वाभावात्, द्वितीये ज्ञानस्य सर्वथा वाच्यत्वस्यैवाभावात् उपमाया वाच्यालङ्कारत्वमेव न स्यात् । इत्थं च शब्दस्य शब्दज्ञानस्य वोपमात्वं न घटते । किञ्च तस्य सर्वथैव व्यङ्ग्यत्वाभावात् अव्यङ्ग्यत्वविशेषणं व्यर्थम् । यदि तु वर्णनविषयीभूतं सादृश्यमुपमेत्युच्यते तदा 'गौरिव गवय' इत्यत्रातिव्याप्तिः । तद्वारणार्थं चमत्कारित्वं लक्षणे निवेश्यते चेत् तेनैव गतार्थत्वेऽन्येषां विशेषणानां वैयर्थ्यं दुष्परिहरमेव । एवं—

स्तनाभोगे पतन् भाति कपोलात्कुटिलोऽलकः ।
शशाङ्कबिम्बतो मेरौ लम्बमान इवोरगः ॥

इत्यत्रोपमानोपमेयसादृश्यस्वरूपादतिरिक्तः कश्चिद्वाक्यार्थो नास्ति। अतः अन्योपस्कारकत्वरूपालङ्कारसामान्यलक्षणानाक्रान्तेऽत्रोपमितिक्रियानिष्पत्तिमत्सादृश्यवर्णनस्या–दुष्टाव्यङ्ग्यस्य सत्वादतिव्याप्तिः॥ अस्या अपि यदि लक्ष्यत्वमुच्यते तर्हि अनलङ्कारस्यालङ्कारत्वेऽङ्गीक्रियमाणे वाक्यार्थोपस्कारकत्वेनालंकारभूताया व्यङ्ग्योपमाया निवारणप्रयासः किंनिबन्धनः?। "अलङ्कारभूतोपमालक्षणं तु" इति स्वयं निर्दिश्यते च॥

ननु अन्योपस्कारकोऽलङ्कारः वस्तु रसादिकं वोपस्करोतीति न्याय्यम्। अलंकारभूतः कश्चित् अलंकारान्तरेण कथमुपस्कार्य इत्युच्यते?— इतिचेत्—अत्रोच्यते। रसादिर्यदा व्यङ्ग्यो भवति, तदा व्यङ्ग्यार्थस्य वाच्यार्थापेक्षया प्राधान्यमाश्रित्य यथोपस्कार्यत्वम् तथा अलंकारस्योपमादेर्ध्वन्यमानतायां उपस्कार्यत्वमविरुद्धम्॥

इयञ्चोपमा वाच्या लक्ष्या व्यंग्याऽपि दृश्यते। 'यथेवा'दिशब्दैः प्रतिपादिता वाच्या। सोदरादिशब्दप्रयोगे लक्ष्या। व्यङ्ग्या यथा—

अद्वितीयं रुचाऽऽत्मानं मत्वा किं चन्द्र! हृष्यसि।<br>
भूमण्डलमिदं मूढ! केन वा विनिभालितम्॥

कस्यचिद्विदेशस्थितस्य किरणैरात्मानं सन्तापयन्तं चन्द्रं प्रत्येषोक्तिः। अत्र च अस्ति मम प्रियायाः कदाऽपि बहिरनिर्गतायाः अत एव त्वयाऽप्यदृष्टाया आननं त्वत्सदृशं इत्युपमा व्यज्यते। मूढपदेन चासूयाख्यो भावः प्रतीयते। तत्रासूयायामुपस्कारिकेयं ध्वन्यमानोपमा। एवं सति अव्यङ्ग्यत्वविशेषणं निष्फलम्। व्यङ्ग्योपमाया अपि अलङ्कुर्वाणगतधर्मनिबन्धनस्यालंकारत्वस्यानपायात्। केनचिद्वस्तुनाऽलंकारेण वा कश्चिदलङ्कारो व्यज्यत इति व्यङ्ग्यत्वेनालंकारत्वं न हीयते। तयोर्विरोधाभावात्।

वस्तुतस्तु प्रधानत्वालंकारत्वयोर्विरोधोऽस्ति। अतः उपमायाः प्राधान्येनालंकार्याया अलंकारभूतोपमालक्षणं माऽतिप्रसाङ्क्षीदितिचेत्—तथाप्युपस्कारकत्वेनैव विशेषणीयं, नत्वव्यङ्ग्यत्वेन। एवं च व्यङ्ग्या अप्यलंकारा वाक्यार्थोपस्कारकाश्चेत् अलंकारभावं भजन्ते इति सिद्धम्।

अत्रेदमवधेयम्—विद्यानाथकृतोपमालक्षणे वाच्यत्वविशेषणं प्रत्याचक्षाणा दीक्षितेन्द्रा विशिष्टोपमास्थले व्यङ्ग्यानां विशेषणोपमानां सङ्ग्रहमभिलषन्तीति प्रतिभाति। स्वकीयलक्षणेऽव्यङ्ग्यत्वविशेषिते कथं विशेषणोपमानां सङ्ग्रहः?।

अत्र पण्डितराजस्यायमाशयः—वाक्यार्थोपस्कारकत्वमलंकारलक्षणमित्यनेन सिद्धार्थोपस्कारकाणामेव तत्त्वमङ्गीक्रियते। एवं सति विशिष्टोपमास्थले विशेषणोपमानां वाच्यसिद्ध्यङ्गत्वेन गुणीभूतव्यङ्ग्यत्वम्। इत्थं च प्राधान्येन गुणीभावेन च यत्रालंकारास्तत्र प्रथमे उपस्कारकत्वाभावात् द्वितीये च सिद्धार्थोपस्कारकत्वाभावान्नालंकारत्वमिति। नागेशभट्टस्तु दीक्षिताशयमेवमाविष्करोति। अव्यंग्यमित्यनेन प्राधान्येनाव्यंग्यत्वं विवक्षितम्। अतः प्राधान्येन ध्वन्यमानतायां अलंकार्ये तत्र नातिव्याप्तिः। विशिष्टोपमाया उपस्कारिकायां विशेषणोपमायां व्यंग्यस्य तस्य प्राधान्येनाव्यंग्यत्वमस्तीति नाव्याप्तिश्चेति।

वाच्यत्वविशेषणन्तु अलंकारं शब्दार्थोभयगतत्वेन त्रिभज्य तदनुसारेण वाच्यालंकारलिलक्षयिषया कृतं भाति। तैरपि व्यङ्ग्योऽर्थः वस्त्वलंकाररसादिरूप इति अङ्गीकृतम्। तथा च व्यंग्यत्वालंकारत्वयोर्विरोधो नास्तीति फलितम्। एवं च यदा वाच्यं सादृश्यं तदोपमालंकारो वाच्य इति। यदा तु व्यंग्यत्वेन प्राधान्यं भजते तदा उपमादिरलंकारः प्रधानतया ध्वनिव्यपदेशमर्हति। तावता ध्वन्यमानतादशायामपि अलंकारत्वं न हीयते। अत एवालंकारध्वनिरितिव्यपदेशोऽपि सङ्गच्छते। अलंकुर्वाणलक्षणाक्रान्तोऽपि यदि गम्यस्तदा प्राधान्यमपि भजते।

यदि च तदवस्थायां वाक्यार्थोपस्कारकत्वाभावात्तस्यासङ्ग्रह इत्युच्यते तर्हि—

निजोदयाविनाभूतप्रभया रञ्जयन्महीम्।
मृदुलैश्च करैश्चैत्रो राजा विजयतेतराम्॥

अत्र राजवर्णने प्रस्तुते प्रकरणेन शक्तिसंकोचे शब्दशक्तिमूलव्यञ्जनया प्रतीयमानस्य चन्द्ररूपार्थस्याप्रस्तुतस्याभिधानं मा भूदिति प्रकृताप्रकृतयोः राजचन्द्रयोरुपमालङ्कारो व्यज्यते। अत्र प्राधान्येनोपमाया व्यङ्ग्यत्वेऽपि वर्णनविषयस्य राज्ञ उत्कर्षाधायकत्वात् अलङ्कारत्वमविरुद्धम्।

एवं वाच्यभूतालङ्कारमात्रं लक्षयद्भिरपि व्यङ्ग्यालङ्कारस्य ततो वैलक्षण्यं पृथग्लक्षणं च नाङ्गीक्रियते। अतोऽलङ्कारसामान्यलक्षणाक्रान्ताः सर्वेऽपि वाच्यतादशायां वाच्यालङ्कारा इति व्यपदिश्यन्ते। तेषामेव ध्वन्यमानतादशायां अलङ्कार्यत्वेऽपि अलङ्कारत्वं न हीयत इति सर्वं समञ्जसम्॥

(क्रमशः)

# किञ्चिदुत्कीर्त्तनम् ।

(अनुवादः)

(एन्. पि. पणिक्कर्.)

कृपापूतैर्बाह्यान्तरगुणभरैरस्य जगतो
हृदाकर्षी, हर्षी, व्याकुरुत भवान् कर्म निखिलम् ।
सदाऽनन्दी हृन्दि प्रशमितमतीनामपि हरन्
न कस्य प्रेमाब्धिर्भवति हि भवान् भाग्यजलधे ! ॥ १ ॥

धनार्थं धन्यात्मप्रकृति महता वाऽत्रयशसे
त्वया नादत्तं तद्विरुदमथवौद्योगिकपदम् ।
वसुं विद्यां ख्यातिं मतिमपि परार्थं हि कलयन्
सदाजुष्टः शिष्टैरनयत दिनान्यत्र हि भवान् ! ॥ २ ॥

यथावत्साधूनां निजसविधभाजां सुमनसां
तथावद् दृप्तानां प्रलपनपराणामपि नृणाम् ।
क्व वाहो ! साहित्यप्रणयिपशुपानां च भगवान्
स्वकीयान् सर्वानप्युरुतमसि सन्त्यज्य गतवान् ॥ ३ ॥

न किञ्चिद्व्यादिष्टं किमपि न मया ज्ञापितमहो !
न किञ्चिद्व्यामुग्धं, किमपि न मया याचितमपि ।
तदेतत् सर्वं तद्विकचितहृदाऽवेद्य कृतवा-
नदन्मत्साहित्यं पृथुकमनघः "कृष्णभगवान्" ॥ ४ ॥

भवन्तं गेहस्थं सपदि परितः संस्थितवतां
जनानां सर्वेषां श्रवणसुखसन्धाननिपुणम् ।
त्वदुद्भूतं 'गोपी'त्यनुगतनयाह्वाननिनदं
कदा वा श्रोष्येऽहं निरवधिकवात्सल्यभरितम् ॥ ५ ॥

अयं बन्धुः शिष्टः, खलमतिरयं शत्रुरिति वा
विचारो नाविन्दत्तव हृदयमानन्दविकचम् ।
धनी वा भिक्षुर्वा भवतु जडधीस्सुप्रचितधी-
स्सुधीर्वा सर्वेऽपि प्रथितगुण! ते सन्ति सदृशाः ॥ ६ ॥

यदा त्वत्साहित्यं श्रुतिसुखदसंगीतमधुरं
सतामादित्सूनां विस्मरविचारामृतरसम् ।
समन्तादश्रौषं दिनमनु, तदा संभृतमहो
मदानन्दं मातुं प्रभवति न कोऽपि क्षितितले ॥ ७ ॥

सदर्थप्रख्येन प्रवचनमाहिम्नाऽत्र भवता-
मुपासीनास्सर्वे सपदि समभूवन् कृतधियः ।
अनेयोऽन्यैरुद्यत्फलवितरणः सर्वदमनः
प्रभावः कोऽप्यासीत् सहजनितया ते सुकृतिनः ॥ ८ ॥

यदिष्टं तत् सर्वं वशगमपि हा! तत्र भवत-
स्तदामर्शी,भावः क्वचन न मयाऽदर्शि भवति ।
इदं तावत्तथ्यं; स्खलति बहुधा रिक्तविभवो
न कश्चित्तत्वज्ञो विभवसुमहीयान् विकुरुते ॥ ९ ॥

किमुद्यत्कायश्रीर्जयति भवतश्चित्तमहिमा-
मुत त्वच्चेतःश्रीर्जयति भवतः कायसुषमाम् ।
इति त्वां पश्यन् कः शमगुण! न शंकेत भुवने
कदा वा पश्येयं मुहुरपि भवन्मोहनमुखम् ॥ १० ॥

(क्रमशः)

# ज्योतिषं केरलाश्च ।

Jyothisha Mahopadhyaya

K. PADMANABHA PILLAI SASTRI,

(S. M. V. School, Trivandrum)

पुरातनादारभ्य कालात् केरला ज्योतिश्शास्त्रविषयेऽतीव प्रसिद्धाः । उत्तरे दक्षिणे च भारतदेशे स्थिता बहवो जनाः प्रश्नविषये, जातकविषये च फलज्ञानार्थं केरलानाजग्मुः । सर्वे च तेऽत्रत्यानां ज्योतिर्विदां प्रत्यक्षदृष्टमिव फलादेशसामर्थ्यं दृष्ट्वा अद्भुतपरवशा बभूवुः । अधुनापि प्रश्ने जातके च केरलीयानां प्रथा इतरानपेक्ष्य किंचिदिव प्रशस्ततरैव वर्तते ।

9848

तत्र च किं वा कारणमिति पश्यामः । मन्ये तेषां गणितस्य सूक्ष्मतैव तत्र कारणमिति । सम्प्रत्यपि विना केरलानितरेषु देशेषु तत्रत्यैः परहित एव प्रकारान्तरेणोच्यमाने स्मृतिकालीन एव ग्रहगणितमार्गः स्वीक्रियते । कथं वा तादृशीं गणितरीतिमवलम्बमानानां फलादेशो दृग्दृष्टग्रहस्फुटानामिव प्रस्पष्टं भवति ? ।

इदानीन्तनाः सर्वेऽपि गणितमार्गाः प्रायश आर्यभटीयां रीतिमवलम्ब्य प्रवृत्ताः । आर्यभटीयं च,

"षष्ट्यब्दानां षष्टि-
यदा व्यतीतास्त्रयश्च युगपादाः ।
त्र्यधिका विंशतिरब्दा-
स्तदेह मम जन्मनोऽतीताः ॥"

इत्यार्यभटीयान्तर्गतकालक्रियापादगतदशमसूत्राद् ३६०० तमे कलिवर्षे प्रणीतमिति ज्ञायते । किन्त्वस्य सूत्रस्य व्याख्याने सन्ति केचित् पक्षभेदाः ।

तथा च नीलकण्ठीयभाष्ये,

"मयेदानीमेतस्मिन् ग्रन्थे क्रियमाणे कलेरारभ्य षष्ट्यब्दानां षष्टिर्गता । त्रयोविंशतिवयस्केन मया ग्रन्थः क्रियते च ।" इमां भाष्यरीतिमनुसृत्य ३५७७ तमः

कलिवर्षं आर्यभटाचार्यस्य जननकाल इति, ३६०० तमः कलिवर्षः शास्त्रप्रणयनकाल इति चावगम्यते ।

घटीगोपस्त्वाचार्यः—

"यदा षष्ट्यब्दानां षष्टिः, त्रयो युगपादाश्च व्यतीताः, तदा प्रसूतस्य मम जन्मन आरभ्य इह शास्त्रनिर्माणकाले त्र्यधिका विंशतिरब्दा अतीताः।" इति व्याख्यां करोति । करणपद्धतीकारश्चैतामेव व्याख्यामवलम्बते । गिरितुंग, गोत्रोत्तुङ्ग इति चाक्षरसंख्यया इमामेव सङ्ख्यामसकृद् आदत्ते । तदिदमेव मनसिकृत्यायं—

'वाग्भावोनाच्छकाब्दाद्' इति करणपरिष्करणाय प्रवृत्तवान्। एवं चार्यभटीयप्रणयनकालादारभ्याद्य १४४१ अथवा १४१८ वत्सरा गताः। एतद्ग्रन्थोक्तभगणपरिध्यादिना आनीयमानं ग्रहस्फुटमेवेदानीं परहितं संवृत्तम् । महतानेन कालेन ग्रहण-ग्रहयोगादिषु प्रत्यक्षपरीक्षणं कृत्वा तदनुगुणसंस्कारकरणाभावादियमेव परहिता गणितरीतिः परदेशेष्विदानीमपि वर्तते । तस्मादेव सा फलादेशाय न प्रगल्भते च ।

किंच सिद्धान्तशिरोमणिकर्तुर्भास्कराचार्यादनन्तरं उत्तरे च भारतदेशे ज्योतिश्शास्त्रस्य गणनीया काचिदभिवृद्धिर्न संजाता । वैदिकमार्गजुषां हैन्दवानां राज्ञामधःपतनं, अवैदिकानां महम्मदीयानां राज्ञां भरणं च तत्र कारणं स्यादिति मन्ये । किं च औत्तराहैः पण्डितैः कृता आर्यभटीयस्य काचिदपि व्याख्या नोपलभ्यते । केरलीयैः कृताः सन्ति बह्वयः । ते पुनर्वैदिके कर्मणि कृतादराः, पूर्वमीमांसायामपि कृतबहुश्रमाः पण्डिता आर्यभटीयं तन्त्रं सम्यग् ज्ञात्वा तद्रीत्या आनीयमानस्य ग्रहस्फुटस्य दृग्विसंवादं चावगम्य गोलपादोक्तरीत्या संस्करणमकुर्वन् । तेषां मध्ये अश्वत्थग्रामजो (ആലത്തൂർ) भार्गवः परमेश्वरोऽस्माकं सविशेषां कृतज्ञतामर्हति । तदिदं च तत्त्वं,

"परमेश्वरस्तु रुद्र-परमेश्वरात्मजनारायण-माधवादिभ्यो गोलविद्भ्यो गणितगोलयुक्तीरपि बाल्य एव सम्यग् गृहीत्वा तेभ्य एव क्रियमाणप्रयोगस्य दृग्विसंवादं, तत्कारणं चावधार्य, शास्त्राण्यपि बहून्यालोच्य, पञ्चपञ्चाशद् वर्षकालं निरीक्ष्य, ग्रहणग्रहयोगादिषु परीक्ष्य समदृग्गणितं करणं चकार।" इति,

अन्यत्र च—

"परमेश्वराचार्येण पुनर्ग्रहणग्रहयोगादिकं यन्त्रैः पञ्चपञ्चाशद्वर्षकालं यावत् सम्यक् परीक्षितम् ।

आह चैवम्—

ग्रहेन्द्राः पञ्चपञ्चाशद्वर्षकालषडन्तरे इत्यादि। तस्य गोलवित्तमत्वं च गोलदीपिकादिभिस्तत्कृतैः प्रबन्धविशेषैर्ज्ञायते। अतोऽन्येषां करणानां स्वस्वकाले यावत् सूक्ष्मत्वं ततोऽप्येतत्कृतस्य दृग्गणिताख्यस्य सूक्ष्मत्वमुपपद्यते। अपि च परमेश्वरोक्ताक्षमन्दोच्चपरिध्यादीनां आर्यभटोक्तेभ्यः सूक्ष्मत्वं इदानीमपि ग्रहण–ग्रहयोगादिष्वस्माभिर्ज्ञायते।

इति च परमेश्वरपुत्रश्रीदामोदरात्तज्योतिषामयनेन **श्रीनीलकण्ठेन** कृताद् आर्यभटीयभाष्याद् ज्ञायते।

दृग्गणितं च,

"एवं **दृग्गणितं** शाके त्रीषुविश्वमिते कृतम्। (१३५३)
परमादीश्वरेणैतद् प्रायो भवति दृक्समम्॥"

इति दृग्गणितान्तर्गताद् वाक्याद् परमेश्वराचार्येण **१३५३** तमे शकाब्दे अथवा ४५३२ तमे कलिवर्षे, अथवा ६०६ तमे कोलम्बाब्दे कृतमिति सिद्ध्यति।

एवं महता प्रयत्नेन प्रणीतं तु दृग्गणितं नाद्यावधि सूर्यालोकतां नीतम् इतीदमस्माकमतीव विषादास्पदं किमपि दुर्दैवविलसितमित्यत्र नास्ति सन्देहलेशोऽपि। परमेश्वराचार्यशिष्यपरम्परया विना गोलयुक्तिं, केवलं ग्रहगणितक्रियार्थं निर्मिताभिर्ग्रन्थपरम्पराभिः दृग्गणितान्तर्गता क्रियापरिपाटिरद्यतनकालपर्यन्तं केरले सजीवा वर्तते। किं च दृग्गणितनिर्माणकालाद् अनन्तरं इदानीं ५०९ वत्सरा गताः। वर्षाणां पञ्चशतकं यावद् ग्रहपरीक्षणाभावादस्त्येव काचिन्न्यूनतास्माकं ग्रहस्फुटेषु। तत्परिष्करणं च इदानीन्तनानां ज्योतिश्शास्त्रविदां कृत्यम्। तदपि दृष्टे दृग्गणिततन्त्रे सुकरं भवेद्। दृग्गणितात् तन्त्रात् परश्शतानि पद्यानि सन्त्युद्धृतान्यार्यभटीयस्य गोलपादव्याख्यानरूपे परमेश्वरपुत्रशिष्यकृते नीलकण्ठीयभाष्ये। तद्दर्शनादपि दृग्गणितं नाद्यावध्युपलब्धं प्रकाशितं चेति स्पष्टं भवति।

एवं तदनन्तरसंजातानां गणितग्रन्थानां मूलभूतं करणपरिष्करणमार्गप्रतिपादकं, केरलानां यशोवैजयन्त्या आधारभूतं दृग्गणितं तन्त्रं अत्रत्यानां ज्योतिर्विदां सविशेषां गवेषणादृष्टिमर्हति। तत्प्रसिद्धीकरणं चास्माकं मुख्यं कृत्यम्। अस्मिंश्च विषयेऽत्रत्यपौरस्त्यग्रन्थप्रसिद्धीकरणशालाधिकृतानां समुचितां दयादृष्टिमभ्यर्थयन् सम्प्रति प्रस्तुतमुपन्यासमुपसंहरामि॥

# ॥ भगवान् कणादस्तदीयसंस्कारश्च ॥

V. RAMA SARMA,

Nyaya Meemamsa Mahopadhyaya.

परमं हि भागधेयमिदमस्माकं समेषां भारतीयानां यन्मन्त्रब्राह्मणोपनिषदात्मकाद् वेदपयोनिधेर्निखिलपदार्थतत्त्वामृतमाकण्ठमुपभुञ्ज्महेऽनुदिनम्। लोकक्षेमैकतानाः परमकारुणिकाः प्राचीनाः केचन महर्षयः श्रुतिरत्नाकराद् विविधानि पदार्थतत्त्वरत्नान्युद्धृत्य स्वशेमुषीशाणोपलेषूल्लिख्य तया तत्त्वरत्नमालया भारतजननीमलमकार्षुः। प्रत्नाः प्रदीप्राश्च ते तत्त्वचिन्मणयः सूत्रेषु सङ्ग्रथिताः तत्तद्रत्नभाण्डागारेषु संरक्षिताः सर्वदा प्रस्फुरन्तीति महदिदं मोदस्थानं नः। तत्तादृशेषु विज्ञानरत्नकोशेष्वद्वितीयामार्हन्तीमर्हन्ति खलु षड् दर्शनानि। तत्र लौकिकालौकिकफलोपयोगिनिखिलवस्तुतत्त्वाविष्करणे प्राचीनतायाश्चाग्रिमं पदमधिरोहति वैशेषिकं नाम दर्शनम्।

दर्शनञ्चेदं लोकानुग्रहतत्परः परमकारुणिको भगवान् कणादमहर्षिर्व्यरचयदिति सुविदितोऽयं विषयः। तापसोऽसावुञ्छवृत्त्या समार्जितान् धान्यकणानदित्वा स्वजीविकां निनायेत्यतः, कणानां परमाण्वात्मकानां वादगोष्ठ्यामादानाद्वा कणाद इति प्रथामवापेति किमप्यैतिह्यञ्च वरीवर्त्ति। "विरुद्धासिद्धसन्दिग्धमलिङ्गं काश्यपोऽब्रवीत्" इत्यादावस्यैव कणादस्य काश्यपत्वेनाप्युल्लेखो दृश्यते।

"[१]सप्तविंशे समायाते परिवर्त्ते क्रमागते।
जातुकर्णो यदा व्यासो भविष्यति तपोधनः॥

तदाहं सम्भविष्यामि सोमशर्मा द्विजोत्तमः।
प्रभासतीर्थमासाद्य योगात्मा लोकविश्रुतः॥

---

(१) ब्रह्माण्डपुराणान्तर्गतवायुपुराणे त्रयोविंशेऽध्याये पद्यानीमानि समुपलभ्यन्ते।

तत्रापि मम ते पुत्रा भविष्यन्ति तपोधनाः ।
अक्षपादः कणादश्च उलूको[२] वत्स एव च ॥

पद्यैरेभिः शिवावतारभूतस्य सोमशर्मणो द्विजोत्तमस्य सूनुरयं कणादः प्रभासतीर्थं स्वजनुषा परिपावयामासेत्यवगम्यते । प्रभासतीर्थमिदं च—

"स्त्रियो बालाश्च वृद्धाश्च शंखोद्धारं व्रजन्त्वितः ।
वयं प्रभासं यास्यामो यत्र प्रत्यक्सरस्वती" ॥

इति भागवतद्वितीयस्कन्धत्रिंशाध्यायस्थपद्यानुसारेण कात्यवारदेशे (Kathiawar) प्रवहन्त्याः सरस्वतीनद्याः पश्चिमं तीरमिति निर्विवादम् ।

मालिनीमभितो राजन् नदीं पुण्यां सुखोदकाम् ।
तस्यास्तीरे भगवतः काश्यपस्य महात्मनः ॥

आश्रमप्रवरं रम्यं महर्षिगणसेवितम् ।

इत्यादि महाभारतादिपर्वपद्यानुरोधेन, सर्वदर्शनसङ्ग्रहादौ वैशेषिकदर्शनस्यौलूक्यदर्शनतया स्मरणेन च कश्यपगोत्रोद्भवो नाम्नोलूकश्चायं तापसो वृत्त्या मतस्थापनेन वा कणादः, कणभोजी, कणभक्ष इत्यादि लब्धबहुपनामा प्रभासतीर्थे लब्धजन्माप्यनुमालिनीतीरं रम्ये कस्मिंश्चिदाश्रमप्रदेशे नियममनुतिष्ठन् तापत्रयपराहतान् स्वशिष्यान् लोकांश्च सर्वाननुजिघृक्षुर्वैशेषिकं नाम किमपि तन्त्रं प्रणिनायेति शक्यं निगमयितुम् । दर्शनस्यास्यान्वर्थता च निरवयवानां जगदारम्भकपरमाणूनां परस्परभेदसाधकस्य स्वतो व्यावर्तकस्य विशेषाह्वयस्य नूतनस्य कस्यचन पदार्थस्य स्वीकारात् सुसाधा ।

नूनमयं महर्षिरतिप्राचीनः क्रिस्ताब्दारम्भकाल एव लब्धजन्मा तर्कविद्याया आसूत्रणेन परमपुरुषार्थीभूतमोक्षसाधकपदार्थतत्त्वज्ञानसम्पादनोपयोगिमार्गप्रदर्शनेन च भारतीयसंस्कारं पर्यपूपुषत् । महाभारते तावद् भीष्मस्तवराजे उलूकनाम्नो महर्षेरुल्लेखादस्योलूकनाम्नः कणादस्य ततोऽपि प्राचीनत्वं संलक्ष्यते । "न वयं षट्पदार्थवादिनो वैशेषिकादिवदि"ति सांख्यदर्शनस्थं सूत्रमपि तत्कर्तुर्महर्षेः कपिलादस्य मुनेः

(२) अत्रोलूकस्य कणादात् पृथङ्निर्देशश्चिन्त्यः ।

प्राचीनत्वमाविष्करोति । वैशेषिके न्याये च दर्शने प्रसाधितं शब्दानामुत्पत्तिविनाशवत्त्वसिद्धान्तं महता यत्नेन निराकरोति भगवान् जैमिनिः स्वदर्शने "कर्मैके तत्र दर्शनाद्" इत्यादि पूर्वपक्षसूत्रप्रस्तावेन । अतश्च जैमिनेरपि पूर्वकालीनः कणाद इति निश्शङ्कं वदामहे। "महद् दीर्घवद् वा ह्रस्वपरिमण्डलाभ्याम्" इत्यादि ब्रह्मसूत्रपर्यालोचनया वेदान्तदर्शनादपि प्राग्भवत्वमस्य परिमण्डलसद्भावस्थापकस्य वैशेषिकदर्शनस्येति निर्द्धारयामः । वैशेषिकदर्शनोक्तहेत्वाभासत्रयस्थाने "सव्यभिचारविरुद्धप्रकरणसम साध्यसमकालातीता हेत्वाभासाः" इत्यादिभिर्न्यायसूत्रैः पञ्च हेत्वाभासाः सप्रपञ्चं सोपपत्तिकञ्च प्रपञ्चिताः । अनुमानप्रणाली चात्यन्तं सङ्कुचिता दृश्यते वैशेषिके तन्त्रे । न्याये च वैपरीत्येन । कणादसूत्रप्रस्थानमतिसरलं दरीदृश्यते न्यायपूर्वोत्तरमीमांसादिदर्शनान्तरापेक्षयेति सर्वमिदं परमकारुणिकस्य भगवतः कणादमुनेः प्राचीनत्वं प्राशस्त्यञ्च समर्थयतीत्यलमतिविस्तरेण ।

इतःपरं तदीयसंस्कारान् किञ्चिदिव गवेषयामः। लौकिका अलौकिकाश्च सन्ति बहवः संस्कारा दर्शनेऽस्मिन् प्रस्फुरन्तस्तत्र तत्र । दर्शनान्तरेषु तावदलौकिका एव संस्काराः प्रायशो निरूपिताः । "सर्पिर्जतुमधूच्छिष्टानामग्निसंयोगाद् द्रवत्वमद्भिः सामान्यम्" (अ-२-आ-१-सू-७) "त्रपुसीसलोहरजतसुवर्णानामग्निसंयोगाद् द्रवत्वमद्भिः सामान्यम्" (२-१-८) इति सूत्रद्वयेन काणादेन पार्थिवानि घृतजतुसिक्थकान्यग्निसम्पर्केण द्रवीभवन्ति, त्रपुसीसलोहरजतसुवर्णानामग्निसंयोगजं द्रवत्वं नैवोच्छिद्यते, अतश्चैतानि तैजसानीति प्रख्याप्यते। सामान्यधर्मप्रत्यक्षाद्विशेषाप्रत्यक्षाद् धर्मिद्वयस्मृतेश्च संशयः सम्पद्यत इति प्रस्तौति कणादमुनिः। संयोगाद् विभागाच्छब्दाच्चशब्दानिष्पत्तिराविष्क्रियते। "अभिघातजे मुसलादौ कर्मणि व्यतिरेकादकारणं हस्तसंयोगः" (५-१-३) इत्यनेनाधःपतितस्योत्पतनम् (Reaction) अकस्माज्जायत इति समर्थ्यते। "मणिगमनं सूच्यभिसर्पणमित्यदृष्टकारितम् (५-१-१५) इत्यनेनायस्कान्तसान्निधाने सूचीनामभिमुखगमनमदृष्टकारणजन्यमिति प्रसाध्यते। "नोदनादाद्यमिषोः कर्म तत्कर्मकारिताच्च संस्कारादुत्तरं तथोत्तरमुत्तरञ्च (५-१-१७) त्यनेन धनुर्नोदनादाद्यमिषौ कर्म जायते पश्चाच्च तत्कर्मजन्याद् वेगात् कर्मान्तरं जायत इति वेग एव कर्मसन्तानजनक इत्यावेद्यते। "कारणाभावात् कार्याभावः" (१-२-१) इत्यादिनाऽनित्यानां कार्यकारणभावोऽस्तीति स्थाप्यते। "नाड्यो वायुसंयोगादारोहणम्

(५-२-६) इत्यनेन नाड्यः सूर्यखरकरा वायुसंयोगाद् भूगतानि जलानि गगनमारोहयन्तीति सम्बोध्यते। वृक्षाभिसर्पणमित्यदृष्टकारितम् (५-२-७) इत्यनेनादृष्टकारणान्मूले सिक्तानि जलानि वृक्षाभ्यन्तरेणोर्ध्वं गत्वा वृक्षं संवर्धयन्तीति कथ्यते। "अपां संयोगो विलयनं च तेजःसंयोगात्" (५-२-८) इत्यनेनापां संघातो हिमकरकादिरूपो विलक्षणादिव्यतेजःसंयोगाज् (Electricity) जायत इति प्रबोध्यते। दिव्यतेजसा सहापां संयोगादेव मेघो गर्जतीत्यादयो बहवो लौकिकसंस्कारा वैशेषिकदर्शने समुल्लिखिताः।

देहेन्द्रियाद्यतिरिक्तस्य जीवात्मनोऽनुमानगम्यत्वप्रतिपादनम् (३-१-२०) जीवात्मनो नानात्वकथनम् (३-२-२०) परमाणूनां मूलकारणत्वप्रसाधनम् (४-१-१) महत्वाभावात् परमाणोरचाक्षुषत्ववचनम् (४-१-६) अयोनिजशरीरप्रख्यापनम्—

आत्मजन्या भवेदिच्छा—त्विच्छाजन्या भवेत् कृतिः। कृतिजन्या भवेच्चेष्टा तज्जन्यैव क्रिया भवेत ॥ (५-१-१) इत्यावेदनं ज्ञानायौगपद्यान्मनसोऽणुत्वस्फुटीकरणं (५-२-१५) यागहिंसादिजन्यपुण्यपापानां सामानाधिकरण्येनैव स्वर्गनरकादिसाधनत्वसंकीर्तनम् (६-१-६) गङ्गास्नानोपवासादिकर्मणां स्वर्गफलकत्वसंवेदनम् (६-१-२) रागद्वेषोत्पन्नाभ्यां धर्माधर्माभ्यां जननमरणनिष्पत्तिख्यापनम् (६-२-१५) आत्मकर्मभिः श्रवणमनननिदिध्यासनात्मसाक्षात्कारैर्मोक्षसिद्धिप्रख्यापनञ्चेति संख्यातीता अलौकिकसंस्काराश्च सम्यक् प्रपञ्चिताः।

यद्यपि मोक्षएव परमः पुरुषार्थ इति सर्वे तत्तन्मतस्थापकाः समामनन्त्यथापि मोक्षः परं बहुभिर्बहुधोपवर्ण्यते। मृत्युरेव मोक्ष इति देहात्मवादिनो **लोकायतिकाः**। आत्मोच्छेद एव मोक्ष इति शून्यवादिनो **माध्यमिकाः**। भावनाप्रचयान्निखिलदुःखवासनोच्छित्तौ विषयाकारोपप्लवाभावेन विशुद्धविज्ञानसन्तानोदयो मोक्ष इति विज्ञानवादिनो योगाचारप्रमुखाः सर्वे **बौद्धाः**। आवरणमोक्षो मोक्ष इत्यनैकान्तवादिनो **जैनाः**। अहं ब्रह्मास्मीति वाक्यजन्याखण्डाकारवृत्त्याऽविद्यानिवृत्तौ जीवात्मनः सच्चिदानन्दब्रह्मलक्षणस्वस्वरूपाधिगमो मोक्ष इति मायावादिनः **शाङ्कराः**। जगत्कर्तृत्वं विहाय सर्वज्ञत्वादिनिखिलकल्याणगुणप्राप्तिपूर्वको वासुदेवयाथात्म्यानुभवो मोक्ष इति विशिष्टाद्वैतवादिनो **रामानुजीयाः**। जगत्कर्तृत्वलक्ष्मीपतित्वश्रीवत्सवर्जं भगवज्ज्ञानायत्तनिर्दुःखपूर्णसुखं मोक्ष इति द्वैतवादिनो **माध्वाः**। द्विभुजकृष्णेन सार्कं स्वांशभूतानां

जीवानां गोलोके लीलानुभवो मोक्ष इति शुद्धद्वैतवादिनो वल्लभीयाः । "दुःखेनात्यन्तं विमुक्तश्चरति" "तमेव विदित्वातिमृत्युमेति" "आत्मनाऽऽत्मानं संविवेश" इत्यादि श्रुतिभिः,

"यदात्मतत्त्वेन तु ब्रह्मतत्त्वं दीपोपमेनेह युक्तः प्रपश्येत् ।
अजं ध्रुवं सर्वतत्त्वैर्विशुद्धं ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥ श्वेता २-१५ ।

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" ॥ मुण्ड २-२-८ ।

इत्याद्युपनिषद्भिश्चात्मतत्त्वसाक्षात्कारात्मकतत्त्वज्ञानसाध्यात्यन्तिकदुःखनिवृत्तिरेव मोक्ष इति न्यायवैशेषिकसांख्यदर्शनकाराः समामनन्ति ।

एवञ्चात्यन्तिकदुःखनिवृत्तिरात्मसाक्षात्कारेणैव साध्यते । सोऽप्यात्मसाक्षात्कारो नान्तरा पदार्थतत्त्वज्ञानमुपपद्यते । अतश्च परमपुरुषार्थस्य मोक्षस्य साधनीभूतं यत् पदार्थतत्त्वज्ञानं तस्मै प्रवृत्तमिदं काणादं दर्शनमित्यहो ! परमकारुणिकत्वं भगवतो कणादस्य परमपावनत्वञ्च तद्दर्शनस्येति सर्वमवदातम् ॥

॥ श्रीः ॥

# ॥ 'गर्भश्रीमान्' वञ्चिमहाराजः ॥

MAHOPADHYAYA M. SIVASUBRAHMONYA SASTRY,
Vyakarana Pandit.

सुप्रथितमपि स्वात्यवतारस्य वञ्चिमहाराजस्य चरितं कथ्यमानं तदीयग्रन्थपरिशीलनकुतुकिनाममान्तमानन्दमुपजनयति सचेतसामिति तत् संक्षिप्य तस्य सङ्गीतकलाकौशलं संस्कृतभाषाप्रणयञ्च किञ्चिदिव विमृशामः ।

९८६ तमकोलम्बाब्दपर्यन्तजीविनो बालरामवर्ममहाराजात् परं राज्याधिकारिकपुरुषाभावाद् राज्ञ्योर्लक्ष्मीपार्वतीभाग्योर्ज्यायसी राज्यमन्वकार्षीत् । वञ्चिवास्तव्यजनताया भाग्यातिरेकादियं ९८८ तमे (1813 A. D.) कोलम्बाब्दे मेषमासि पञ्चमदिने स्वातिनक्षत्रे श्रीपद्मनाभकृपाविशेषमिव मूर्तिमन्तं सुकुमारं कुमारमसूत । यदायं गर्भे स्थितस्तदैव राज्यस्वामिपुरुषान्तराभावाद् वञ्चिराज्यस्वाम्यमस्योपनतमिति 'गर्भश्रीमान्' इति ख्यातिमाप । परमेतस्य मातृपरिपोषणभागधेयमवसितं वयसि द्वितीय एव । ततः स मातृष्वस्रा श्रीपार्वतीराज्ञ्या स्वपित्रा च राजराजवर्मदेवेन सञ्चिन्त्यमानसकलयोगक्षेमः शुक्लचन्द्र इव समेधाञ्चक्रे ।

कुमारात् प्रति श्रीपार्वती त्रयोदशवयस्कापि मन्त्रिधुर्यादीनां साचिव्येन सहजेन मेधाविलासेन च विधिवदकरोद्राज्यम् ।

बालोऽयं गुरुवरेभ्यः श्रीसुब्बरायमुखेभ्यो विद्यासु शिक्षमाणः, क्रममाणः क्रमेण सकलासु कलासु राजोचितासु आङ्गल्यादिविविधभाषासु च नैपुण्यं समपादयत् । अविलम्बमेव राज्यतन्त्रविज्ञानमनुपममाप । गर्भेश्वरत्वमभिनवयौवनत्वमप्रतिमरूपत्वममानुषशक्तित्वं चेति महत्यानया भाग्यपरम्परया तस्य पाण्डित्यधोरण्याः साहायकमेवाचरितम् । श्वश्रूस्नुषयोरपि लक्ष्मीसरस्वत्योरविरोधेनैकाधिकरण्यमेवासीत् तस्मिन् पुण्यभाजि । किं बहुना षोडशे हायने कृतपदं तं धैर्यश्रिया नृत्तरङ्गं विविधकलानैपुणीसमुत्तेजितधिषणावैभवं चिरप्रतीक्षितं राजवंशकरीरं राज्यश्रीः स्वयंवरणमालिकयावृणीत । "तेजसां हि न वयः समीक्ष्यते" ।

मातृभ्यां यथावच्चिन्तितराज्ययोगक्षमस्यास्य राज्ये विशिष्य करणीयं न किञ्चिदासीत्। अथापि एतद्रुपक्रमाण्येवानन्तशयने राजकीयान्याङ्गलकलाशाला, चिकित्सामन्दिरादीनि स्थानानि बहूनि। तत्तादृशैर्नूतनैः समारम्भै राज्यतन्त्रं सर्वतोभद्रं प्रजाक्षेमैकतानं चासीदिति ननु वक्तव्यम्? सांस्थानिकैर्विद्वद्भिः कविभिर्गायकैश्च परिपुष्टा अपि विविधाः कला विदेशीयैः सादरमिहानीतैरभिरूपमाणिभिः सम्मर्दं प्राप्य शाणघर्षणोद्दीपिता इव रत्नप्रभा नितान्तं नीता भासुरिमानम्। किं बहुना वञ्चिराजधानी अभिनवा भोजराजनगर्येवासीदिति शक्यं वक्तुम्।

अथ राजवरस्यास्य 'ग्रन्थविहारः' कियानिति विचारयामः।

इह खलु जगति जनिमतः पुंसो मानसिकं, वाचिकं, कायिकमाध्यात्मिकं च संस्कारमन्विच्छतः संप्रति वसुमत्यां प्रचलन्तीनामितरभाषाणां मातृभूताया वेदार्थप्रतिपादनेन निरुपमानं महिमानमात्मन आविष्कुर्वाणायाश्चतुर्विधपुरुषार्थचिन्तामणेः संस्कृतवाण्याः क्रियासमभिहारेणाराधनमेव युक्ततममिति निश्प्रचं पौरस्त्यपाश्चात्यसमसम्मतश्चाभिप्रायः। अभिनवागतवधूविलासविलोभितमनाः प्राकृतो जन इव जननीं हिन्दुजनोऽपि हूणभाषाध्ययनलोलुपो न गणयत्येनाम्। वदति च सेयं कदापि काले व्यावहारिकी नासीदिति, मृतभाषेति, किमपि प्राकृतमेव संस्करणात् संस्कृतत्वमापेदे इति। तदिदं न विचारसहम्; यतो हि प्रकृतिः संस्कृतं तत आगतं प्राकृतमिति व्युत्पत्तिं वदन्ति विदान्ति च बुधाः। शौरसेनी, प्रकृतिः संस्कृतमिति प्राकृतप्रकाशे सूत्रयन् कात्यायनोऽपि संवादी दृश्यते। तदास्ताम्। प्रकृतमनुसरामः।

महाराजस्यास्याजानसिद्धा सङ्गीतवासना, संस्कृतभाषायामप्रतिमं पाण्डित्यं, सहजप्रतिभोपस्कृता सङ्गीतकलाप्रचारचातुरी चाहमहमिकयोदजृम्भन्त। तत्रापि कोऽपि भाग्यातिरेकोऽस्य गायकलोकसुदुर्लभः, यत् सङ्गीतकलाकोविदस्यास्य रागसुधारसनिष्यन्दिनी कवितावल्लरी सहजाता भक्तिरसामृतसेसिच्यमाना संस्कृतसाहितीरसपोपुष्यमाणा चातितरामशोभत।

कतिपयेऽपि हेतवो जाग्रत्येतस्य सङ्गीतकविताया महिमाधायकाः। ते यथा—अस्य जन्मसमय एव श्रीरामपरमभक्तो गायकमणिः **श्रीत्यागराजः** स्वसङ्गीतकलानैपुण्या आसेतुहिमाचलं वशीकृत्य यशःस्तम्भं स्थापयित्वा गायककुलसम्राड् बभूव। "सद्वितीयत्वे ह्यद्वितीयत्वं स्थापित मानोन्नतिं जनयति पुरुषस्य।" तदपि श्रेयसे भूयसे

कविपुङ्गवस्यास्य। यतस्तस्य बहून् शिष्यान् साभिमानमिहानाय्य सादरं सम्मान्य तन्मुखात् 'सोपानपथ' मात्रसंचरणत् सामिहत्यां तादात्विकीं सङ्गीतवाहिनीं 'देशिक' पथेनापि सञ्चारयन् जन्मसिद्धया श्रीपतिपदपङ्कजभक्तिलहर्या परिपोषयन् श्रीत्यागराज-सङ्गीतसुधासागरं संगमयन् कृतकृत्योभूत्। 'क वा प्रकृतिकोमलं सुकुमारमतीनां राजकुमाराणां हृदयं, क च वा बिविधगहनशास्त्रविचारपरिपक्कमतिभिः सुकृतिभिः कृतिभिः सुसम्पादं कवितामाधुर्यम्। किंवा अलभ्यं भाग्यभाजाम्, विशिष्य शास्त्रो-पस्कृतशब्दसुन्दरगिराम्।

अपि च किमप्यनन्यसुलभं भागधेयमस्य महाकवेः यत् विविधास्वपि भाषासु प्रवर्ततेऽस्य कवनचातुरी। इदन्तु कविलोकासाधारणम्। कवयः प्रायो-ऽप्रगल्भा एवैकैकां भाषामालम्ब्य कवयितारोऽन्यभाषास्वपि स्वप्रभुताप्रकटने। अत एवाऽयं महाराजः श्रीपद्मनाभशतकम्, स्यानन्दूरपुरवर्णनप्रबन्धः, अजामिलोपाख्यानम्, कुचेलोपाख्यानम्, भक्तिमञ्जरीति ग्रन्थान् भिन्नप्रकारान् संस्कृतमाश्रित्य; सङ्गीत-कीर्तनानि संस्कृतान्ध्यादिभाषा आलम्ब्य उत्सववर्णनप्रबन्धं मणिप्रवालभाषया (केरल संस्कृतोभयरूपया) चारचितवान्।

अस्य महाराजस्य कीर्तनानामुत्पत्तेः प्रागिह सङ्गीतकं प्रायः आट्टकथेति केरलेषु प्रथितं प्रस्थानमालम्ब्यैव जीविकामदीधरदित्यपि नान्द्रप्रस्तुतं सर्वैः स्मरणीयम्।

किञ्च श्रीजयदेवत्यागराजादयोऽपि स्वनिर्मितानां गीतानामन्ते स्वस्वनाम सन्निवेशयान्ति, परन्तु राजन्यवरोऽसौ विचिकत्थिषालेशरहितः स्वगीतानामन्ते श्रीपद्मनाभ-पदाङ्कनमेव कलयतीत्यन्यादृशं प्रशंसास्थानम्।

श्रीपद्मनाभपरमभक्तस्याप्यस्य सङ्गीतकीर्तनानि न केवलं श्रीपद्मनाभपराणि। अपि तु सन्त्यन्यदेवतापराण्यपि बहूनि। तैरेव गीतरत्नैरद्यापि इह देवालयेषु नाग-स्वरिकाः, राजकीयनवरात्रमहोत्सवेषु गायकाश्चाराधयन्ति देवता इत्यप्यभिमानस्थानम्।

चतुस्त्रिंशे वयसि (1847 A. D.) स्वराज्यात् स्वाराज्यं प्राप्तोऽप्ययं राजर्षिः

"जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः
नास्ति तेषां यशःकाये जरामरणजं भयम्"।

इति वचनामृतस्य पात्रमेवाभवत् महनीयया स्वजीवितचर्यया। तेषामेतेषां गीतानां महिमा गात्वैव विवरणीयेति तदीयशब्दार्थमाधुर्यं पुनः प्रदर्शयामः स्थालीपुलाकन्यायेन।

कामोदरीरागः

प कारणं विना कार्यं नोत्पद्यते किमपि
कञ्जनाभ नियतम्

अनु नीरदनीलमनोहरतरमूर्ते
दारिताश्रितजनदारुणविविधार्ते कारणं

चर (१) जननकारणं कर्म ज्ञानकारणं विद्या
धनमाटोपकारणं तरुणी मोहकारणम्
अनयो हानिकारणं आधी रोगकारणम्
धनसमृद्धिकारणं ननु धर्मो जगदीश कारणं

च (२) तरुकारणं बीजं धैर्यं जयकारणम्
परमदैन्यकारणं भवति हीनयाचना
करुणाकारणं साधुचरितशालिता
तरलता निखिलापदामिह कारणम् कारणं

च (३) शमदमादिकारणं साधुशास्त्रनिषेवा
समसस्याप्तिकारणं सारवृष्टिरेवाहो
तिमिराभावकारणं दिनमणी रमाकान्त
मम शर्मैककारणं कमलाक्ष तव पादौ कारणं

अहो एतादृशैर्गीतिः कवेरस्य न केवलं भगवद्भक्तिप्रवाहभरितां कवनचातुरीं वश्यवचसोऽस्य विविधशास्त्रतत्त्वविरत्तं च विद्मः।

अथ पुरुषार्थसाधनेषु भक्तेः पारम्यं प्रदिदर्शयिषुः कविशेखरः नवविधमपि भागवतोक्तं भक्तिप्रभेदमेकैकेन गानेन विवृणोति। यथा—

भैरवीरागः

भवदीयकथाभिनवसुधायां परिमज्जतु
मे श्रुतियुगली

इत्यादिना

आहरिरागः

प परम पूरुष ननु कर्म समस्तं भवति समर्पयानि

अ परया तव मायया बत मोहितोऽपि परम

च (१) यदिह निशमयामि यदवलोकयामि
यदपि च जिघ्रामि यदपि च ददामि परम

च (२) यदहमश्नामीह यदथ वदामि यदनुस्पृशामीश
यदपि दधामि परम

च (३) विदितमविदितं वा विहितमविहितं
तदपि पङ्कजनाभ तव सेवकोऽहं परम

इत्यन्तेन गीतेन गीतातात्पर्यसर्वस्वं सर्वकर्मार्पणं करोति महाराजः। इदं किल काव्यं "चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि' इति प्रशंसायाः समुचितं पात्रम्। आस्तामेतादृशगीतकाव्यरत्नविचारः।

लोकोऽयं भिन्नरुचिः। शते कश्चिदेव गानरसं रसनयास्वादयितुमनुभावयितुश्च परान् प्रभवति। परे तु पातुं श्रोत्रचषकेण तद्रसम्। तेऽति नूनं विद्वांसो भक्तिभरिताः कृताः क्रान्तदर्शिनानेन कविना। तदित्थम्—हरिकथाकालक्षेपो नाम काश्चित् प्रवचनसंप्रदायः पामरेष्वपि भक्तिजनको महाराष्ट्रदेशे लब्धजनिः। तत्र संप्रदाये कुशलः तञ्जानगरवास्तव्यो नाम्ना अनन्तपद्मनाभगोस्वामीति गायकशिखामणिरेतस्य राज्यकाले लब्धप्रतिष्ठ आसीत्। तमपि गायकमिहानाय्य सादरं तं मार्गमिह प्रचिचारयिषुरुपाख्यानद्वयं अजामिल, कुचेलोपाख्यानात्मकं विरचयामास कविशेखरोऽयम्। तस्मिन्नुपाख्यानद्वये कियान् प्रवहति साहितीरस इति पश्यामः।

कुचेलोपाख्यानोपक्रमे कविः स्वभक्तान् जनान् संबोधयन्—

गङ्गाधरादृतमसङ्गाशयाम्बुरुहभृङ्गायितं दितिभुवां
भङ्गावहं विधृततुङ्गाचलं पृथुभुजङ्गाधिराजशयनम् ।
अङ्गानुषङ्गिमृदुपिङ्गाम्बरं परमनङ्गातिसुन्दरतनुं
शृङ्गारमुख्यरसरङ्गायितं भजतपङ्काजनाभमनिशम् ॥

इत्याह । अहो रागपरिवाहिनी शब्दमाधुरीनिष्यन्दिनी अर्थगाम्भीर्यान्तर्वाहिनी च गीतिः । असङ्गाशयाम्बुरुहं प्रत्याधावन्तं भृङ्गं रूपयन् भगवन्तं, सूचिता कुचेलसविधमाधाव्य सत्कुर्वतो भगवतो महिमानेन पद्येन । एवं हि कुचेलं प्रति भक्तदासस्य कृष्णस्य सत्कृतिपराश्चेष्टा वर्णिताः कविना—

दृष्ट्वा दूरे कुचेलं सपदि स भगवान् बाल्यमित्रं प्रमोदाद्
उत्थायोपेत्य संश्लिष्य च सरसमघुं गाढमश्रूणि मुञ्चन् ।
पर्यङ्के सन्निवेश्य स्वयमथ विधिवत् साधु संपूज्य सद्यो
लिम्पन् पाटीरपङ्केन च सुरभितमेनाब्रवीत् स्वागतं तम् ॥

इति । हन्त भाग्यं कुचेलस्य । स्वकरपङ्कजकलितया पूजयाप्यायितान्तःकरणमन्ते पृच्छति भक्तजनायासमसहमानो भगवान् स्वागतं तम् । उपाख्यानान्ते च ।

योऽसौ दीनं कुचेलं द्विजवरमतनोत् सर्वसम्पत्समृद्धं
गृह्णन् तस्माच्च मुष्टिं बत पृथुकमयीं व्रीलितात् सौहृदेन ।
तं वै कारुण्यसिन्धुं भजत भुवि जनाः सर्वलोकैकनाथं
सच्चित्सान्द्रस्वरूपं नवजलदनिभं श्रेयसे पद्मनाभम् ॥

इति जनानुद्बोधयन् ललितहृदयो महाराज इतरदेवताव्यतिरेकेण सर्वदेवतासार्वभौमत्वं श्रीपद्मनाभस्य स्थापयति ।

अथाजामिलोपाख्याने तूपक्रममाणः कविः—

भर्तुर्वक्षसि भासिते सुविमले संवर्तकालोत्कट-
प्रोद्यत्कोटिविकर्तनच्छविघटासर्वङ्कषे कौस्तुभे ।

दृष्ट्वा वर्ष्म निजं प्रियोरसि गतामन्यां विशङ्क्य श्रियो
रुष्टाया हृदयानुवर्तनरतः श्रीपद्मनाभोऽवतु ॥

इति पद्येन जयदेव इव राधानुधावनपरं भगवन्तं, रुष्टायाः श्रियोऽनुवर्तनरतं पद्मनाभं वर्णयन् लक्ष्म्याः शङ्कोदयव्याजेन अजामिलस्यान्यसङ्क्रान्तहृदयत्वमेव वक्ष्यमाणं सूचयति कथांशमित्यत्र रसिकाः प्रमाणम् ।

विविधपाप्मभिरापूरितस्याजामिलस्य निष्कृतिमुपदिशतां भगवद्दूतानां—

"भुजगशायिनो नाम मङ्गलं
परमजानतापीह कीर्तितम् ।
दहति पाप्मनां जालमञ्जसा
भुवि शिखी यथा दारुसञ्चयम्"

इत्यादि वचनामृतं पायं पायं को वा तृप्यति सचेता इत्युपसंहरामः । कविकर्ममर्मज्ञस्यास्य ग्रन्थान्तरविचारः परस्तात् ॥

अयि प्रियवाचकाः! सुमनोहराणि तान्येतानि गीतरत्नानि क्रमाल्लुप्तप्रचाराणि श्रीमूलकमहाराजस्य करुणया तरणिकिरणसंपर्कमलभन्त । न चैतावतापि तेषां प्रचारः साधु साधितः । महतामवतारः काले काले भवति शुभाय । न केवलमेतेषां गीतानाम्, अपि तु समुचितादरविरहेण नाममात्रतां गतानां वञ्चिभूमौ पूर्वं प्रचलितानां विविधकलानां पुनः प्रचाराय प्रचुरायं कृतमतीनां वञ्चिभूपुण्यपुञ्जफलायितमहोदयानां **श्रीचित्रोदयानां बालरामवर्मणां** समुदयः परममाशास्थानं कलासुहृदां पौरस्त्यपण्डितानाञ्च । तत्र प्रजाहितैकतानहृदया माता **श्रीपार्वतीमहाराज्ञी, सचिवोत्तमः श्रीरामस्वाम्यार्यश्च** सन्तनुतः समुचितमुपदेशमिति **हेम्नः परमामोदः** । एतेषां यशोवैजयन्तीव जयन्ती **सङ्गीतादिकलाशालैवात्र** प्रथमं निदर्शनम् । सर्वथा धन्या वयम्, धन्यधन्या चेयं रत्नगर्भा सार्थकनामधेया ।

वर्धतां वञ्चिराजकुलं— वर्धतां नः सौभ्रात्रम् ॥

॥ श्रीः ॥

# ॥ शब्दविचारः ॥

Mahopadhyaya

K. YAJNANARAYANA SASTRI.

विदितमेव हि गीर्वाणवाणीप्रीतिजुषां समेषां विदुषां लोकचरितनिष्णातानां यद् जगत्त्रितयपवित्रतरचरित्राणां, वञ्चिभूपालकुलजलनिधिकलानिधीनाम्, अखिलहरिजनानां क्षेत्रप्रवेशनाज्ञावितरणेन विश्वैकहृद्यां कीर्तिमार्जयताम्, उदारैर्गुणैरपदानैश्च विजितविविधराजानां श्रीचित्रोदयानामस्मन्महाराजानां महनीयजन्मर्क्षमहोत्सवावसरे अनवद्यैर्हृद्यैर्गद्यैः पद्यैश्चामोददायकैः शाश्वताय श्वःश्रेयसायानवरतं जगदवनचणं रमारमणमनन्तपद्मनाभमीडते निबिडतररसतरलितहृदया वञ्चिवास्तव्या जनतत इति।

श्रीचित्रा नक्षत्रेषु मध्यमणिरिव श्री चित्रावतारो वञ्चिमहाराजो मनोहारिभिः श्लाघ्यैर्गुणैर्भूपालमणिषु सर्वत्र प्रथते।

तत्र जातः IV 3-25 इत्यधिकारे उप्ते च IV 2-44 इति सूत्रपर्यन्तं ठञ्, वुञ्, वुन्, अ, कन्, अण्, अञ् लुक् चेत्यष्टौ विधीनभाषिष्टाचार्यः पाणिनिः। ट अन् छण् इति त्रीनधिकानजीगणद् वार्त्तिककारो वररुचिः।

नक्षत्राणि च सप्तविंशतिः। तेषां समेषां लिङ्गवचने नामलिङ्गानुशासने न दृश्येते। नक्षत्राणि च

"आश्विनी भरणी चैव कृत्तिका रोहिणी तथा।<br>
मृगशीर्षा तथैवार्द्रा तथैव च पुनर्वसुः॥<br>
पुष्याश्लेषा मखा पूर्वफल्गुन्युत्तरफल्गुनी।<br>
हस्ता, चित्रा, स्वातयश्च विशाखा अनुराधिका॥<br>
ज्येष्ठा मूला तथा पूर्वोत्तराषाढे ततः परम्।<br>
श्रवणा च धनिष्ठा च तथा शतभिषाह्वया॥<br>
पूर्वोत्तरे भाद्रपदे रेवती च भसंज्ञकाः॥

तन्त्रान्तरे च—

हस्तस्वातिश्रवणा अक्लीबे मृगशिरो न पुंसि स्यात् ।
पुंसि पुनर्वसुपुष्यौ मूलन्त्वस्त्री स्त्रियः शेषाः ॥ इति ।

केचित्तु वचनव्यवस्थामित्थं कथयन्ति। आद्याश्चतस्र अश्विन्यादयः स्त्रियां बहुत्वे । मृगशिराः स्त्रीक्लीबयोरेकत्वे, आर्द्रा स्त्र्येकत्वे, पुनर्वसुपुष्यौ पुंस्येकत्वे, आश्लेषाद्ये स्त्रीबहुत्वे, फल्गुन्यौ स्त्रीद्वित्वे, हस्तो मिथुनैकत्वे, चित्रा स्त्र्येकत्वे, स्वाति-र्मिथुनैकत्वे, विशाखाद्ये स्त्रीबहुत्वे, ज्येष्ठा स्त्र्येकत्वे, मूलमस्त्रियामेकत्वे, आषाढाद्वयं स्त्रीबहुत्वे, श्रवणो मिथुनैकत्वे, धनिष्ठाद्ये स्त्रीबहुत्वे, भाद्रपदाद्वयं स्त्रीद्वित्वे, रेवती स्त्र्ये-कत्वे इति निष्कर्ष इत्याहुः । अदसीयनियमाङ्गीकारे "पाणिन्यमरजैनेन्द्रा जयन्त्यष्टौ च शाब्दिकाः" इति शाब्दिकाष्टकान्यतमस्यामरसिंहस्य अश्वयुगश्विनीत्याद्युक्तिर्विरुध्येत। "तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यं" "विशाखयोश्च" इत्यष्टिकासूत्र-मप्यननुकूलं भवेत् ।

अन्ये तु अश्विनीभरणीरोहिणीमृगशिरआर्द्रापुष्याऽऽश्लेषाहस्तचित्रास्वात्यनु-राधाज्येष्ठामूलाऽऽषाढाश्रवणधनिष्ठाशतभिषग्रेवतीनामेकवचनान्तत्वम् । पुनर्वसुफल्गुनी विशाखाभाद्रपदानां द्विवचनान्तत्वं, कृत्तिकामखयोर्बहुवचनान्तत्वञ्च ब्रुवते ।

अपरे तु पाणिनीयप्रमाणा निपुणा विचक्षणाः सर्वर्क्षाणामेकत्वं पुनर्वस्वोः परं द्विवचनत्वञ्चोरीकुर्वन्ति । उररीकुर्वन्ति चान्येषां विधीनां होमविषयत्वं छन्दो-विषयत्वञ्च यथायोग्यम् ।

अथ तत्रजात इत्यर्थे रूपनिष्पत्तिः कथ्यते ।

(१) "पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद् वुन्" इति विधीयमानस्य वुनः युवोरनाकावित्यकादेशे मूले जातो मूलक आर्द्रायां जात आर्द्रकः ।

(२) श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक् । कृत्तिकावाची बहुलशब्दः । एभ्यो दशभ्यः शब्देभ्यः परस्य जातार्थकप्रत्ययस्याऽणो लुक् स्यात् । लुकि कृते लुक्तद्धितलुकीत्युपसर्जनस्त्रीप्रत्ययस्य च निवृत्तिः। एवञ्च श्रविष्ठायां जातः श्रविष्ठः फल्गुनः, अनुराधः स्वातिः तिष्यः पुनर्वसुः हस्तः विशाखः अषाढः बहुलः इति सिद्ध्यति ।

(३) जे प्रोष्ठपदानां। प्रोष्ठपदानामुत्तरपदस्याचामादेरचो वृद्धिः स्यात् जातार्थे णिति ञिति किति चेति वृद्धौ प्रोष्ठपदासु जातः प्रोष्ठपादः इति रूपम्। बहुवचननिर्देशात् पर्यायोऽपि गृह्यते। भद्रपदासु जातः भद्रपादः इत्यादि।

(४) "चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसंख्यानम्" चित्रायां जाता चित्रा, रेवती, रोहिणी इति। इदञ्च स्त्रियामेव।

(५) फल्गुन्यषाढाभ्यां टानौवक्तव्यौ। इदञ्च स्त्रियामेव फल्गुन्यां जाता फल्गुनी, अषाढा।

(६) श्रविष्ठाषाढाभ्यां छण् वक्तव्यः। अस्त्रियामपि। श्रविष्ठायां जातः श्रविष्ठः श्राविष्ठीयः श्राविष्ठीया। अषाढः आषाढीयः आषाढीया।

(७) वत्सशालाभिजिदश्वयुक्शतभिषजो वा। एभ्यो जातार्थकस्य लुग्वा स्यात्।

(८) जातार्थे प्रतिप्रसूतोऽण् वा डिद्वक्तव्यः। डिति टेरिति टिलोपः। शतभिषजि जातः शातभिषजः शातभिषः शतभिषक्।

(९) 'नक्षत्रेभ्यो बहुलं' जातार्थप्रत्ययस्य बहुलं लुक् स्यात्। बहुलग्रहणादनुक्तानां परं यथेष्टम्। यथा रोहिण्यां जातो रौहिणः रोहिणः, मृगशिरसि जातो मार्गशीर्षः मृगशिराः। सूत्रेऽस्मिन् पूर्वसूत्राद्वाग्रहणानुवृत्तेर्व्यवस्थितविभाषाविज्ञानाच्च लुग्व्यवस्थायां सिद्धायां बहुलवचनं क्वचिदन्यदेवेत्येतदर्थम्। तेन वार्तिकोक्तं सिध्यति।

माधवाचार्यस्तु स्वकीयधातुवृत्तौ स्वातिशब्दं दीर्घान्तमपाठीत्। तन्मते स्वात्यां जातः सौवात इति स्यात्। कैयटाचार्याणां मते ह्रस्वान्तपाठे लिङ्गविशिष्टपरिभाषया ङीषन्तस्यापि ग्रहणे स्वातिरित्येव रूपम्। इयमत्र सङ्ग्रहकारिका—

"रो, रे, म, मृ, ज्ये, चिषु वृद्धिरादौ<br>
ष्ठात्पे च, वाऽन्त्य, श्रव, शा,ऽश्वयुक्षु।<br>
शेषेषु नाऽऽर्म्यौः कपरस्वरोऽन्त्यः<br>
स्वाप्वोरदीर्घः सविसर्ग इष्टः॥"

रोहिणी रेवती मखा मृगशिरः ज्येष्ठा चित्रा आसु तत्र जात इत्यर्थे आदौ नित्यं वृद्धिः। प्रोष्ठपदायां पकारे नित्यं वृद्धिः प्रोष्ठपाद इति रूपम्। अन्त्य, श्रव, श, अश्वयुक्षु (=) अपभरणी, श्रवणः, शतभिषक्, अश्वयुक् एषु विकल्पेन वृद्धिः। तेन आपभरणः अपभरण इत्यादि रूपद्वयम्। आर्द्रा मूलयोरन्ते ककारः आर्द्रकः मूलकः इति। स्वातिपुष्ययोरदीर्घो विसर्गश्च स्वातिः पुष्यः इति। अस्या अपाणिनीयत्वेऽपि कपर्द्याचार्यकृतत्वात्सर्वथा नाऽप्रामाण्यम्। अतः पाणिनिमतानुसारेण प्रतिपाद्यते।

| नक्षत्रनाम | तत्र जात इत्यर्थे रूपम् | विशेषः |
|---|---|---|
| अश्वयुक् | अश्वयुक्, आश्वयुजः | वत्सशालेति वा लुक्। |
| अपभरणी | अपभरणः, आपभरणः | नक्षत्रेभ्यो बहुलमिति वा लुक् |
| कृत्तिका | कृत्तिकः | बहुलग्रहणात् लुक् |
| रोहिणी | रोहिणः रौहिणः | बहुलग्रहणात् रूपद्वयम्। स्त्रियान्तु रोहिणी इत्येकमेव रूपम्। चित्रा-रेवतीरोहिणीभ्यामिति वार्त्तिकात्। |
| मृगशिरः | मृगशिराः मार्गशीर्षः | बहुलग्रहणात्। |
| आर्द्रा | आर्द्रकः | पूर्वाह्णेति वुन् |
| पुनर्वसुः | पुनर्वसुः | श्रविष्ठेतिलुक् |
| तिष्यः (पुष्यः) | तिष्यः—पुष्यः | श्रविष्ठेतिलुक् |
| आश्लेषा | आश्लेषः | बहुलग्रहणात् |
| मखा | माखः | बहुलग्रहणात् |
| पूर्वफल्गुनी | पूर्वफल्गुनः | श्रविष्ठेतिलुक्। स्त्रियान्तु फल्गुन्यषाढेति वार्तिकेन फल्गुनीति रूपम्। |
| उत्तरफल्गुनी | उत्तरफल्गुनः | श्रविष्ठेतिलुक्। स्त्रियान्तु फल्गुन्यषाढेति वार्तिकेन फल्गुनीति रूपम्। |
| हस्तः | हस्तः | लुक् |
| चित्रा | चैत्रः | चित्रारेवतीति वार्त्तिकात् स्त्रियां चित्रा, पुंसि चैत्रः। |
| स्वातिः | स्वातिः | लुक् |
| विशाखा | विशाखः | लुक् |
| अनूराधा | अनूराधः | श्रविष्ठेतिलुक् |

| | | |
|---|---|---|
| ज्येष्ठा | ज्यैष्ठः | बहुलग्रहणात् |
| मूलं | मूलकः | पूर्वाह्णेति वुन् |
| पूर्वाषाढः | पूर्वाषाढीयः–पूर्वाषाढः | पूर्वाषाढीया, उत्तराषाढीया, श्रविष्ठेति छण् अषाढासु जाता अषाढा फल्गुन्येति अन् |
| उत्तराषाढः | उत्तराषाढीयः, उत्तराषाढः | |
| श्रवणा | श्रवणः | बहुलग्रहणात् |
| श्रविष्ठा | श्रविष्ठः श्राविष्ठीयः | श्रविष्ठेति लुक् वार्त्तिकेन छण् |
| शतभिषक् | शातभिषः शातभिषजः शतभिषक् | वत्सशालेति वा लुक् |
| पूर्वप्रोष्ठपदा | पूर्वप्रोष्ठपादः | जे प्रोष्ठपदानामिति वृद्धिः |
| उत्तरप्रोष्ठपदा | उत्तरप्रोष्ठपादः | |
| रेवती | रैवतः | स्त्रियां रेवतीत्येव चित्रेति वार्त्तिकात् |

एतावता चित्रायां जातः चैत्रः, चित्रायां जाता 'चित्रा' इति च सिद्धान्त आयातः । अनन्तशयनस्थराजकीयसंस्कृतविद्यामन्दिरात्प्रसिद्धीक्रियमाणायां स्वातिना सचिवोत्तमेन पोपुष्यमाणायां चातुर्मासिक्यां श्रीचित्रायां चैत्रस्य महाराजस्य मङ्गलाशंसा ।

चित्राभप्रकृतौ परे च विहिते
यत्प्रत्यये तद्धिते
जातेऽर्थे बहुकार्यभाजि सुतरां
सारेण सूत्रेण तु ।
युक्तादेशविधानतः प्रथमतः
पुंसि प्रसिद्धिं गत-
श्चैत्रो वृद्धिसमन्वितो विजयतां
स्वौजोविलासैश्चिरम् ॥

# "कर्मणि व्यज्यते प्रज्ञा"

Mahopadhyaya-Siromani
E. V. DAMODARAN.

विरुद्धैकार्थौ दूरतो व्युदस्य, विद्यामर्थकरीमधीष्व प्रज्ञावहामिति अस्मदार्यभारतीयैर्बहुशः समुद्घाटितं विद्याभ्यासप्रयोजनं कालमहिम्ना कारणान्तरेण वा हहह !!! चिरकालविच्युतमपि पुनरिदानीमस्माकमेधमानभागधेयोन्मुखतयैवेति मन्ये, जगदिदमुद्दिधीर्षु भृशं संतितर्पयिषु चोन्मिषतीति वक्तव्यमेव वर्तते। यतो हि एतत्सर्वं कृत्स्नमपि जगत् समुच्छ्रितस्वतन्त्रप्रज्ञाकल्पद्रुमशिशिरच्छायायां द्रष्टुकाममेवेयं वञ्चिभूसर्वकलाशाला सर्वतोदिक्कां लोकक्षेमौत्सुक्यप्रवणतां मुद्रामुद्रितन्यायेन द्रढयन्तीव अङ्गीकुरुते "कर्मणि व्यज्यते प्रज्ञा" इति मुद्रावाक्यम्। समुन्नतः कोऽप्यभिमानो ममाप्यत्रोदेति यत् चित्सेकक्षपितसर्वमहामोहानां भगवत्पादानामिव, अधर्मैकसुहृदि संप्रति कलौ युगे, विशेषतोऽस्मिन् विंशे शताब्दे तत्तादृशानामन्येषामपि पुण्यचरितानां महनीयं जननीपदमलंकुर्वाणाया अस्या वञ्चिधात्र्याः कैलासोन्नतमहत्त्वदायादमेतन्मुद्रावचनं दिङ्मुखविसर्पिणीं जगति महितामवदातां कीर्तिं प्रतिष्ठापयेदिति॥

काव्यकलाकुशलानां रसिकपुङ्गवानां तद्वद् वञ्चिभूचरितेष्ववहितचेतसां सचेतसां च अमृतरसनिष्यन्दि व्यङ्ग्यैकप्रवणं किमपि सत्काव्यमिव; राष्ट्रमीमांसकानां सारवत्त्वाद् विश्वतोमुखत्वात् शासनाच्छास्त्रमिव चादरणीयमिदं मुद्रावाक्यं कं कमाशयमात्मन्यन्तर्भावयतीति निरीक्षकैर्निर्वर्णनीयं, चिन्तकैर्विमर्शनीयं, सहृदयैरास्वादनीयं, माणवकैर्वाढं पठनीयं, सर्वथा संस्कृतलोकेन उररीकरणीयं चेति मया किञ्चिदिह विमृश्यते।

मन्त्रिणां भिन्नसन्धाने भिषजां सान्निपातिके
"कर्मणि व्यज्यते प्रज्ञा" स्वस्थे को वा न पण्डितः

मन्त्रिणो महामतिमत्त्वं भिन्नसन्धाने कर्मण्येव व्यज्यते, नतरामन्यत्र जातु। राज्यभरणचक्रे निरपाये सुदृढव्यूहसन्धाने सति, निर्विशेषविकारे स्वास्तिमति प्रकृतिप्रपञ्चे आदेशागमप्रक्रियायां केवलप्रत्ययवति च सति, निद्राणापि सचिवपुङ्गवप्रज्ञा सर्वं सुखं शास्ति। किन्तु, स्त्रीबालातुरवृद्धयुवसंकुलस्य प्रक्षुभ्यतः प्राकृतवर्गस्य सर्वतः प्रसृते क्रोधफेनमहापुञ्जे राष्ट्रभरणमहानौकायाः सर्वधुरन्धरान् समर्थानपि कर्णधारानतिवेलं विभीषयति, निमूलकाषं निकषति च सति, तादानिकानां जनताहृदयान्तर्निगूढाना-

मपि विकाराणामोतप्रोततां सुसूक्ष्मं विज्ञाय, तुरीयमप्युपायं बाढं निरङ्कुशमकुतोभयं प्रयुज्य मतिमता धीसचिवेन स्वप्रज्ञाप्रकाशप्रसरः प्रदर्श्यते। स्वस्थे को वा न पण्डितः?।

एवं प्रायेण दुरन्ते महाबह्वपायत्वाद् दुरुपक्रमे सान्निपातिके रोगे, दोषज्ञो वैद्योऽनुकलं रोगिणः त्रिदोषविकारान् दर्शनस्पर्शनप्रश्नैः परीक्ष्य निर्भयमुपक्रमेत। नो चेदुभावपि मन्त्रिभिषजौ विजयविदूरगौ मङ्क्षु नङ्क्ष्यतस्तराम्।

कथंचिद्दैवादधिगतचेतनोऽपि रोगी—

"सन्निपातज्वरस्यान्ते कर्णमूले सुदारुणः।
शोफः संजायते येन कश्चिदेव प्रमुच्यते"॥

इत्यादि अष्टाङ्गेऽप्यायुर्वेदे नदीष्णानां वृद्धवैद्यानामभिप्रायानुरूपमिहपरोभय-भ्रष्टो बत! म्रियमाणः प्राणिति।

ततश्चामूल्यतामायुषो वेदं च जानानः चिकित्सको, राज्ञो धर्मं मार्मिकतया विदन् सचिवोत्तमश्चोभावपि एवं बुद्धिविप्लवकरे भीकरे व्यतिकरे, कर्मणैव स्वप्रज्ञां प्रदर्शयेताम्।

अर्थगरिमणि शब्दमहिमनि चाप्लवमानस्यास्य मन्त्रपूतस्य सूक्तस्य संकल-यितुर्विदुषो विष्णुगुप्तस्य पदसंविधानमहनीयचातुरीं विशेषेण व्यञ्जयन्नयं सर्वाकाररम-णीयः तृतीयः पादो, यच्चारुतरमुद्राङ्कितमौलिरियं विश्वविजिगीषुः सर्वकलाशाला, रातिभिररातिभिः, अधीनैर्धीनैश्च समैः समं मुक्तकण्ठं प्रशंस्यमानाः तत्प्रतिष्ठापकाश्च यावत् प्रपञ्चपरिवृत्ति वपुषा यशसा शुभमवतिष्ठेरन्।

एवं शक्यसंभवेऽपि बहुतरे वक्तव्ये, अत्रापि निष्पन्दतारके चक्षुषी निक्षेप्तुं वः प्रियपाठकान् याचे निबद्धाञ्जलिः। सर्वतः प्रातिकूले काले कस्मिंश्चित् पूर्वोक्त-सूक्तयनुसारेण स्वधिषणावैभवं विनियुज्य विजयवैजयन्तीमुच्चलां प्रवर्तितवद्भिः सचि-वोत्तमैः प्रतिष्ठापितायाः सर्वकलाशालाया मुद्रावाक्यं, ज्ञात्वा अज्ञात्वा वा, तदात्मनैव प्रादुष्षान्निखिलानपि वञ्चिभूवास्तव्यान् 'भवन्तोऽप्येवमेव प्रवर्त्तन्तामचिन्त्यफलप्रसूत्यै' इति नूनमुपदिशत्यये!! दैवगतिर्विचित्रैव, नितान्तमनुभवैकवेद्यमिहत्यमौचित्यं च।

सबाह्यकरणेन प्रसीदता अन्तरात्मना, परानर्थपरिजिहीर्षूणां सचिवोत्तमाना-मातनोम्यहं नानानमोवाकं महत्तरम्॥

॥ श्रीः ॥

# *॥ श्रीनारायणगुरोर्मतं तत्त्वचिन्ता च ॥

K. Balarama Panicker.

सकललोकशान्तिप्रदायके सनातनधर्मप्रपञ्चे कालादापतितं तमोदुरितमखिलं सम्मार्ष्टुमुदितस्य नवयुगस्य मोहनमिदं सुप्रभातम्। तदीयसौन्दर्यवीचिनिचयव्याप्ते भुवनोदरे परिलसतां विकसितसज्जनहृदयपुण्डरीकाणामामोदोऽपि सर्वत्रात्र प्रसरति। तत्प्रभावप्रभवभूतेयं सकललोकप्रथिता श्रीमदनन्तशयननगरी। अतिमहनीयानां पौरस्त्यविद्यानां पोषणपरायणैर्नानादेशवास्तव्यैः पण्डितप्रकाण्डैश्चालंकृतेयं सभा। एवं काल-देश-वस्त्वादिष्वेकैकमपि भवतां सहृदयानामाह्लददायकं कुशलाशंसकं च परिलसति। विशिष्य सर्वोपरि अस्मन्महाराजस्य कीर्तिवधूः सकलदिगन्तसञ्चारसम्पादिताखिलजनपरिचया विदितविविधाचारविचारा सुप्रसिद्धाभ्यां तन्महनीयता—तदीयोदारताभ्यां प्रियसखीभ्यां संयुता कुशलमाशंसितुमत्र बद्धपरिकरा वर्तते। एतदुपरि किमपरमस्माकमानन्दस्थानम्? सर्वमिदमनन्तपद्मनाभप्रसादातिशयफलमिति तद्ध्यानपरायणा भवाम वयम्।

उक्तमिदमखिलमपि न केवलं भावनाविलसितं; किन्तु वस्तुतत्त्वम्। सकलमततत्त्वविज्ञानस्य जन्मभूमिरेव पौरस्त्यखण्ड इत्यत्र कस्यापि विप्रतिपत्तिर्न स्यात्। तत्रापि भारतवर्षमिदमध्यात्मविद्याकेदार इति वेदादीनामाकर इति बुद्धादीनां जन्मदेश इति च बहुसहस्रवर्षेभ्यः पूर्वमेव भुवनैकवन्द्यतामयासीत्। तत्र च श्रीपरशुरामक्षेत्रस्य केरलस्यैकदेशभूतमिदं वञ्चिभूमण्डलं भुवनगुरूणां सर्वज्ञानां श्रीमच्छङ्कराचार्यभगवत्पादानां जन्मना अलौकिकं किमपि स्थानमेवाद्यापि भजति। एवं परम्परया विशेषतया च समुपागतमिदमनन्याश्लिष्टं वैशिष्ट्यं शतगुणीकुर्वन् भगवान् श्रीनारायणगुरुदेवोऽशीतिवर्षेभ्यः पूर्वं स्यानन्दूरपुरस्यास्य समीपस्थं "चेम्पलन्ती" ग्रामं स्वजन्मना पवित्रतममकरोत्। तथैवेदं वञ्चिमण्डलस्य नानामुखं माहात्म्यमपरिमेयमपरि-

---

* इह स्यानन्दूरपुरे गते 'समस्तभारतीयपौरस्त्यविद्यापोषकपरिषदो' नवमे सम्मेलने श्रीमित् 'आर्. डि. रानडे' महाशयस्याध्यक्ष्ये प्रचलिते वेदान्तसदसि वाचितोऽयमुपन्यासः ॥

च्छेदं च कृत्वाऽत्र जेजीयते सनातनधर्मोद्धर्ता नवयुगकर्ता दिगन्तविश्रान्तकीर्तिरस्मन्महाराजः श्रीबालरामवर्मदेवः। पश्यन्तु चरितचिन्तनपराः, तत्त्वान्वेषणकुशलाः किमत्रान्यत्र दृष्टमित्यश्रद्धेयमनुपममिति वक्तुमशक्यं स्तुतिपरमिति परिहार्यं च ?। अखिलभारतीयानामध्यभिमानाविजृम्भकं समस्तस्य पौरस्त्यसंस्कारस्य मणिसदनं भूलोकस्वर्गस्य वञ्चिराज्यस्य हृदयं नवयुगप्रदीपकमिदं स्यानन्दूरपुरं समागतेयं परिषद्देवता च प्राप्तव्यं प्राप्तेत्यतिमुदमुपैष्यतीति विश्वसिमि। एतावदस्तु समाजसम्मुखीकरणं सामाजिकपदार्चनास्वरूपमामुखरूपम्।

सर्वेषामात्मसुखाधायकस्य धर्मस्य ग्लानौ सत्यां तस्य समुद्धारणार्थं युगे युगे सम्भविष्याम्यहमिति प्रतिज्ञां स्मरयन् भगवान् श्रीनारायणगुरुदेवः परिहार्यांशपरिहाराय पालनीयांशपालनाय पूरणीयांशपूरणाय चावतीर्ण आत्मनो जीवितस्य पूर्वार्धे तपसा आत्मीयां शक्तिं समुद्दीपयन् पश्चार्द्धेनाऽवतारकृत्यं च निर्वहन् नवभ्यो वर्षेभ्यः पूर्वमेव परमसमाधिमगच्छदिति विदितमेव सर्वलोकानाम्। सोऽयं महात्मा कथं स्वकृत्यं निरवहत्, किं वा तत् कृत्यमित्यादिकं तस्य मतं तत्त्वचिन्तां चाधिकृत्य किञ्चिद्विवरणमेवास्योपन्यासस्य विषयः। तत्र श्रद्धालुभिर्भवद्भिर्भाव्यमिति सम्प्रार्थ्य प्रकृतमनुसरामि।

मननशीलकुशला विवेचनावन्तो मनुष्या आत्मसुखं, तस्य पूर्णतां नित्यतां च सम्पादयितुं कृतयत्ना विज्ञानव्यूहस्य विविधानि शिखराणि समारूढवन्तो दृश्यन्ते। तत्फलतया ऐहिकादुपरि आत्मीयः कश्चिल्लोको नित्यतादिगुणसंपूर्णस्तैः संदृष्टः। तमिमं लोकं प्राप्तुं केचिन्मार्गाश्च तैर्लोकानुग्रहबुद्धिभिरभिप्रेताः। इमे अभिप्रायभेदा एवात्र मतशब्देनोच्यन्ते। सर्वे मतकर्तारश्च स्वस्वाभिप्रायाणां पारमार्थिकतां संस्थापयितुं प्रपञ्चमिममखिलं विशकलय्य "जन्माद्यस्य यतः" इत्यादिसूत्रोक्तदिशा उत्पत्तिस्थितिलयकारिणीं सच्चिदानन्दघनां ब्रह्मादिपदवाच्यां काञ्चन शक्तिं च समुद्घोषयामासुः। एवमस्य प्रपञ्चस्याधारभूतायाः स्वरूपभूताया वा शक्तेरेकतां पुरस्कृत्य प्रवृत्ताः सर्वेऽपि वादा अस्माभिरद्वैतपरा इतीह निर्दिश्यन्ते। उपनिषत्सु रूढमूलो ब्रह्मसूत्रादिभिरुपलालितोऽयमद्वैतसिद्धान्तः प्रथमं भगवता बुद्धेनैव प्रकाशं प्रापितः। "अद्वयवादी विनायकः" इति बुद्धपर्यायतया प्रयुक्तमिदं प्रमा-

णिकवाक्यमयमाशयः पूर्वमेव सुगृहीत इति ख्यापयति। श्रीबुद्धस्य गणनीयानामितरेषां च मतस्थापकानामाशयोऽभिलाषश्च परस्परमात्सर्यरहितं भेदभावनाशून्यं कमपि लोकमुत्पादयेदित्येवासीत्। मानवसमुदायस्य नानामुखे समुत्कर्षे निदानमद्वैतसत्यानुसारी "सर्वे वयं सहोदरा" इति समतामतिविशिष्टः सान्मार्गिकबोध इत्यत्र नास्त्यभिप्रायभेदस्यावकाशः। बोधममुं तन्मूलं तदुपनिबद्धं च जीवितं जनतामध्ये विकासयेदित्येवासीत् बुद्धाद्वैतस्य लक्ष्यम्। अतस्तदिदमद्वैतं प्राधान्येन सान्मार्गिकाद्वैतमथवा धार्मिकाद्वैतमिति व्यवहर्तु शक्यते। अयमेवासीदद्वैतमतस्य प्रथमो रङ्गः। द्वितीयरङ्गस्य प्रकाशकाः शङ्कराचार्यभगवत्पादाः। तेषामद्वैतं प्राधान्येन वैज्ञानिकाद्वैतमिति नाम्ना अभिधातव्यम्। तावत्पर्यन्तं संजातानि प्रधानानि तत्त्वशास्त्राणि मतशास्त्राणि च विमृश्य तानि सर्वाण्यद्वैततत्त्वपराणीति व्यवस्थाप्य तत्र पण्डितसम्मतिं सम्पादयितुमेवासीत् तेषां यत्नः। अधुनातनानामद्वैतचिन्तकानामप्येत एव प्रामाणिकाः। तदुभयमप्यद्वैतं (धार्मिकाद्वैतं वैज्ञानिकाद्वैतं च) जनानामैहिकजीवितस्य यावदंशेषु यदा संक्रान्तं स्यात् तदैव सार्वलौकिकसौभ्रात्रभासुरा सर्वजनीना शान्तिः समुदियात्। तदिदं कृत्यं निर्वोढुमेव भगवता श्रीनारायणगुरुदेवेन अद्वैतसिद्धान्तः समवतारितः। तेन तस्याद्वैतं तु प्रायोगिकाद्वैतमिति कीर्त्यते। अयमद्वैतस्य तृतीयो रङ्गः।

श्रीबुद्धशङ्कराचार्यप्रभृतीनां निरन्तरप्रयत्नफलाद् भारतीयाः सान्मार्गिकविश्वासस्यात्मीयज्ञानस्य च परं पारं प्राप्ताः। अस्मिन् विषयेऽन्यः कोऽपि न विसंवादी भविष्यति। तथापि जनसमुदायस्याचारेषु विचारेषु च भारते तादृशस्य विश्वासस्य ज्ञानस्य चानुगुणः कश्चित् स्वभावो न परिपालितो दृश्यते। अद्य तावदत्रावश्यं निर्वहणीयः कश्चित्तस्या न्यूनतायाः परिहारः। स्वार्थबुद्धयः पुरोहितास्तदनुयायिनश्च सम्प्रत्यपि तादृशान् दुष्टानाचारान् साधूकर्तुमेवाद्वैतमुपयुञ्जते। भगवान् श्रीनारायणगुरुदेवस्तमिममखिलं दोषं समूलकाषं कषितुमेवाद्वैतसिद्धान्तमवातारयत्। तत्त्वमिदमनुसन्धायैवायं महात्मा स्वजीवितमनैषीदन्यांश्च तथा जीवितुं प्रैरयत्॥

पुरा कदाचित् दुःस्थितिः काचित् भारतखण्डमिदं पराबभूव। ऋषिभिरुपज्ञातं व्यासादिभिः प्रपञ्चितं सनातनमखिललोकशर्मदायकं चरा-

चरादिभेदं विना सर्वत्र समताबुद्धिमुपदिशत् तत्त्वरत्नं ग्रन्थमात्रविश्रान्तं कृत्वा विद्याविचक्षणाः पुरोहितवर्गा मृगीयया स्वार्थतया प्रेरिता इतरजीविष्विव स्वसहोदरेष्वपि क्रौर्यमाचरन्तोऽधर्मेष्वतिदूरमभिरतिमकार्षुः। दुरन्तामिममधर्मं परिहर्तुमवतीर्णः स भगवान् बुद्धः स्वधर्मं प्रचारयामास। करणत्रयनिर्वाह्यामहिंसां कारुण्यपूर्णां समभावनां च परमनिर्वाणसाधनतयाऽयमद्वयवादी उपदिदेश। ग्रन्थान् प्रमाणीकृत्य यत्किमप्युपदिश्यते चेत् श्रोतॄणां बुद्धिः प्राधान्येनोपदेष्टारमुपदेशं च वर्जयित्वा ग्रन्थमुपेयात्। अपि चेयं बुद्धिः तस्य ग्रन्थस्यार्थबोधं विना याथार्थ्यं नैव गच्छेत्। यथार्थबोधमन्तरा उपदेशेषु विश्वासस्तत्र प्रवृत्तिर्वा श्रोतुर्न स्यात्। मनश्शास्त्रतत्त्वमिदमनुसृत्य भगवान् सर्वज्ञः श्रुत्यादीनामतिजटिलानामर्थावबोधद्वारा स्वोपदेशेषु साधारणानां जनानां विश्वासो भवितुमशक्यमिति सर्वभूतहिते रतस्सन् सर्वजनादरपात्राणामपि तेषां विषये मौनमवलम्ब्य सर्वं हृदि निर्धार्य धर्ममुपदिदेश। कारुण्यसान्द्राभिर्मधुरमधुराभिरद्वैतपर्यवसायिनीभिः शान्तिदायिनीभिस्ताभिरुपदेशधाराभिर्जनाः परमानन्दस्य परां कोटिमवापुः। तज्जन्या शान्तिश्च बहुशतवर्षान् भारतेऽविच्छिन्नप्रवाहा प्रावर्तत। एवं गच्छति काले रन्ध्रान्वेषिणः प्रतियोगिनो वेदानादर इत्येकं दोषं तन्मतोपरि समुद्घुष्य जनानां बुद्धिभेदं जनयामासुः, तद्द्वारा शान्तिमपि भञ्जयामासुः। श्रुतिविरुद्धमेव श्रीबुद्धमतमित्येवासीत् तेषां वादस्य संग्रहः। दोषमिमं निर्मार्ष्टुमेव शङ्करभगवत्पादाः प्रच्छन्नबुद्धाः समवतीर्णाः। श्रुतिगणगणितानन्यांश्च प्रामाणिकान् ग्रन्थान् व्याख्याय ते सर्वेऽद्वैततत्त्वप्रकाशका इति एवं बुद्धमतसारोऽपि श्रुतिसम्मत इति च तैः स्थापितम्। प्रतिवादिनो बुद्धमतानुयायिनोऽपि तैः पराजिताः। तत्फलतया भारतेऽस्मिन् बुद्धमतं सनातनमते निलीनं; बुद्धभगवांश्चादिनारायणस्य दशमावतारतयाऽङ्गीकृतः; विरुद्धाभिप्रायपालितं च मतमितो निष्कासितम्। एवमादिमबुद्धेनावतारितं, द्वितीयेन प्रच्छन्नबुद्धेन श्रुत्यादिगतमिति व्याख्यातमद्वैतं तृतीयबुद्धेन श्रीनारायणगुरुदेवेन सर्वेषामात्मसुखाधायकतया जीवितस्य यावदंशेषु यथायथा प्रतिफलेत् तथातथा प्रयुक्तम्। एवमद्वैतस्यावस्थात्रयमवतारकत्रयं च परस्परापेक्षं सत् कथं तस्य पूर्णतायै भवतीति चिन्तकैः सुविशदमवलोकनीयम् ॥

(सावशेषोऽयम्)

# ॥ धीररुक्मांगदम् ॥

(एकाङ्कनाटकम् )

K. RAMAKRISHNAN NAIR, ALWAYE.

[मध्याह्नसमयः—वनम् ]

(ततः प्रविशति विदूषकेनानुगम्यमानो मृगयाविक्रान्तो रुक्मांगदमहाराजः)

राजा—मौद्गल्य ! सत्यं नितरां परवशोऽस्मि क्षुधा पिपासया च । न पारयाम्यात्मानमपि धारयितुम् । (विचिन्त्य) अहो मे मूर्खता !

कठोरकरदारुणे ज्वलति भानुमत्यम्बरे
निरम्बुकठिने वने कुटिलयौवनोन्मादतः ।
वनेचर इवाचरन् कृपणजन्तुसम्पीडनं
प्रधावनपरिक्षतः परवशोऽस्मि दग्धस्तृषा ॥

विदूषकः—अत्रभवानेवं वदति; अहं पुनर्मध्याह्नोष्मान्धीकृतलोचनो न किञ्चिदपि पश्यामि । कथमपि पादं पुरश्चालयामि । नेतः परं मन्ये तदपि सुशकम् । (राज्ञः पादौ विलोक्य) ही ही भोः ! वयस्यस्य पादाद्रक्तं क्षरति । अभयमभयम् । भीतोऽस्मि ॥

राजा—न खलु भेतव्यम् । हन्त ! रक्तभीत एष ब्राह्मणवटुः ॥ (पादौ विलोक्य) सत्यं खलु मौद्गल्येन कथितम् । क्षतो मे पादः । (विचिन्त्य) अहो कालवैचित्र्यम् ।

तथाहि—

योऽहं समस्तरमणीरमणीयहस्त-
विन्यस्तशस्तकुसुमास्तरणे सगर्वम् ।
अन्तःपुरे सुरुचिरे व्यहरं स एव
गच्छामि कण्टकचिते विपिनेऽपि घोरे ॥

विदू—अहो विधेर्लङ्घनीयता। यदयमपि नाम राजाधिराजो रुक्मांगदः पिपासितस्सन्नेकाकी सलिलार्थं वने भ्रमति॥

राजा—वयस्य! न खल्वेवं विचारयितव्यम्। मया जलं स्वयमन्वेष्टव्यमेव। यस्मै मे,

स्मेराननाम्बुजलसल्ललितावलोक-
लीलाविलासरसलालसमानसाभिः।
वाराङ्गनाभिरभितः सुचिरोपनीतं
नारोचतातिमधुरं परिपेयदुग्धम्॥

विदू—वयस्य! कथमिदमुत्पन्नं ते मृगयाव्यसनम्। येनेदानीमेवंभूतोऽसि संवृत्तः।

राजा—वयस्य मैवम्। यतः

राष्ट्रस्य पालनधुरां सचिवे निवेश्य
निस्सीमदारपरिभोगपरा नृपालाः।
अन्तःपुरे खलु कपोतसमं वसन्तो
जानीयुरस्य भुवनस्य कथं प्रवृत्तिम्॥

अपि चैवंविधो मूर्ख आत्मीयमेकमपि विषयं भोक्तुमशक्नुवानः, अनन्तविषयपरिभोगलालसोऽतृप्त एव नरकं गच्छति। यथा अरोगदृढगात्रोऽपि पुरुषोऽमितभक्षणेन रोगवैवश्यं गच्छति॥

विदू—एष आश्वस्तोऽस्मि। परं तृषा शुष्यते मे कण्ठनालम्, क्षुधा च दह्यते ममोदरम्। तन्नातःपरं पारयामि पदमेकमपि चलितुम्। नाद्यापि दृश्यते कोऽपि कूपो वा सरो वाऽपरो जलाशयो वा (इति भूमौ पतति)

राजा—(विलोक्य) अये पतित एव। (दूरे विलोक्य) वयस्य उत्तिष्ठ। आगच्छ मया सह पञ्चषाणि पदानि। अनतिदूर एव दृश्यते कापि मरकतमञ्जुला पर्णशाला। तत्रैव गत्वा क्षुधां पिपासां च शमयामः॥

विदू—(विलोक्य) वयस्य! अतिदूर एव पर्णशाला। न शक्नोमि तत्र सम्प्राप्तुम्। तदेवं क्रियताम्। अत्रभवान् गत्वा पयःपायं पीत्वा पानीयं, कस्मिंश्चिन्नलिनीपत्रे किञ्चिन्मह्यमप्यानयतु। तावत्कालमहं (अङ्गुल्या निर्दिश्य) तस्मिन् वटमूले सुखं वत्स्यामि॥

**राजा**— (सनिःश्वासम्) एवं क्रियताम्। (अम्बरे विलोक्य) ललाटंतपस्तपत्ययं तपनः। वनजन्तवोऽपि न सहन्ते तीक्ष्णमातपम्। तथा च

अयं हि कठिनातपे व्रजति धूलिभिर्धूसरो
मदाम्बुमलिनाततव्रणितमस्तकोऽनेकपः।
तरुप्रकरभञ्जनप्रकटितप्रभावः सरो-
वरं किमपि मार्गयन्नतिखरोष्मसंतापितः॥

तद्वयस्य! सावधानमास्यताम्। अयमहमागत एव (इति गन्तुं प्रवृत्तः)

**विदू**—(सविचारम्) कथमत्रैकाकी वसेयम्। चलितुं न पारयामि च। भवतु। (प्रकाशम्) वयस्य! यदा बिभेमि तदा पद्भ्यामेव हरिणप्लुतैर्भवन्निकटमागमिष्यामि।

(इति कथंचिच्चलन् निष्क्रान्तः)

**राजा**—(परिक्रम्यावलोक्य च) इदमाश्रमद्वारम्। अहो अतिरमणीयोऽयं दर्शनीयश्चाश्रमः।

**तथाहि**—

हरितपर्णलतापरिवेल्लित-
द्रुमनिषण्णविषण्णशुकावलिः।
अलसमुग्धवधूपरिशीलन-
प्रवणचारुकुरङ्गसमाश्रितः॥

हरतीव मे लोचनमियं पर्णशाला। अस्याश्चान्तर्भागः—

मरकतमणिकान्त्या मञ्जुवल्लीमतल्ली
निचयदलविदूरीभूततीव्रोष्मसेव्यः।
सुविमलपरिमृष्टः स्वच्छमासृण्यगुण्यः
कलयति मम चित्तं निर्विकारं च शान्तम्॥

(उच्चैः) भोः! दीयतां किंचिज्जलमस्मै पिपासिताय।

(ततः प्रविशति वाचक्नविमर्दर्षिः)

वाच—(दृष्ट्वा) स्वागतं स्वागतमतिथये ।

राजा—भगवन्! रुक्मांगदो राजा प्रणमति । (इति प्रणमति)

वाच—(सानुग्रहम्) आयुष्मान् भव राजन् । हन्त मे भागधेयपारम्यम् । यन्महाराजरुक्मांगदो मेऽतिथिर्लब्धः । राजन्! अत्रासने उपविशतु भवान् ।

राजा—(उपविशति)

वाच—(उच्चैराकारयति) आर्ये मुकुन्दे!

(ततः प्रविशति कमनीयरूपसौभाग्या तरुणी मुकुन्दा)

वाच—प्रिये! अयमस्माकमतिथिर्महाराजो रुक्मांगदः । तत् सत्क्रियतां यथाविधि महाभागः । (राजानं प्रति) राजन् मध्याह्नस्नानाय प्रस्थितोऽस्मि । तत् सदयं प्रतिपालयतु भवान् होरार्द्धम् । अयमहमागत एव (इति सत्वरं निष्क्रान्तः)

मुकुन्दा—(सविलासम्) स्वागतं महाराजाय ।

राजा—वन्दे भगवतीम् ।

मुकुन्दा—(साभिलाषं निर्निमेषं च राजानं निरीक्षते)

राजा—मातः! पिपासितोऽस्मि, तद् दीयतां किंचित् स्वच्छशीतलं पानीयम् ।

मुकुन्दा—(समारोन्मादाम्) मधुरान्मधुरतरममृतमेव पास्यसि यदि भवतोऽनुमतम् । राजन्! पीयतामस्या अधरामृतम् ।

त्वादृशस्सुभग! मोहनरूपो
यावदद्य न मया समलोकि ।
येन मे हृदयमुन्माथितं नि-
ष्काममप्यतिदृढं मदनेन ॥

न खलु भवान् कश्चिन्मनुज इव प्रतिभाति । देवेन्द्रो मदनो वासि । पिपासिताऽस्मि नितरां मदनानलदग्धा । तद्दीयतामस्यै मधुरमधरामृतम् ।

राजा—(सस्मितम्) सुव्रते! किमित्यमुममलिनवृत्तिं जनं परीक्षसे । एतादृशैर्व्यामोहनदक्षैः कटाक्षैर्वचनैर्वा न मे मन ईषदपि स्खलति । तद् दीयतां मातर्जलम् ।

मुकुन्दा—(सानुनयम्) अयि सुमुख! किमेवं वदसि। त्वदासक्तचित्तामनूनयौवनां कामिनीं मातरित्याहूय किमिति पाप्मानं सम्पादयसि।

दग्धास्मि कामविशिखैः सविषैरतो मां
संजीवयाधरसुधारससेचनेन।
नो चेदियं कठिनमानस! ते पदाब्जे
सञ्चुम्ब्य दाहविवशैव मरिष्यति द्राक्॥

राजा—भद्रे मा मैवं रुक्मांगदमन्यथा मंस्थाः। (सदृढस्वरम्)

सौन्दर्यपुष्पवनिकामपि कामिनि! त्वां
न प्राप्नुयां जितमना अपरस्य दारान्।
व्यामोहने तु निपुणासि न मे विमूढे!
पञ्चाननस्य पुरतोऽपि यथेक्षुवल्ली॥

मुकुन्दा—(सगर्वम्) राजन्! धर्मवित्तमस्त्वं किमेवं वदसि।

यः कामिनीं त्यजति कामवतीं सुरूपां
यास्यत्ययं सह तया निरयं वराकः।
तस्मादिमां परिगृहाण मनोजबाण-
क्षतात्मिकां स खलु ते नृवरस्य धर्मः॥

राजा—आः! दुष्टे किं मां धर्ममुपदिशसि। रे कुटिलराक्षसि!

निश्शेषसाधुजनविश्वसितस्य पात्रे
तीर्थे यथैव खलु नक्रवधूस्सुदुष्टा।
तद्वच्छठे त्वमसि साधुविनाशदात्री
पुण्याश्रमे कृतकवेषयुतं वसन्ती॥

मुकुन्दा—(सबाष्पं सक्रोधपारवश्यं च) अरे रे चण्डाल! निरुपद्रवशान्तं काननमागत्य कूटसंगीताकृष्टां मृगीमुपवेध्य तद्रोदनं श्रुत्वा हसन् वनेचरस्त्वत्तोऽपि महत्तर इति मन्ये। यतोऽयमज्ञानी। त्वं तु धर्मिणंमन्यस्सन्नेवं करोषि। रे रे घातक! किमर्थं जलप्रार्थनाकपटेनात्रागत्य मे हृदयचोरणं कृतवानसि। निर्मलं दृढं च मे मानसं किमर्थं मथितवानसि। अथवा एष ते कुलधर्मः। यतः—

तरुणीमपि सुन्दरीं स्वपुत्रीं
जरठायाऽपि महर्षये प्रदाय ।
विलसंस्तव वंशजः सगर्वं
किमु जानाति निजात्मजाप्रवृत्तिम् ॥

अपि च रे दारेषु शूर! अहमपि कस्यचिन्नृपाधमस्यैवात्मजाता । अत एवाहमेवंभूतास्मि संवृत्ता । तेनैव सबहुमानं प्रापितास्मि जरठस्य विषयविरक्तस्यारसिकस्य वाचक्नवेः पत्नीपदवीम् । वयं खलु स्त्रियस्स्वत एव चपला अबला अस्वतन्त्रा, युष्माकं प्रजोत्पादनयन्त्राणि कस्मै पारयामः । जानीथ वा यूयं धर्मैकदेवता राजानः पुरुषा वा यदस्माकमपि हृदयमस्तीति ॥

अपिचेदानीं शृणु—

नाहं शूर्पणखा तदद्य निपुणं रामायसे किं वृथा ?
नाहं स्वर्गणिकोर्वशी च नृपते! पार्थायसे किं वृथा ?
तन्मां स्वीकुरुषे न यद्यनुपदं त्वां भस्मसात् कुर्वती
सोत्साहं निरयं गमिष्यति सदानन्दा मुकुन्दा द्रुतम् ॥

राजा—(सदार्ढ्यम्) मूढे! किं मां भीषयसि । रुक्मांगदोऽस्मि । न कश्चिदपरो भीरुर्विटो वा ।

अनार्ये पारदार्ये मे हृदयं याति नैकदा ।
गणेशपादभक्तं मां भस्मीकुरु यदीच्छसि ॥

तत्संनद्धोऽस्मि (इति कतिचित्क्षणान् निश्चलं स्थित्वा)

पिपासया सम्प्रति शुष्ककण्ठ-
नालोऽप्यहं नैव पिबामि नीरम् ।
यतस्त्वया दूषितया प्रदत्ता
सुधापि धूर्ते! विषतामुपेयात् ॥

तदितस्तूर्णमेव गच्छामि (इति गन्तुमुद्युङ्क्ते)

मुकुन्दा—(भूम्या उत्थाय) आः चण्डाल!

रे रे स्वतोऽलसतरां तरुणीं विनित्य
भूमौ निपात्य च गमिष्यसि कुत्र वा द्राक् ।
पादाग्रमर्दितकरालभुजङ्गमस्त्वं
स्वच्छन्दमद्य कथमालयमाप्तुमीशः ॥

(इति पुनरपि गृह्णाति । राजा भूमौ पातयति ।)

मुकुन्दा—(सक्रोधमुत्थाय) अरे रे स्त्रीषु शूर! दुष्टचण्डाल! त्वामहमिदानीमेव भस्मीकरिष्यामि (इति शप्तुमुद्युङ्क्ते)

(ततः प्रविशति क्रोधधूम्राक्षः प्रहसन् दुर्निरीक्ष्योग्रतेजा वेपमानाधरो महर्षिर्वाचक्नविः)

वाचक्नविः—ह ह ह! (इति हसित्वा) आःदुष्टे! राक्षसि!

निष्कल्मषं निरतिशायिगुणाकरं तं
रुक्मांगदं नरपतिं परिपातयन्ती ।

(मुकुन्दा तं दृष्ट्वा शापभीता ससंभ्रमं धावति )

दुष्टेऽत्र तिष्ठ सुकठोरकुठारघोरे !
हुं भस्मसाद्भव करालदुरन्तवृत्ते ! ॥

(मुकुन्दा भस्मावशेषा पतति शापाग्नौ )

राजा—(दृष्ट्वा ससंभ्रमम्) हन्त भस्मीभूतैव । हा मे पापविशेषः । हे भगवन् किं भवता क्रुद्धेन कृतम् । (इत्यश्रु विमुञ्चति)

वाच—राजन् मा भैषीः ।

प्रीतोऽस्मि ते महाराज वरमेकं मुदा वृणु ।
तद्दास्यामि न संदेहो यथेष्टं पृच्छयतां द्रुतम् ॥

राजा—(आलोचयति)

वाच—(मुकुन्दाया भस्म दृष्ट्वाश्रु मुञ्चति)

राजा—(मुनेर्मुखमश्रुसंकुलं दृष्ट्वा) भगवन् यदि प्रीतोऽसि तर्हीदमस्तु ।

भवतु सपदि शुद्धा सा मुकुन्दा सजीवा
भवतु च तव तस्यां निर्मलः स्नेहभारः ।

मम च भवतु भक्तिर्निष्कलङ्का गणेशे
विलसतु च कथैषा लोक आचन्द्रतारम् ॥

वाच—राजन् तथैवास्तु ।

(ततो मायिकश्चक्त्येव मुकुन्दा सजीवा भूत्वोत्तिष्ठति)

मुकुन्दा—भगवन्! मुकुन्दा प्रणमति (इति साष्टाङ्गं प्रणमति)

वाच—भद्रे! उत्तिष्ठ रुक्मांगदेनैव जीवापितासि । तत् प्रणम तत्पादपद्मे ।

मुकुन्दा—(राजानं प्रति) राजर्षे! मुकुन्दा प्रणमति ।

राजा—सुव्रते! उत्तिष्ठ। इदानीमेव नरकान्मुक्तोऽस्मि ।

सर्वेऽपि—

प्रलयपयोधिजले धृतवानसि वेदं
विहितवहित्रचरित्रमखेदम् ।
केशव धृतमीनशरीर
जय जगदीश हरे ॥

(यवनिका)

॥ शुभम् ॥

PRESENTED BY:
SRI M. K. VASUDEVAN NAIR
MANIYARA VEEDU
MALAYINKIL

# ॥ अनुमाननिरीक्षणम् ॥

K. PURUSHOTHAM PAI.

Siromoni Final.

सुविदितं किलैतद्विशेषां यत् जगति जनिमता सर्वेणाप्यवश्यं सम्पादयितव्येषु धर्मार्थकाममोक्षाख्येषु पुरुषार्थेषु चतुर्थोऽपि मोक्षः प्रथमतामर्हतीति । स च, ईश्वरज्ञानमन्तरा न संभवति । ईश्वरश्चराचरात्मकस्यास्य प्रपञ्चस्याधारभूतः कर्ता चेति संप्रतिपन्नमास्तिकमतानुयायिनाम् । तस्येश्वरस्य संज्ञायां स्वभावादिषु च बहवो बहुधा विप्रतिपद्यन्ते । स च, "शिव इति शैवाः, पुरुषोत्तम इति वैष्णवाः, पितामह इति पौराणिकाः, सर्वज्ञ इति बौद्धाश्च" संगिरन्ते । एवं सांख्यमीमांसकादयोऽपि विभिन्नप्रकारेण ।

नैयायिकास्तावदागमसिद्धमपि सर्वेश्वरं अनुमानप्रपञ्चेनापि प्रकाशयन्ति । आध्यात्मिकं हि सर्वमपि दर्शनमानुषंगिकतया विविधवस्तुजाततत्त्वं प्रतिपादयत्, प्राधान्येनात्मानात्मविवेचनजागरूकं परमात्मनः प्रबोधं जनयत् सार्थं कृतार्थश्च भवति । 'दृश्यते अनेन (आत्मतत्त्वं) इति दर्शनं' इति हि दर्शनशब्दस्य व्युत्पत्तिः । दर्शनानि च प्राधान्येन षड्विधानि—न्याय-वैशेषिक-सांख्य-योग-पूर्वमीमांसा-उत्तरमीमांसा-नामकानि । तानि च भारतेऽस्मिन्पुरातनादेव कालादारभ्य प्रथितानि विराजन्ते ।

तत्र न्यायदर्शनं गौतममहर्षिणा निर्मितं प्राथम्यमर्हति । "प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-छल-जाति—निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः" इति भगवान् गौतमः प्रारंभ एव सूत्रं प्रतिपादयन् सकलपुरुषार्थेषु सुतरां प्रशस्तस्य निःश्रेयसस्याधिगमोपायं निरपायमुपादिशत् ।

अन्धकारावृतस्य घटादेः पदार्थस्य प्रकाशको दीप इव सर्वस्यापि प्रमेयजातस्य प्रकाशकानि प्रमाणानि प्राथम्यमर्हन्तीति पूर्वोक्तसूत्रे प्रमाणानां प्रथमतो निर्देशः सूत्रकारेण साधु समाहृतः ।

तानि च "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" इति चतुर्धा विभक्तानि दृश्यन्ते। "जात्याकृतिव्यक्तयः पदार्थः" इति प्रकरणान्तरे सूत्रान्तरं कथयतोऽस्य ग्रन्थकारस्य प्रकृतसूत्रे विशेष्यविशेषणवाचकपदयोः समानवचनकत्वे नैर्भर्यं प्रत्यक्षानुमानोपमानशब्देषु विद्यमानं प्रामाण्यं विभिन्नमिति समर्थयति । अत एव—

"शक्तिर्निपुणता लोककाव्यशास्त्राद्यवेक्षणात् ।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ॥"

अस्याः काव्यप्रकाशकारिकायाः "इति त्रयस्समुदिताः हेतु"रिति व्याख्यां दर्शयतो ग्रन्थकारस्य शक्त्यादित्रितयनिष्ठं हेतुत्वमेकमेवेत्यभिप्रायः। अन्यथा हेतव इति प्रयुक्तं स्यात् ।

प्रकृते च चतुर्धा विभक्तेषु प्रमाणेष्वन्यतममनुमानं नाम प्रमाणं "अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत्सामान्यतो दृष्टञ्च" इति सूत्रेण विभक्तं दर्शितम् । अथ प्रत्यक्षनिरूपणानन्तरं निरूपणीयमनुमानं तत्पूर्वकं प्रत्यक्षपूर्वकं भवति। तच्च पूर्ववत्, शेषवत्, सामान्यतो दृष्टञ्चेति त्रिविधम्। पूर्ववदित्यत्र पूर्वशब्दस्य कारणवाचित्वात् कारणेन कार्यानुमानं प्रथमं "मेघोन्नतिं दृष्ट्वा भविष्यति वृष्टिरिति ।" शेषवदित्यत्र शेषशब्दस्य कार्यार्थकत्वात् कार्येण कारणानुमानं द्वितीयं "पूर्वोदकविपरीतमुदकं नद्याः पूर्णत्वं, स्रोतसः शीघ्रत्वञ्च दृष्ट्वा भूता वृष्टिरिति ।" सामान्यतो दृष्टं सामान्यमुखव्याप्तिदर्शनेन प्रवृत्तमनुमानं तृतीयं यथा "अन्यत्र दृष्टस्य पदार्थस्यान्यत्र दर्शनं व्रज्यापूर्वकमिति सामान्यमुखव्याप्त्या तादृशस्यादित्यस्यास्ति व्रज्येति ।"

एतच्चानुमानं प्रकारान्तरेणापि विभागमर्हति स्वार्थं परार्थञ्चेति । परार्थानुमानस्य प्रयोजकं पञ्चावयववाक्यं न्याय इत्युच्यते। शास्त्रान्तरापेक्षया न्यायस्य प्राधान्येन प्रपञ्चनात् न्यायशास्त्रमिति प्रथापि जागर्ति । ये न्यायमधीयते विदन्ति वा ते नैयायिकाः। ते किल प्रमाणान्तरेण ज्ञातमपि सकलं वस्तु शंकाकलङ्कनिरसनायानुमानेनापि सुदृढं साधयन्ति । प्रायशः सर्वस्यापि दर्शनस्य परमात्मनिरूपण एव परमनैर्भर्यमिति पूर्वमेव मया निरदर्शि ।

न हि सर्वज्ञं सर्वशक्तञ्च कमपि कर्तारमन्तरा लोके चराचरात्मकस्यास्य प्रपञ्चस्योत्पत्तिर्भवितुमर्हति । यस्य व्यवस्थामनुसृत्य सरितां पतिरणुमात्रमपि वेलामनुल्लंघयन्निजमर्यादां परिपालयति, येन नियमितः सूर्यचन्द्रादीनां ग्रहाणां गणोऽणीयोऽपि व्यतिचलनं नालम्बते, यस्याज्ञया यथासमयं वर्षति देवो, हृष्यति वसुधा, वर्धते सस्यं, समेधते धान्यं, जीवामो वयं, तं सर्वेश्वरं चार्वाकमन्तरा को नाम मेधावानवगणयेत् । तत्तादृशमहिमानं परिपावनजनवेद्यमनुमानसाध्यं वदन्तो नैयायिका जगतामेव शुभं भावयन्तो भान्तुतमाम् ॥

# ॥ कालिदासस्य नाटकत्रयम् ॥

M. MADHAVAN UNNI
Vy. Siromony IV.

( पूर्वतोऽनुवृत्तम् )

बीजश्चात्र नाटकवस्तुनः शकुन्तलायां राज्ञो रतिः । अनुरागरूपमिदं बीजं प्रथमाङ्के प्रक्षिप्तम् । "अधरः किसलयरागः" इत्यादिकमारम्भनामिकां प्रथमावस्थां दर्शयति । आरंभस्य बीजस्य च संकलनेनाद्येऽङ्के मुखसन्धिः । "माढव्य ! अनवाप्तचक्षुःफलोऽसि" इत्यादिना प्रतिमुखसन्धिरुपक्षिप्तः । पञ्चमेऽङ्के गर्भसन्धिर्नायिकस्य नायिकाविषयकविस्मृतेः कारणावबोधे चोपसंहृतिः ।

चिन्ताविषादादिभिः सञ्चारिभावैर्नायकस्य रतेः परिपुष्टतां निर्वर्ण्य, द्वितीयेऽङ्के संभोगपुष्ट्यर्थं विप्रलम्भमाविष्करोति । विदूषकवचनेषु प्रायशो हास्यो रसः । राज्ञा तत्परित्यागः "परमार्थे न न गृह्यता"मिति वचनश्च महदुपकरोति पञ्चमाङ्कगतस्य विप्रलम्भवर्णनस्य । "परमार्थे न ने"त्यत्र परमार्थेनैवेत्यप्यर्थः । अतश्च मिथ्येति भासमानेऽपि महीयसां वचने सत्यतान्तर्भवतीति विज्ञायते ।

तृतीयेऽङ्के पूर्वविप्रलम्भशृङ्गारः प्रधानो रसः । संगतयोर्नायिकानायकयोर्विघटनार्थं महदुपकरोति गौतमीप्रवेशः । विष्कम्भेन चादावङ्कस्य वस्तु निर्दिश्यते । अन्योन्यदर्शनाङ्कुरितस्यानुरागस्य दार्ढ्यं प्रकाशयति "अन्यथाऽवश्यं सिञ्चतं मे तिलोदकं" इति शकुन्तलावचनम् । "जाने तपसो वीर्यं" इति पद्येनपदशः प्रतिपाद्यते राज्ञोऽनुरागस्थिरता ।

न काप्यन्या प्रियसखी संभवेज्जगति याऽनसूयाप्रियंवदासमाना । औचित्यबुद्धिः, समर्थता, लौकिकेषु पौराणिकेषु च ज्ञानं, सखीस्नेह इत्यादयो गुणाः कालिदासतूलिकाकल्पितयोरेतयोर्निसर्गजाः ।

"बहुवल्लभा राजानः श्रूयन्ते । यथा नौ प्रियसखी बन्धुजनशोचनीया न भवति तथा निर्वर्तय" इत्यनसूयाया उक्तौ, का वाऽर्थस्यागाधता, को वा लोक-

परिचयः सखीस्नेहश्च । अवसरोचिता तयोः प्रवृत्तिर्यन्मृगपोतकं मात्रा योजयितुम् । विनोदकालेषु सख्यौ, आपदि बन्धू च भूत्वा शकुन्तलायै बहूपकारं कृतवत्यावेते न कदापि निष्क्रामतः पठितृजनमनोवेदितः ।

'शाकुन्तले चतुर्थोऽङ्कः' इति सहृदयसम्मतेऽङ्के शकुन्तलाया भर्तुः समीपयापनरूपं कथावस्त्विति विज्ञापितपूर्वमेव । अस्मिंश्चाङ्के प्रधानः करुणो रसः । कण्वशिष्यस्येदं प्रभातवर्णनं "यात्येकतोऽस्तशिखर"मित्यादि किमप्यगाधं लोकतत्त्वमुद्भावयति; जगत्प्रकाशकारणयोर्महतोरपि सूर्याचन्द्रमसोरीदृशी समवस्था समापन्ना, किमुत सांसारिकाणां पुरुषाणामिति । "यास्यत्यद्य" इत्यादिपद्येन च पुत्रीवियोगविधुरस्य कुलपतेः मनोवैक्लव्यं वर्णयति कविः । सर्वसंगपरित्यागिनां तत्त्वज्ञानामप्यच्छेद्योऽपत्यस्नेहपाशः । निर्गलत्यस्माच्चानर्गलं शुद्धा निर्वृतिदा शान्ता च काऽपि स्नेहनिर्झरिणी । "शममेष्यति—" इति कण्ववचने कस्य वा सहृदयस्य हृदयं न करुणानदीनिमग्नं भवेत्, कस्य वाऽङ्गानि रोमाञ्चितानि न स्युः, कस्य वा नयनाभ्यामश्रुनिर्झरो न विनिर्गच्छेत् । एवं दुःखितोऽपि स तत्त्वज्ञः "अर्थो हि कन्या परकीय एव" इत्यन्यतः समाधत्ते । लतानां वृक्षाणां मृगाणां च निसर्गसुन्दरः स्नेहस्तत्र तत्र प्रकाशते । गृहिणीधर्माः सर्वेपि प्रतिपाद्यन्ते "शुश्रूषस्व गुरून्" इत्यनेन पद्येन । एते च गुणा गुरुशुश्रूषणादय उत्तमानां गृहिणीनां स्वाभाविकाः, एतानुच्छिद्य या वर्तन्ते ताः समूलघातं कुलं घ्नन्तीति कोऽसावस्य महाकवेरुपदेशः । "यौवने विषयैषिणा"मिति रघुवंशोक्तमनूद्यते "भूत्वा चिराय"त्यत्र । "तात! कदा नु भूयस्तपोवनं प्रेक्षिष्य"इति रुदन्तीं प्रियपुत्रीं प्रति कण्ववचनमिदमुज्ज्वलतमं धर्मशास्त्रानुकूलं प्रकाशते । महायोगिनामप्यजय्यो निर्मलः स्नेहः, स च सात्त्विकी अनिर्वर्जनीया च कापि मनोवृत्तिः—अनेन च सर्वानपि लोकान् वृक्षलतादीनपि वशीकर्तुं शक्यते । विवेकशून्यानां मृगाणामप्यीदृशी मनोवृत्तिर्दृश्यते । यथा "यस्य त्वया व्रणविरोपणमिङ्गुदीना"मित्यस्मिन् पद्ये । तादृशं स्निह्यन्ती शकुन्तला कथं वा न रुध्येत स्वपुत्रकल्पेन मृगपोतकेन, कथं वा स शिशुः शकुन्तलावियोगे दुःखितो न स्यात् । सकलचराचरहृदयज्ञस्य महाकवेः कल्पनाकौशलेन सतेजाः प्रकाशते चतुर्थोऽङ्कः । अस्मिंश्चाङ्के प्रधानः कुलपतिः, एकदैवास्य प्रवेशो रङ्गे । नाटकरङ्गान्निष्क्रान्तोऽपि स नापसरति शाकुन्तलं पठितॄणां मनोरंगात् ।

पञ्चमेऽङ्के रेखामात्रमपि धर्ममार्गादस्खलतो राज्ञो वचनेषु कीदृशी गंभीरता, अगाधता चेति सश्रद्धं पठितॄणां हृदयमेव प्रमाणम् । गान्धर्वेस्वीकृतां शकुन्तलां विस्मृत-

ततोऽपि "अभिनवमदलोलुप" इत्यादिगानरूपेण मधुकरसंकीर्तनेन संघट्टितं राज्ञो हृदयं सोत्कण्ठमिति स्पष्टीभवति "किं खलु गीतार्थमाकर्ण्ये" त्यस्मिन् भागे। अनुस्मरणीयमत्र "मनो हि जन्मान्तरसंगतिज्ञ"मिति। "अनिर्वर्णनीयं हि परकलत्रमिति" राज्ञो वचनं तस्य वशित्वस्य, असाधारण्या धर्मनिष्ठायाश्च मुकुटोदाहरणम्। विवाहानन्तरं पितृगृह एव वसन्तीं स्त्रियं, जना अन्यथा कथयेयुरिति प्रकटीकुरुतेऽत्र "सतीमपि ज्ञातिकुलैकसंश्रया"मिति शार्ङ्गरववचनम्। मृगशिशोर्दीर्घापाङ्गस्य कथाऽतिमनोहरा; परिचयः स्नेहो विश्वास इत्यादयो गुणा मृगाणामपि सन्तीति प्रकटमस्मिन् भागे। "अतः परीक्ष्य कर्तव्यं विशेषात्सगतं रहः" इतीयं सूक्तिः परिचिता स्वादनेकासामनालोच्य विवाहितानाम्। एवमर्थगंभीरतयानुभवसंविस्संवेद्यतया चानर्घां पुष्टिमप्रतिमं सौन्दर्यश्चावहन्ति तत्र तत्र सूक्तयः। तथ्यानां मुनिवचनानां जाग्रतामपि नायकस्य शकुन्तलाप्रत्याख्यानं तस्य विपुलं स्थैर्यं, निरङ्कुशां धर्मनिष्ठताञ्च प्रतिपादयति। षष्ठेऽङ्के वर्णयिष्यमाणस्य विप्रलंभवर्णनस्य बहु पोषकाणि राज्ञः प्रतिकूलवचनानि।

षष्ठेऽङ्के शृङ्गारवीरकरुणरौद्रा वर्णिताः। तत्र शृङ्गारस्योत्तरविप्रलंभस्य प्राधान्यं, इतरे चाङ्गभूताः, सार्थवाहप्रस्तावे करुणः, मातलिसंगमे वीररौद्रौ च। कथामर्मभूतमङ्गुलीयकवृत्तान्तं वर्णयत्यङ्के पूर्वस्मिन् भागे। "सहजं किल यद्विनिन्दितमि"तीदं "सहजं कर्म कौन्तेय सदोषमपि न त्यजे" दित्यनेन गीतावचनेन सादृश्यमावहति। अनुभवितव्यं स्वकृताधर्मफलमिति कापि महनीया शिक्षा राज्ञः पश्चात्तापः, परिपोषयन्ति च पश्चात्तापं पूर्वं शकुन्तलां प्रति स्वव्याहृतानि वचनानि, तासु तास्ववस्थासु प्रियपत्न्या प्रकटिता मुखभावाश्च। प्रकटयतीद"मितः प्रत्यादेशा"दिति पद्यं पश्चात्तापस्य मूर्धन्यताम्। एवं कालमेघदर्शनेन वर्धिततरंगनिकरः पयोधिरिव सञ्जातं राज्ञः कारुण्यं हठादाकर्षति मातलिप्रवेशः।

दानवविजयेन सन्तुष्टेनेन्द्रेण सबहुमानं पूजितो राजा इन्द्रपुरान्निर्गच्छन् कश्यपाश्रमं प्रविशति। अत्र "प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः" इति रघुवंशोक्तमनुसंधेयम्। अनेन च महनीयेन कृत्येनोपपन्नौ पत्नीसमागमः सत्पुत्रलाभश्च। अज्ञात्वाऽपि स्वपुत्रत्वेन बालकं तद्दर्शने कोऽपि स्नेहप्रभावो राज्ञो हृदये लीनः बालव्यवहारैः क्रमेण विकासं प्राप्नोति। उत्तररामचरिते कुशलवसंदर्शने श्रीरामस्येवात्र राज्ञोऽ-

वस्थान्तरं, अत्र कालिदासभवभूत्योः कल्पनानि सुतरां मनःशास्त्रानुसारीणीति विभावनीयमेतत् । "महतस्तेजसो बीजं" इति पद्यं बालकस्य भविष्यन्माहात्म्यातिरेकं प्रकटयति । सर्वदमन इत्याख्या समुचितैवेति प्रवेशेनैव वर्णयति "अर्द्धपीतस्तनं मातु-" रित्यादिना । कश्यपवचनेनावगतो नायिकानायकयोर्दुर्वाससः शापः, अनेन च स्वभर्तुर्वास्तविके स्नेहे विश्वस्ता भवति शकुन्तला, राजा तु पुत्राप्त्या सन्तुष्टश्च भवतीत्युपसंह्रियते सप्तमाङ्कः ।

अत्र च श्रद्धा कार्या, गंभीरस्य कस्यचित्तपोनिधेः पुण्याश्रमादारभ्यान्यस्य कस्यचिन्महामुनेः प्रशान्तरमणीय आश्रमपदे वस्तूपसंह्रियते महाकविनेति। आश्रमाद्राज्ञः शकुन्तलाप्राप्तिः, नगरगमनाच्च तस्या असंनिधिः, पुनश्चाश्रमपदात्प्राप्तिरित्यनेन च नगरवासादापदः पुण्याश्रमसंसर्गेण सज्जनसंपर्केण श्रेयांसि च संभवन्तीति तत्त्वदृष्ट्या बोद्धव्यम् ॥

(क्रमशः)

॥ श्रीः ॥

# ॥ नाटकद्वयम् ॥

M. R. Kesava Ganakan

Sahithia Mahopadhyaya III Class.

सर्वतो विसंष्ठुले विचित्रेऽस्मिन्भूमण्डले, अकलिताः कालेन, अदृष्टा अनित्यतया, अनवगता अभावेन, अतन्त्रिता नियतियन्त्रणया, अरूषिताः संसारदोषेण, पुण्यजन्मानः कतिपये पुरुषधौरेयास्तदा तदा जगदिदमात्मना मण्डयन्तीत्यतिशोभनोऽयमस्माकममृतवर्षसमुत्कर्षः ।

ते किल महात्मानः स्वतन्त्रा मनसीव वचसि, कलितमतयः कवितावविलासे कीर्तिभासे यशोमये काये च रक्ताः, विरक्ताश्च भूतनिकाये, सततसमुज्ज्वलेन स्नेहैकसारेण सर्वातिशायिना नित्येन शब्दाह्वयेन ज्योतिषा भुवनमिदमन्धतमसादभिरक्षन्तः परेषामपि मार्गदर्शिनो महर्षयो महाकवयश्च महीतलमिदमलमकार्षुः ।

एषु भुवनविदितेषु कविकुलधौरेयतामावहत्स्वपि पण्डितप्रकाण्डेषु प्राथम्यमर्हतस्तत्रभवन्तौ भवभूतिकालिदासाविति विदितमेव नितरां सुचेतसाम् ।

प्रतिभाविलासलसितानि नैकशो भुवनप्रसिद्धानि काव्यानि ताभ्यां कृतानि लोकेऽस्मिन् सुविभान्ति । तत्र भवभूतेरुत्तररामचरितं कालिदासस्य शाकुन्तलमिति नाटकद्वयमेव यथाक्रमं करुणशृंगारादिरसप्राधान्येन विश्वविख्यातं भवति ।

"उत्तरे रामचरिते भवभूतिर्विशिष्यते"—

"कविता कालिदासस्य तत्र शाकुन्तलं मतम्" इत्यस्ति काचित्प्रशस्तिः । तामिमां प्रशस्तिमनुसृत्यात्रोपन्यासितुं यतिष्ये ।

प्रपञ्चेऽस्मिन् ब्रह्मणः कर्मकलाप इव काव्यप्रपञ्चेऽपि कवेरनितरसाधारणी काचिदनिर्वचनीया सृष्टिवैखरी भावनापरिणता सर्वत्र भासते । एवञ्च भावनावैशिष्ट्येन, कल्पनावैचित्र्येण, आशयगांभीर्येण, पदमाधुर्येण च

भवभूतिकालिदासयोर्नाटकद्वयमेव रसावहं भवति सहृदयानां। श्लेषप्रसादादयःसर्वेऽपि दण्डयुक्ताः काव्यगुणास्समुल्लसन्त्यस्मिन्।

"काव्यात्कर्तव्यताधीः सरसा। अन्यत्र न तथा"—किञ्च;

"यद्वेदात्प्रभुसंमितादधिगतं शब्दप्रधानाच्चिरम्
यच्चार्थप्रवणात्पुराणवचनादिष्टं सुहृत्सम्मितात्।
कान्तासम्मितया यया सरसतामापाद्य काव्यश्रिया
कर्तव्ये कुतुकी बुधो विरचितस्तस्यै स्पृहां कुर्महे॥"

इत्युक्तप्रशंसायाश्च ज्ञानद्वारा हृदये चमत्कृतिं जनयित्वा सदसद्विवेचनशक्त्युत्पादनाद्धेतोरेव समुदिता सेयमुक्तिः। सन्त्येतादृशानि गुणविशिष्टानि मधुरतमानि काव्यानि बहूनि गैर्वाण्याम्। यदवलोकनेन द्वीपान्तरस्था अपि विद्वांसो विस्मिता भवन्ति। सत्काव्यपाठेन काचिदनिर्वचनीया रसस्फूर्तिराविर्भवति। अत एव—

"सुभाषितरसस्याग्रे सुधा भीता दिवं गता"

इति प्रशंसितमभियुक्तैः। काव्यार्थानुसन्धानेनैवसततं सुखमनुभवन्ति सुमनस इति प्रत्यक्षीभवति। तदिदं काव्यामृतं लोकज्ञानसंस्कृतचेतसां सुनिपुणमालोचयतां रसिकानां सर्वाण्यपि काव्यान्यतिक्रम्य भवभूतिकालिदासयोरुत्तररामचरितशाकुन्तलयोस्समग्रमास्वाद्यतमं वर्तत इति परं मोदस्थानमस्माकं गैर्वाणीभक्तानाम्।

ताभ्यामप्याभ्यां कविभ्यां स्वकृतिषु सर्वत्रापि निर्मलं प्रेमस्वरूपमेव चित्रीकृतम्। तत्रास्ति महान्भेदः परमनयोः। अलौकिकोऽयं भवभूतिः। कालिदासस्तु केवलं लौकिक इति प्रकृतनाटकीयप्रेमप्रतिपादनेन समर्थयितुं शक्यम्। अथापि नाटकयोरनयोः कथाघटनायां महदस्ति सादृश्यम्। उभाभ्यामपि पद्मपुराणादेव स्वीकृतमितिवृत्तम्। उभयत्राप्युभयोरपि नायिकानायकयोः प्रथमं ससुखं वासः, आसन्नप्रसवकाले परित्यागः, परित्यागात्परं दैविकमन्तर्धानं, आश्रम एव पुनस्समागमः, पुनस्समागमश्च पुत्रहेतुक इत्यादिकमखिलं समानमेव। किन्तु; उत्तररामचरिते सीतापरित्यागस्य जनाप-

वाद एव हेतुः। शाकुन्तले तु शकुन्तलापरित्यागस्य दुर्वाससः शाप इति परं भेदः। सीतादेवीं घोरारण्ये सन्त्यजति भवभूतिः। शकुन्तलां पुरोहितगृहे वासयति कालिदासः। अनेन दुष्यन्तस्य शकुन्तलायामासीत्पातिव्रत्यशङ्का न खलु रामभद्रस्य तादृशी शङ्केति च प्रतीयते। अत्रैव सुस्पष्टमनयोः प्रतिभावैशिष्टयम्। तदस्तु; परन्तु उत्तररामचरितस्य किं वा वैशिष्टयं तद्द्वारा भवभूतेरुत्कर्षश्च कथमिति किञ्चित् पश्यामः। यद्यपि वाल्मीकिरामायणे प्रतिपादितमितिवृत्तमेव भवभूतिनांगीकृतं तथापि नाटकेऽस्मिन्नुत्तररामचरिते चित्रदर्शनं, अन्तर्नाटकं, वासन्तीनिवेशनमित्यादयः संपूर्णरसाः प्रशस्ततमाश्च भागा वाल्मीकिमतिक्रम्य निवेशिताः स्वकपोलकल्पिताः कविना। अलौकिकमतिसुन्दरं निर्मलं प्रेमस्वरूपमेव दरीदृश्यतेऽस्मिन्सर्वत्रापि। भावगांभीर्येण, रसानुगुणपदविन्यासेन, प्रेमप्रकर्षप्रभावेण च यन्न तुलामावहति तदेव भुवनमोहनमुत्तररामचरितमिति विदुषां समयः। परिणतप्रज्ञानां सहृदयानां सुसंवेद्य आस्वाद्यश्च वरीवर्त्यस्मिन्साहितीमकरन्दः। केवलं भौतिकमेव कालिदासस्य प्रेष्ठं प्रेम इति मे प्रतिभाति। तत्रेदमेव प्रमाणम्। अव्याजमनोहारिणीमाश्रमललामभूतां तां शकुन्तलां दृष्ट्वा—

"अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रनाविद्धं रत्नं मधु नवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः॥

इति विचिन्त्य तस्यामनुरक्तो दुष्यन्तः परमनेनाश्वसिति।

(क्रमशः)

॥ श्रीः ॥

# "आर्याः कुतश्चिदपि नागताः"

K. E. Gopala Pillai, Kurissery.

"गतानुगतिको लोको न लोकः पारमार्थिकः ।"

न दृश्यन्तेऽस्माभिः पारमार्थ्येनानुपपत्तिधूमिकाजटिलेषु पुटेषु चरित्रग्रन्थानां भारतीयचरितानि पुरातनानि । तथापि प्रचलति जनता गड्डरिकाप्रवाह इव चारित्रकाभिप्रायप्राये प्रायो भारतवर्षजीर्णगिरितटे परकीयासूयाग्निदग्धानि नैजानि याथार्थ्यफलान्युपचेतुम् । किन्तु गतानुगतिकता कस्यचिदपि पारमार्थ्यं जनयितुमशक्ता । अत उपपन्नमेतादृशानामैतिहासिका—(चरित्रकारा)भिप्रायाणां पुरतो दूरतो गत्वाऽवलोकनम् ।

एतादृशस्य विवादस्यास्थानं भारतं कीदृशमासीदित्युन्नयति ब्रह्मवैवर्तपुराणम्—

यथा—

कर्मणां फलभोगं च सर्वेषां सुरसुन्दरि ।
नैव स्वर्गे न पाताले नान्यद्वीपे श्रुतौ श्रुतम् ॥

कृत्वा शुभाशुभं कर्म पुण्यक्षेत्रे च भारते ।
अन्यत्र यत्फलं भुङ्क्ते कर्माकर्मनिबन्धनात् ॥

हिमालयादासमुद्रं पुण्यक्षेत्रं च भारतम् ।
श्रेष्ठं सर्वस्थलानाञ्च मुनीनाञ्च तपःस्थलम् ॥" इति

यत्र जन्म लब्ध्वा—

"—महत् पुण्यं स्वर्गं गच्छति पुण्यवान् ।
गृहीत्वा स्वर्गकन्याश्च चिरं स्वर्गे प्रमोदते ॥
स्वर्गमागच्छति नरो विहाय मानवीं तनूम् ।"

अहो! ईदृशस्य भारतस्य माहात्म्यं तस्या मातुरौरसपुत्रेभ्यो दातुं विमनस्कतया अज्ञतया वा सङ्कल्पितदत्तपुत्राशिरसामुपरि क्षेप्तुं प्रयतन्ते चरित्रकारा इत्येतन्न सोढुमस्माभिः शक्यते ।

एते पूर्विका भारतीयाः कथं कस्मिन् काले कुतो देशादागता इति पूर्वोक्ताश्चरित्रविदोऽभिप्रयन्ते ? प्रथमतस्तदवलोकयामः। तेषां मते—आर्या मध्यैष्यातः क्रिस्तोः पूर्वं १५००—२००० तमवत्सरासन्नकाले काबूळ्नदीद्वारा आगत्य 'कैबर' विदरमार्गेण भारतं प्रविश्याध्यवसन्निति दृश्यते। केऽपि तत्रैव 'आक्षिका'(आक्स्)नदीकूलं, 'सैबीरिया'राज्यञ्च तेषां जन्मस्थानमिति विचारयन्ति। केषाञ्चनान्येषां मतम्, ते किल 'यूरोप्'खण्डस्य एष्याभूखण्डस्य च मध्ये आसान्निति। एते चरित्रोक्ता आर्याः प्रविश्यार्यावर्तं केवलं मृगप्रायान् तत्रत्यान् विद्राव्य, स्वपरिष्कारमयूखांस्तत्र क्रमेण भारतमभितः प्रसारयामासुरित्येव चरित्रकारमतम्।

अस्तु तावत्तत्र मध्यैष्यायामेव मानवसमुदायः प्रथमतोऽजायतेत्यत्र, मानुषसंस्कारसम्पत्तिस्तत्रैव प्रथममुदभूदित्यत्र, इतरभूभागस्याऽसंस्कारकल्पनायाश्च का युक्तिः ? तत्र तेषां चरित्रकाराणामुपपत्तिः केवलं मूकतैव। अतिप्राचीनकाले भारतमधिवसन्तो जनाः के ? कीदृशाः ? इति सम्यगवगन्तुं न शक्यत इति ते स्वयं वदन्ति च *। अथवा शङ्के वक्तुं पारयेत् स चरित्रकारसंघः—यत्, स्वर्गतः प्रजाः प्रजापतिः सृष्ट्वा यूरोप्–एष्याखण्डयोर्मध्य एव "पारचूट्"(Parachute) द्वारा प्रथममवातारयदिति। भवतुः चारित्रकाभिप्रायस्योपपत्तिरस्ति न वेति विचारयामः—

"The immigration of the Aryans into India must have commenced about fifteen hundred years before the birth of Christ (History of India By C. F. Dela Fosse. M. A.)

भारतीयचरित्रग्रन्थेषु पाश्चात्यैर्निर्मितेष्वस्त्यस्य ग्रन्थस्य प्राधान्यमिति मन्ये। प्रायोऽमुमुपजीव्यैव रचिता इतरे भारतीयचरित्रग्रन्था इत्यनुमातुं तेषामभिप्रायसादृश्यं साहाय्यमारचयति। क्रिस्तोः पूर्वं २०००—१५०० तमवर्षासन्नकाल आसीदार्याणामत्र प्रवेशकाल इति विचारयन्ति ते चरित्रकाराः। अनन्तरमेव भारते परिष्कृतिस्समजायत, वेदाश्च प्राकाश्यन्त इति॥

(क्रमशः)

* "ഇൻഡ്യയിൽ ഏററവും പുരാതനകാലത്തു് വസിച്ചിരുന്നവരെ സംബന്ധിച്ചിടത്തോളം നമുക്കു പൂർണ്ണമായ അറിവില്ല." (തി: രു: ക: ഉണ്ടാക്കിയ ഇൻഡ്യാചരിത്രം Part 1 Page 2.)

॥ श्रीः ॥

# *॥ भावनापुरुषोत्तमनाटकम् ॥

## ॥ प्रथमोऽङ्कः ॥

स्वस्त्यस्तु श्रेयसे वः सदसि दिविषदां क्षीरसिन्धुप्रदेशे
देवानन्यानुपेक्ष्य द्रुहिणहरमुखान् दैवतस्तब्धबोधान् ।
नित्यानन्दप्रबोधं निरवधिकगुणं नैगमज्ञानगम्यं
स्वच्छन्दं पर्यणैषीच्चिदचिदवयवं शेषिणं या मुकुन्दम् ॥

अपि च—

श्रीमत्पद्माक्षवक्त्राम्बुरुहपरिचलच्चञ्चरीकायितानि
व्रीडाशृङ्गारभङ्गीव्यतिकरसुभगंभावुकस्पन्दितानि ।
आख्याताकूतमर्माण्यधिविबुधसभं श्रीकटाक्षाङ्कुराणि
श्रेयस्तत्तादृशं वः स्मरविजयमहासाधकानि क्रियासुः ॥

(नान्द्यन्ते)

**सूत्रधारः**—(परिक्रम्यावलोक्य च)

मध्येकौस्तुभमात्मनः प्रतिकृतिं दृष्ट्वा पराशङ्कया
कोपेनानतकन्धरा पदनखादर्शे पतिं बिम्बितम् ।
मत्वा पादनतं प्रहृष्य कुतुकादाश्लिष्य तज्जानती
सव्रीलस्मितमौनबन्धुरमुखी श्रीरस्तु वः श्रेयसे ॥

(इति पुष्पाञ्जलिं विकीर्य नेपथ्याभिमुखमवलोक्य)

आर्ये किमिति विलम्ब्यते। अद्य खलु विकसितानि विविधविधेयस्य भरतकुलभागधेयस्य ।

**नटी**—(प्रविश्य, सादरं) अय्य कहं विअ ।

**सूत्रधा**—अहो महती भवदीयकुतूहलपरिणतिर्मदीयकरणीयनिर्वहणतायाम् । इदमाकर्ण्यताम् । अस्ति खलु निस्तुलनिजवितरणगुणनिरस्तसमस्तस्वस्तरुप्र-

---

* महाकविभिः उळ्ळूर् एस्. परमेश्वरार्यैः "श्रीचित्रा"यां प्रसिद्धीकरणाय दत्तमिदं प्राचीनमेकं नाटकम् ।

शस्तिविस्तारश्रीकर्णाटकसिंहासनप्रतिष्ठापकाचार्यः सेवावनतनिखिलविमतमहीपतिमुकुटमाणिक्यकान्तिकन्दलित सन्ध्यारागसमुदित्वरतारकायमाणचरणनखाङ्कुरो रणाङ्गणादतिजवनपलायितेन रचितभिक्षुवेषेण प्रकटितादरं परिपृच्छते समरसन्नाहिने वैरिनृपतिवर्गाय वल्मीकमेवासादनीयदुर्गतया, वदननिहितं तृणमेव बाणनिरोधसिद्धौषधिविशेषतया, शस्त्रपातनमेव बाहुस्तंभोपायतया समुपदिशता तेन तेनारातिनृपतिना निबिडीकारितादिगश्वलगिरिकन्दरान्तरालद्वीपान्त........निजघोटखुरपुटाविघटितप्रतिभटकिरीटकोटिमणिकूटधूलीनिरवशेषचूषितसलिलान् सकलानपि सलिलनिधीन् अहितनृपतियौवतनयनवारिलहरीभिः उत्कूलयन्निजकरकरवालधारैकसमसमय - नियतबहलविमतसम्पादितानेकद्वारतया कीर्तिकर्पूररेणुराजिविशदीकरणाय चामीकरचालिनीचक्रीकारितचण्डकिरणमण्डलो विभावरीसंग्रामविनिहतविरहितविरोधिराजचण्डकिरणविभ्रमकृता चण्डकरबिम्बमध्यरन्ध्रकुहनाकारिताङ्कपादोऽनवरतरचितदशधेनूपधेनुप्रमुखाविविधदानपरिपोषितमहीसुरनायकालंकृतवेंगलापुरपोतसमुद्रसुरसमुद्रप्रमुखमहाग्रहारनिर्माणपारीणः फणिपतिशिखरिभवनहरिचरणपरिचरणकुतुककोरकितहृदयः श्रीमदार्यक्षत्रकुलचूडामणिः फणिसार्वभौम इव श्रीमन्माणिनागपुरवराधीश्वरास्त्रिपुरविजयीव धवलांकभीमः सुधोदयादिव्रस इव सिन्धुगोविन्दः शशिशेखरगिरिरिव सितकरगण्डः सरसीरुहलोचन इव स्वर्गमर्त्यपातालत्रिभुवनकारिरायश्रीः वेंगलाम्बागर्भशुक्तिमुक्तामणिः श्रीपोतभूपालसुकृतकल्पतरुपचेलिमफलाकारः प्रकटतरभुजबलपराक्रमाभ्यां भीमार्जुनाभ्यामिव युधिष्ठिरः सकलजनहृदयङ्गमाभ्यामर्थकामाभ्यामिव धर्मः निखिलनृपतिनिखिलमान्याभ्यां यशःप्रतापाभ्यामिव विजयः सततमुक्तपार्श्वाभ्यां पुष्पवन्ताभ्यामिव महामेरुः, अनुजाभ्यां श्रीदिवाकरभैरवनायकाभ्यां उद्भासमानः श्रीसूरपनायको नाम। यस्य खलु—

फणिस्त्रैणश्लाघ्ये प्रतिनवसुधाफेनधवले
हरस्याभिप्रायश्रवणकलिते भूषणतया।
प्रतापव्याजेन प्रकटितफणारत्नकिरणे
यशःशेषे नूनं स्वपिति भगवान् श्रीसहचरः ॥

(क्रमशः)

# കാവ്യവിമർശനം.

N. KRISHNA PILLAI B. A. (Hons.)

പൊട്ടുന്നനവെ ഉദിച്ചുയരുന്ന ഒരു അന്തഃപ്രേരണ ഉടലെടുത്താൽ മാത്രം കാവ്യമാവുകയില്ല. നിമിഷംതോറും മാറിമറിഞ്ഞുകൊണ്ടിരിക്കുന്ന ഹൃദയവികാരങ്ങളുടെ ഭാഷാരൂപമായ ആവാഹനംകൊണ്ടു് കാവ്യം ഉദ്ഭവിക്കുന്നില്ല. വികാരത്തിന്റെ പരിണതാവസ്ഥയിൽ ഉണ്ടാകുന്ന പ്രശാന്തതയാണു് കാവ്യത്തിന്റെ ജന്മഭൂമി. വികാരപരമ്പരകളോടൊപ്പം ചിന്താവിശേഷങ്ങളും ഉച്ചകോടിയിലെത്തി സംസ്കരിക്കപ്പെടുമ്പോഴാണു് യഥാൎത്ഥ കാവ്യത്തിന്റെ ഉൽപത്തി. ഒരു സംഭവത്തെപ്പററി, ഒരു വസ്തുവിനെപ്പററി, സമഗ്രമായ ധ്യാനവും താദാത്മ്യബോധവും ഒരു സഹൃദയനുണ്ടാകുമ്പോഴും, ആ സഹൃദയൻതന്നെ സൃഷ്ടിവൈദഗ്ദ്ധ്യംകൊണ്ടു് അനുഗൃഹീതൻകൂടി ആകുമ്പോഴും, കാവ്യം ഉണ്ടാവുക ആയി. അത്തരം കാവ്യങ്ങളിൽ വികാരാധിഷ്ഠാനത്തിൽ പ്രതിഷ്ഠിതമായ ചിന്തയും, ചിന്താഗതിയോടു് ആപേക്ഷികങ്ങളായ വികാരങ്ങളും അന്യോന്യം ആശ്ലേഷിക്കുന്നു. ആ ആശ്ലേഷത്തിന്റെ സമഞ്ജസഭാവമാണു് കാവ്യചമൽക്കാരത്തിന്റെ ഊററുറവ.

കാവ്യസൌന്ദൎയ്യത്തിന്റെ വ്യാഖ്യാതാവും സൃഷ്ടിമാഹാത്മ്യത്തിന്റെ ഗായകനും ആയിട്ടാണു് നിരൂപകൻ വിജയിച്ചരുളുന്നതു്. സാഹിത്യസാഗരത്തിലെ രത്നസഹസ്രങ്ങളെ മുങ്ങിയെടുത്തു് അവയുടെ കാന്തിയും മേന്മയും വ്യക്തമാകുമാറു് പ്രദർശിപ്പിക്കുന്ന ഉൽകൃഷ്ടകൃത്യം ഒരു നിരൂപകനു നിൎവ്വഹിക്കാനുണ്ടു്. കാവ്യകലയുടെ ആത്യന്തികധൎമ്മങ്ങളെ ആരാഞ്ഞു കണ്ടുപിടിക്കുകയും ആ ധൎമ്മങ്ങളെ വിമർശനവിധേയമായ കാവ്യവുമായി സംഘടിപ്പിച്ചു് പരിശോധിക്കുകയും പരിശോധനയുടെ ഫലത്തെ സ്ഫടികസ്ഫുടമായി പ്രതിപാദിക്കുകയും ചെയ്യുന്ന നിരൂപകൻ സവിശേഷമായ ലോകാരാധനയെ അൎഹിക്കുന്നു. കവിക്കു് ഉണ്ടായിരിക്കേണ്ട സങ്കലനപാടവവും വിശകലനവിദഗ്ദ്ധതയും നിരൂപകന്റെയും യോഗ്യതകളായി സ്വീകരിക്കേണ്ടിയിരിക്കുന്നു. ഒരു കലാകാരന്റെ നിലയിലും ശാസ്ത്രകാരന്റെ നിലയിലും നിരൂപകൻ പ്രവൎത്തിച്ചുതന്നെ തീരണം. ചുരുക്കിപ്പറഞ്ഞാൽ നിരൂപണം ഒരു കലയും അതേസമയം ഒരു ശാസ്ത്രവും ആണു്.

പാഞ്ഞുപോകുന്ന സംഭവപരമ്പരകളിൽ ചിലതിനെ പിടിച്ചു നിറുത്തി അവയുടെ അംഗാംഗിഭാവങ്ങളെ വേർതിരിച്ചറിഞ്ഞു് അവയെ അസുലഭമായ ഒരു നവ്യതകൊണ്ടു് പൊതിഞ്ഞു് അനശ്വരമാക്കിത്തീക്കുകയാണല്ലോ ഒരു കലാകാരൻ ചെയ്യുന്നതു്. ഒരു സംഭവത്തെ ക്രാന്തദശിയായ കവി വീക്ഷിക്കുന്നതു് ഏതൊരു അന്തരീക്ഷത്തിൽ നിന്നാണെന്നും ഏതൊരു മാഗ്ഗത്തിൽക്കൂടിയാണെന്നും നിരൂപകൻ അവശ്യം ഗ്രഹിക്കാതെ സത്യസന്ധമായ വിമശനം നടത്താൻ കഴിയുകയില്ല. ആ സംഭവത്തിൻെറ അന്തർലീനങ്ങളായ ആകർഷണശക്തികളെ കണ്ടുപിടിക്കുക, അവ കവിഹൃദയത്തെ ഉച്ചലിപ്പിക്കുന്നതു് എന്തുകൊണ്ടാണെന്നും ഏതെല്ലാം കോടികളിൽ അവയും കവിഹൃദയവും പരസ്പരാപേക്ഷകത്വം അവലംബിക്കുന്നു എന്നും മനസ്സിലാക്കുക, മുമ്പു പറഞ്ഞ താദാത്മ്യബോധം പരിപൂണ്ണമാണോ എന്നു പരിശോധിക്കുക, എന്നീ ശ്രമാവഹങ്ങളായ കൃത്യങ്ങൾക്കപ്പുറത്തും നിരൂപകൻെറ വ്യാപാരമണ്ഡലം വിശാലമായി തുറന്നു കിടക്കുന്നു. സൂക്ഷ്മസ്വഭാവദശനത്തിൽ കവി സ്വീകരിക്കുന്ന നിലപാടും ശാസ്ത്രീയബോധവും ദശനാനന്തരം സംഭവത്തെ നവശോഭാസംയുക്തമായി ആവിഷ്കരിക്കുമ്പോൾ പ്രത്യക്ഷപ്പെടുന്ന ഔചിത്യവും കമ്മകുശലതയും നിരൂപകദൃഷ്ടിയിൽ നിഴലിക്കേണ്ട അതിപ്രധാനങ്ങളായ കാര്യങ്ങളാണ്. ഇവയ്ക്കു പുറമേ, ആവിഷ്കരണസമ്പ്രദായത്തിൻെറ പ്രത്യേകതയും വിചാരിക്കേണ്ടിയിരിക്കുന്നു. ഇങ്ങനെ ബഹുമുഖങ്ങളായ പരിശോധനകൾക്കും പരീക്ഷണങ്ങൾക്കുംശേഷമാണ് കാവ്യത്തിൻെറ മാഹാത്മ്യനിണ്ണയം സാധിക്കേണ്ടിവരുന്നതു്. അതിവാദിയായോ അവാദിയായോ സ്തുതിപാഠകനായോ ഗുണപരാങ്മുഖനായോ തീരാതെ, ലോകസംഗ്രഹാത്ഥം പ്രവത്തിക്കുകയാണെന്ന പൂർണ്ണബോധത്തോടും പാവനനിശ്ചയത്തോടും കൂടി വേണം ഈ ദുഷ്കരകമ്മം അനുഷ്ഠിക്കേണ്ടതു്. പ്രകൃതിഭംഗിയും കാവ്യഭംഗിയും ആസ്വദിക്കാൻ വേണ്ട പ്രതിഭാസമ്പത്തും സൌന്ദയ്യബോധവും നിരൂപകനുണ്ടു്. വിശകലനസാമത്ഥ്യം കവിക്കും നിരൂപകനും ജാഗ്രത്തായി പ്രവത്തിക്കണം. ഒരാൾക്കു പ്രകൃതിവിശകലനം, വേറൊരാൾക്കു കാവ്യവിശകലനം, എന്നേ വ്യത്യാസമുള്ളു. ഭാഷാരൂപേണയുള്ള സംഭവാവിഷ്കരണത്തിൻെറ രീതിയും നിയമവും കാവ്യകാരനറിയാം. ആ രീതിയും നിയമവും അറിയാതെ വിമശകന് ആവിഷ്കരണാംശത്തെപ്പററി ഒന്നും പ്രസ്താവിക്കാൻ കഴിയുകയില്ല. ഇങ്ങനെ നോക്കുമ്പോൾ മമ്മഭൂതങ്ങളായ പല ഘട്ടങ്ങളിലും കവിയും നിരൂപകനും ഒത്തുകൂടുന്നതായി കാണാൻ കഴിയും.

സ്വകൎമ്മാനുഷ്ഠാനത്തിൽ വിഭിന്നങ്ങളായ നിലപാടുകൾ നിരൂപകന് അംഗീകരിക്കേണ്ടിവരുന്നു. കാവ്യവിഷയത്തെപ്പററി കവിയ്ക്കു് ഒരഭിപ്രായമുണ്ടു്, ലോകത്തിന് ഒരഭിപ്രായമുണ്ടു്, നിരൂപകനുമുണ്ടു് ഒരഭിപ്രായം. അവയുടെ പരസ്പരവിഭിന്നതകളേയും അന്യോന്യാശ്രയഭാവത്തെയും ഓരോരുത്തരുടെയും വീക്ഷണകോണങ്ങളിൽ നിന്നുകൊണ്ടു നിരൂപകൻ ദൎശിക്കുന്നു. വ്യക്തിഗതമായ അഭിപ്രായം മാത്രം പറയാൻ നിരൂപകന് അവകാശമില്ല. സമുദായത്തിന്റെ അവലോകനരീതിയെ ധിക്കരിക്കാൻ സൎവ്വതന്ത്രസ്വതന്ത്രനായ കവിയ്ക്കുപോലും അൎഹതയില്ല. നേരേമറിച്ചു്, തന്റെ ഓരോ അഭിപ്രായവും മനുഷ്യസമുദായത്തിന്റെ ഭാഗധേയങ്ങളെ ബാധിക്കുന്നുണ്ടെന്ന ബോധം കവിയ്ക്കുണ്ടായിരിക്കണം. കവിയുടെ കാൎയ്യം ഇപ്രകാരമാണെങ്കിൽ നിരൂപകന്റെ കഥ പറയാനില്ല. കവിപക്ഷത്തെ മറച്ചുപിടിച്ചുകൊണ്ടു് സ്വാഭിപ്രായനിവേദനം നിൎവ്വഹിക്കുന്ന നിരൂപകസമ്പ്രദായവും അത്യന്തം അനാശാസ്യമാണു്. എന്നാൽ കവിമതവും സമുദായമതവും ആദരിക്കണമെന്നു കരുതി സ്വാഭിപ്രായത്തെ ബലികഴിക്കാൻ നിരൂപകൻ ഒരുങ്ങരുതു്. ഇത്തരം കഴിവുകളും കഴിവുകേടുകളും അറിഞ്ഞു പ്രവൎത്തിക്കുന്ന വിമൎശകൻ വിജയശ്രീലാളിതനായിത്തീരുന്നു.

മേൽപ്പറഞ്ഞ ശാസ്ത്രീയങ്ങളായ മാനദണ്ഡങ്ങളെ ആശ്രയിക്കുന്നതുകൊണ്ടു മാത്രം നിരൂപണം മാതൃകായോഗ്യമാകുന്നില്ല. എല്ലുംതൊലിയും മജ്ജയും മാംസവും സഞ്ചയിച്ചിരുന്നാൽത്തന്നെയും ജീവനില്ലെങ്കിൽ മനുഷ്യത്വം ലഭിക്കാത്തതുപോലെ ശാസ്ത്രീയങ്ങളായ ഉപാധികളുടെ സമ്പൂൎണ്ണസ്വീകരണംകൊണ്ടുപോലും നിരൂപണത്തിനു ചൈതന്യം സിദ്ധിക്കുന്നില്ല. ആ ചൈതന്യം വേറെങ്ങോ അന്തൎഹിതമായിരിക്കുന്നു. ജഡാവസ്ഥയിൽ നിന്നു ജീവസ്സിലേക്കു്, ശുഷ്കതയിൽനിന്നു് സരസതയിലേയ്ക്കു് ഉള്ള സംക്രമണം നിരൂപണത്തിനു സിദ്ധിക്കണമെങ്കിൽ വിമൎശകന്റെ കലാപരമായ ദൃഷ്ടി ഉണൎന്നു പ്രവൎത്തിക്കേണ്ടതാണു്. തനിക്കു പറയേണ്ട അനവധി കാൎയ്യങ്ങളെ അക്കമിട്ടു നിരത്തിവയ്ക്കുകയാണെങ്കിൽ ആ വിരസഭാഷാരൂപത്തെ സാഹിത്യമെന്നു് ആൎക്കു വ്യവഹരിക്കാൻ കഴിയും? ആ രൂപമാണു് നിരൂപണമെന്നുപറഞ്ഞാൽ അതോടുകൂടി നിരൂപണം ഒരു സാഹിത്യപ്രസ്ഥാനമല്ലെന്നു സമ്മതിക്കേണ്ടിവരും. വസ്തുസ്ഥിതികഥനം ചമൽക്കാരജനകമായിത്തീരുമ്പോഴാണല്ലോ സാഹിത്യമെന്ന വ്യവഹാരം ഉത്ഭവിക്കുക പ്രതിപാദനത്തിന്റെ സുഗമതയും ഹൃദ്യ

തയും പ്രതിപാദ്യസംവിധാനത്തിൻെറ ഔചിത്യവും രസികതയും ഗണനാകോടിയുടെ മുന്നണിയിൽ നിറുത്തി പ്രവത്തിക്കുമ്പോൾ മാത്രമേ നിരൂപണത്തിനു ജീവൻ സിദ്ധിക്കുന്നുള്ളൂ. ജന്മസിദ്ധമായ പ്രതിഭാസമ്പത്ത് ഈ അവസരത്തിൽ വിമശ്കനെ അനുഗ്രഹിക്കുന്നു. കവിയുടെ ജീവരക്തം പ്രവഹിക്കുന്നത് കാവ്യത്തിൽക്കൂടിയാണെന്നു മിൽട്ടൺ പറഞ്ഞിട്ടുള്ളതുപോലെ, കാവ്യത്തിൻെറ ജീവരക്തം പ്രവഹിക്കുന്നതു നിരൂപണത്തിൽക്കൂടിയാണ്. ജീവിതത്തിലെ ഗഹനവും ലളിതവും തമോബാധിതവും, പ്രഭാമയവും ആയ അദ്ധ്യായങ്ങളെ നവനവോന്മേഷശാലിയായ പ്രജ്ഞകൊണ്ട് അവധാരണംചെയ്തു സഹൃദയരഞ്ജകമായി കവി പ്രകാശിപ്പിക്കുന്നു എങ്കിൽ കാവ്യത്തിലെ സ്ഥൂലവും സൂക്ഷ്മവും വ്യക്തവും അവ്യക്തവും ആയ അംശങ്ങളെ അടുക്കിയൊരുക്കി സൌന്ദയ്യബോധസമ്പന്നനായ സഹൃദയൻെറ ഹൃദയവേദിയിൽ ഒരിക്കലും മായാത്തമട്ടിൽ പ്രതിഷ്ഠിക്കുകയാണ് നിരൂപകൻ ചെയ്യുന്നത്. വ്യാപകമായ അത്ഥദീക്ഷയോടെ പറയുമ്പോൾ, പ്രകൃതിയെ നിരൂപണംചെയ്യുകയാണ് കാവ്യം. കാവ്യത്തെ നിരൂപണംചെയ്യുകയാണ് വിമശനം. കവിയുടെ നിരൂപണവും വിമശ്കൻെറ നിരൂപണവും മൌലികങ്ങളായ പല തത്വങ്ങളിലും യോജിക്കുന്നു. സാങ്കേതികങ്ങളായ ചില വൈജാത്യങ്ങൾ ഒഴിച്ചുകൂടാൻ പാടില്ലാതെ വന്നുചേരുന്നു എന്നേ ഉള്ളൂ.

ചിലപ്പോൾ ഒരു സംശയം ഉണ്ടാകാം. ദോഷാംശപരാമശത്തെ നിരൂപണലോകത്തിൽ നിന്നും ഒഴിച്ചുനിറുത്തുകയല്ലേ ഈ ലേഖനത്തിൽ ചെയ്യുന്നതെന്ന്. ഒരിക്കലുമല്ല. ജീവിതത്തിലെ സൌന്ദയ്യവും, വൈകൃതവും വരച്ചു കാണിക്കാൻ കവിയ്ക്കു കഴിയും. അതുപോലെതന്നെ നിരൂപകനും. കാവ്യഗുണത്തെ തനിമുഴപ്പിൽ വിവരിക്കുന്നതിനു നിരൂപകനു എത്രമാത്രം അവകാശമുണ്ടോ, അത്രയും അധികാരം ദോഷചിന്തനത്തിനും ഉണ്ട്. പക്ഷേ ഗുണദോഷപരിഗണന വ്യക്തിപരമായ ഇഷ്ടാനിഷ്ടങ്ങളെ അടിസ്ഥാനപ്പെടുത്തി ഒരിക്കലും പാടില്ല. രസതന്ത്രശാസ്ത്രജ്ഞൻ വസ്തുക്കളുടെ സുഗന്ധത്തെയും, ദുർഗന്ധത്തെയും നിഷ്പക്ഷമായി അനുഭവിക്കുകയാണ്. നിരൂപകനും കാവ്യത്തിൻെറ ഗുണദോഷങ്ങളെപ്പററി മമതയോ വെറുപ്പോ കൂടാതെയാണ് പരാമശിക്കേണ്ടതു്. ഈ നിസ്സംഗഭാവം സംസ്കാരപുഷ്കലമായ ഹൃദയത്തിനു മാത്രമേ സിദ്ധിക്കുകയുള്ളൂ. ആ സിദ്ധി അസുലഭമാണ്; പക്ഷേ അഭിലഷണീയമാണ്.

# ദാരിദ്ര്യത്തിൽ

BY

K. NEELAMBARAN (MAHOPADHYAYA, CLASS III)

കണ്ണപുടങ്ങളിൽ മാറെറാലിക്കൊള്ളു മാ-
നിസ്പന്ദനമങ്ങനെ നിന്നിടുന്നു.

പിഞ്ചുകിടാവിൻെറ നെഞ്ചലിയിക്കുമ-
പ്പഞ്ചമരാഗത്തെ വാഴ്ത്തുമാരും.

ദാരിദ്ര്യദേവത മൂത്തി വരിച്ചുടൻ
പാരിൽ പ്രവേശിച്ചാലെന്നപോലെ;

വാടിക്കരിഞ്ഞ മുഖമാൎന്നുനിന്നവ-
നാത്തനായ് കെഞ്ചുന്നു ഭിക്ഷയെങ്ങും.

നാലഞ്ചുനാളായി, പട്ടിണിപ്പാവത്തെ
മാലോകരാരുമേ നോക്കുന്നീല.

ദുഷ്ടപ്രഭുക്കൾതൻ വാതുക്കൽ നിന്നവ-
നഷ്ടിക്കു വേണ്ടതു യാചിക്കുന്നു.

ആരുടെ ദീനത മാനുഷൻ കാണുന്നു
പാരിതു നൈഷ്ഠുര്യപൂർണ്ണമത്രേ.

ലോകമേ ! നിൻെറ മറിമായമേതുമേ
കാപട്യമെന്നു നിനപ്പതുണ്ടോ ?

എങ്കിലും ലോകമേ ! നിന്മനമിത്രമേൽ
പങ്കിലമാകുവാനെന്തു ഹേതു ?

പാരിച്ച കഷ്ടത കാണുവാൻവയ്യാത്തോ-
നാരുതാൻ ധന്യനിപ്പാരിടത്തിൽ

ബാലൻെറ രോദനം കേൾക്കുവാനാരുണ്ടു
കാലൻെറ കയ്യിലേക്കായുന്നവൻ.

"ലോകസംരക്ഷണ ദക്ഷനാമീശനും
സാധുവാമെന്നിൽ കരുണയില്ലേ !

കഷ്ടം ! ദരിദ്രൻെറ കഷ്ടസ്ഥിതികളിൽ
തുഷ്ടമായുള്ള ജനസമൂഹം.

രോദനം കേൾക്കവേ തെററിത്തെറിക്കുന്ന
പാരുഷ്യമേറും ഹൃദയത്തോടെ."

ഇത്തരം ചിന്തയാൽ മാഴ്കുമാബാലകൻ
നിത്യമാം സ്വർഗീയശാന്തിപൂകി.

ദീനനെ കാണുമ്പോൾ കാരുണ്യമേലാത്ത
മാനാഭിമാനങ്ങളെന്തിനാവോ ?

എന്തിനു മേടകളെന്തിനു മോടിക-
ളെന്തഹോ ! ശാശ്വതം ലോകത്തിങ്കൽ

---

## ഒരു മായാസ്വപ്നം.

---

G. Krishna Pillai. (Mahopadhyaya, Class III.)

മീനമാസത്തിലെ ചന്ദ്രികയുള്ള ഒരു രാത്രി. സമയം പത്തുമണി കഴിഞ്ഞിട്ടും ജനങ്ങൾ ഉലാത്തിക്കൊണ്ടും, വെടിപറഞ്ഞുകൊണ്ടും വെളിയിൽത്തന്നെ കഴിഞ്ഞുകൂടുന്നു. ചിലർ കസേരയും മുററത്തിട്ട് ശീതകിരണന്റെ ശിശിരോപചാരങ്ങളിൽ വിശ്രമസുഖമനുഭവിക്കുന്നു. "പകൽ ഇത്രത്തോളം വിഷമമുണ്ടായിരുന്നില്ല, ഇപ്പോഴാണ് ചൂടു നീറുന്നത്, ഹാ ! ഒരു മഴ പെയ്തിരുന്നെങ്കിൽ" എന്ന ശബ്ദം നിശീഥിനിയുടെ നിശ്ശബ്ദതയിൽ ലയിക്കുന്നു. ഞാനും പരീക്ഷയ്ക്കു് പുസ്തകപാരായണത്തിൽ മുഴുകിയിരിക്കുന്നു.

x x x x x x x

ഒരു വലിയ നഗരത്തിൽ ആണ് എന്റെ താമസം. ഈ ഒന്നുരണ്ടു മാസത്തിനിടയ്ക്കു് ചില സ്നേഹിതന്മാരെ എനിക്ക് ലഭിച്ചു. അവർ എണ്ണത്തിൽ കുറവെങ്കിലും സജ്ജനങ്ങളായിരുന്നു. പതിവുപോലെ ഒരു ദിവസം സ്നേഹിതന്മാരോടുകൂടി ഞാൻ സായന്തനസവാരിയ്ക്കു് പുറപ്പെട്ടു. പട്ടണം നടന്നു കാണണമെന്നല്ലാതെ മററു് ഉദ്ദേശമൊന്നുമുണ്ടായിരുന്നില്ല. ഇതിനിടയിൽ എന്റെ സ്നേഹിതന്മാർ സ്വന്തസുഹൃത്തുക്കളുമായി എന്നെ പരിചയപ്പെടുത്തി. ഇക്കൂട്ടത്തിൽ സ്മരണീയനായ ഒരാൾകൂടി ഉണ്ടായിരുന്നു. അദ്ദേഹത്തെ കണ്ട മാത്രയിൽതന്നെ ഏതോ ഒരു "ജനനാന്തരസൌഹൃദം" ഞങ്ങളെ യോജിപ്പിക്കുന്നതായി എനിക്കു തോന്നി. അദ്ദേഹത്തിന്റെ സരസഭാഷണങ്ങൾ എന്നെ അത്യധികമാകർഷിച്ചു. അദ്ദേഹം എന്നോടും പരിചിതഭാവത്തിൽ സംസാരിക്കുകയും എന്നെപ്പററിയുള്ള വിശദവിവരങ്ങൾ സ്നേഹിതരിൽനിന്നും ഗ്രഹിക്കുകയുംചെയ്തു അന്നത്തെ ആ സായാഹ്നസഞ്ചാരം ഇതോടെ അവസാനിച്ചു.

പുതിയ സ്നേഹിതനെ കൂടുതൽ മനസ്സിലാക്കണമെന്നു ഞാൻ ആശിച്ചു. അദ്ദേഹം ഒരു ഉൽകൃഷ്ടകുടുംബജാതനും വിദ്യാസമ്പന്നനുമാണെന്ന് ഞാൻ താമസിയാതെ മനസ്സിലാക്കി. അപ്പോഴാണു കേരളീയക്കു സുപരിചിതനായ രാജശേഖരൻ നായരാണ് അതെന്ന് അറിഞ്ഞത്.

ഒരു സായാഹ്നത്തിൽ സ്നേഹിതന്മാരെ അന്വേഷിച്ച് ഞാൻ വെളിയിൽ സഞ്ചരിക്കുകയായിരുന്നു. ആ സമയം ദ്രുതഗതിയിൽ നടന്നു വരുന്ന രാജശേഖരൻനായരെയാണ് ഞാൻ ആദ്യമായിക്കണ്ടത്. അദ്ദേഹം സ്വവസതിയിലേക്ക് എന്നെ ക്ഷണിച്ചു. ഞാനും അങ്ങോട്ടു പുറപ്പെട്ടു. അത് ഒരപൂർവ്വസംഭവമായിരുന്നു. മററു വീടുകളിൽ പോകരുതെന്നു വീട്ടുകാർ നിർബന്ധിച്ചിരുന്നതിനാൽ, പലപടി കേറുന്ന സമ്പ്രദായം എനിക്കുണ്ടായിരുന്നില്ല. ഒരു മാന്യസ്നേഹിതൻെറ ക്ഷണമാണല്ലോ എന്നു ഞാൻ സമാധാനിച്ചു.

അദ്ദേഹത്തിൻെറ വീട് പഴയതോ പുതിയതോ ആയിരുന്നില്ല. രണ്ടുനില കെട്ടിടത്തിൻെറ മാതൃകയിൽ ഒരു വീട്. അതിൻെറ തെക്കുഭാഗത്തായി ഒരു പൂന്തോട്ടവും അതിൽ ഒരു ചെറിയ പീഠവുമുണ്ട്. അതിൻെറ അരികിൽകൂടിയാണ് ഗൃഹത്തിലേക്കു പ്രവേശിക്കുന്നത്. ഗൃഹത്തിൻെറ നേരേയുള്ള പൂമുഖത്താണ് അദ്ദേഹം സാധാരണ ഇരിക്കുന്നതെന്ന് അവിടത്തെ സജ്ജീകരണംകൊണ്ടു ഞാൻ മനസ്സിലാക്കി. ചെറിയ ഒരു സ്വീകരണശാലപോലെ ആയിരുന്നു അത്. ചെന്ന ഉടനെ കണ്ടതുകൊണ്ടാണ് ആ ശാലയെപ്പററി സ്മരിക്കാൻ ഇടയായത്.

ഞങ്ങൾ അവിടെ എത്തിയപ്പോൾ വീടിൻെറ ഉമ്മറത്ത് ഏകദേശം പതിനഞ്ചു വയസ്സ് പ്രായം വരുന്ന ഒരു കന്യക എന്തോ എഴുതിക്കൊണ്ടിരിയ്ക്കുകയായിരുന്നു. മി. നായരെ കണ്ടമാത്രയിൽ ആദരവോടെ എഴുന്നേററ് അവൾ "അച്ഛൻ നേരത്തേ വരുമെന്ന് ഉദ്ദേശിച്ച് കാപ്പി തയാറാക്കി; അത് ഇപ്പോൾ തണുത്തുകാണും; കൊണ്ടുവരട്ടേ" എന്നു ചോദിച്ച് വീണ്ടും എഴുതിത്തുടങ്ങി. "ലീലേ! കാപ്പി രണ്ടുപേക്ക് വേണമെന്ന് പറയൂ" എന്ന് അദ്ദേഹം പറഞ്ഞപ്പോഴാണ് അവൾ എന്നെക്കണ്ടത്. യുവാവും അപരിചിതനുമായിരുന്ന എന്നെക്കണ്ടപ്പോൾ യുവസഹജമായ ലജ്ജയോടേ അവൾ അകത്തേയ്ക്കു പോയി.

"ലോകത്തിൻെറ നശ്വരതയെപ്പററി സ്നേഹിതന്മാരോടു വേദാന്തം പറയുകയും, ചിലപ്പോൾ അവരുടെ പരിഹാസത്തിനു പാത്രമാക

യും ചെയ്യാവുള്ള ഞാൻ വീണ്ടും അഗാധമായ ഹാസ്യഗർത്തത്തിലേയ്ക്കു പതിയ്ക്കാൻ തുടങ്ങുന്നു" എന്ന് ഞാൻ വിചാരിച്ചു. ഇതികർത്തവ്യതാമൂഢനായി ഞാൻ ഒരു ചാരുകസേരയിൽ ഇരുന്നു. എൻെറ കണ്ണുകൾ നാലുപാടും ഉഴന്നു തിരിയുന്നു. ഏതോ ഒന്നിനെ ദർശിക്കാൻ അത്ര് ഉൽക്കണ്ഠാകുലമാകുന്നു. ഇതിനിടയിൽ കാപ്പി ഹാജരായി. അസ്വാസ്ഥമനസ്ഥിതിയാകുന്ന പലഹാരത്തോടുകൂടി ഞാൻ കാപ്പികുടിച്ചു. തൽക്കാലം അവിടെ ഇരിക്കുന്നതു് ഉത്തേജകമായിരിക്കുമെന്നു വിചാരിച്ച് യാത്രപറഞ്ഞു ഞാൻ പുറത്തിറങ്ങി. സ്നേഹിതന്മാരിൽ ആരെയെങ്കിലും കണ്ടുപിടിക്കുന്നതിന് ഞാൻ അത്യദ്ധ്വാനം ചെയ്തു. അരമണിക്കൂർനേരം ചുററിനടന്നതിൻെറ ഫലമായി പരമേശ്വരൻപിള്ള എന്ന സ്നേഹിതൻ ദൃഷ്ടിയിൽപ്പെട്ടു. ഉടനെ ഞാൻ ഭാണ്ഡവുമഴിച്ചു. നടന്ന സംഗതികൾ പറഞ്ഞു മനസ്സിലാക്കി. അതിന് അദ്ദേഹത്തിൻെറ മറുപടി ഇതായിരുന്നു—"ഞാൻ പറയുന്നതു കേൾക്കുമെങ്കിൽ പറയാം. അദ്ദേഹം ഒരു പണ്ഡിതനും, ഉദാരനും ആണെന്നുള്ളതു് ശരിതന്നെ; പക്ഷെ ഇക്കാര്യത്തിൽ മാത്രം അദ്ദേഹം നമ്മോടു് വളരെ വിയോജിക്കുന്നു." ശേഷം കേൾക്കുന്നതിന് ഞാൻ അക്ഷമനായി. വാച്യമായി തന്നെ പറയണമെന്നു ഞാൻ ആവശ്യപ്പെട്ടു. പരമേശ്വരൻപിള്ള തുടൎന്നു—"ഇതാണ് തോക്കിൽകേറി വെടിവയ്ക്കുന്ന സമ്പ്രദായം. ക്ഷമയോടുകൂടി കേൾക്കൂ. അദ്ദേഹത്തിൻെറ ഉദ്ദേശം മകളുടെ ഭർത്താവ് B. A. എങ്കിലും ആയിരിക്കണമെന്നാണ്. ഇതിനുമുമ്പു പലരും വിവാഹാലോചനയുംകൊണ്ടു് അവിടെ ചെന്നിരുന്നു; അവർ ബിരുദധാരികളല്ലാത്തതിനാൽ മടങ്ങിപ്പോയപ്പോളാണ് ഞാൻ ഇതറിഞ്ഞതു്."

"താമസിയാതെ ഞാനൊരു ഗ്രാഡ്വേററാകുന്നപക്ഷം ?"

"എന്നാൽ അല്പം സമാധാനിയ്ക്കാം." അയാൾ പറഞ്ഞു. "അല്ലാത്തപക്ഷം ഈ വിഷച്ചെടി നട്ടുവളർത്താതിരിക്കുകയാണ് ഉത്തമം."

ഞാൻ ഭഗ്നാശയനായില്ല. രണ്ടിലൊന്ന് അറിയുന്നതുവരെ ശ്രമിക്കാൻ തീർച്ചപ്പെടുത്തി. നിത്യവും രാജശേഖരൻനായരുടെ വീട്ടിൽ ചെല്ലും. അതിൽ അദ്ദേഹം വൈമുഖ്യം പ്രദർശിപ്പിച്ചില്ല. പ്രത്യുത, സന്തോഷിക്കുകയാണുണ്ടായതു്. അദ്ദേഹത്തിൻെറ സരസസംഭാഷണങ്ങളായിരിക്കും എന്നെ അങ്ങോട്ടു ചെല്ലുവാൻ പ്രേരിപ്പിച്ചിരുന്നതെന്ന് അദ്ദേഹം വിചാരിച്ചിരിക്കണം. അദ്ദേഹത്തിൻെറ സാമീപ്യവും "മററും" എനിക്ക് ആഹ്ലാദജനകമായിരുന്നു.

ഒരു വൈകുന്നേരം കാലേക്കൂട്ടിത്തന്നെ ഞാൻ അവിടെ ഹാജരായി. അതിന് എന്നെ പ്രേരിപ്പിച്ചത് ഇപ്രകാരമറിയുന്നതിനുള്ള ആശയായിരിക്കണം "എനിക്ക് അങ്ങോട്ടുള്ളതുപോലെ, ലീലയ്ക്ക് ഇങ്ങോട്ടും വല്ല അനുഭാവവുമുണ്ടോ. സ്നേഹിതൻ പറയുന്നതുപോലെ ഞാൻ ഈ ഭാരം ചുമക്കുന്നത് വ്യഥാവിലായിത്തീരുമോ ? എന്നറിയണം. നിഷ്പ്രയോജനമെങ്കിൽ—കഴിയുമെങ്കിൽ—ഈ ഭാരം ത്യജിച്ച് സ്വസ്ഥനാകുവാൻ ശ്രമിക്കണം."

ഞാൻ അവിടെയെത്തുമ്പോൾ രാജശേഖരൻനായർ അവിടെ ഉണ്ടായിരുന്നില്ല. നിത്യപരിചിതനായിരുന്നതുകൊണ്ട് ഞാൻ സംശയിച്ചില്ല. നേരേ പൂമുഖത്തേയ്ക്കു ചെന്നു. പ്രഥമസമാഗമദിനത്തിലെപ്പോലെ ലീല അന്നും അവിടെ ഉണ്ടായിരുന്നു. അവൾ എന്തോ തച്ചുകൊണ്ടിരിക്കുകയായിരുന്നു അവൾ സന്നതാങ്ഗിയായി അവധാനപൂർവ്വം തയ്യലിൽ നിമഗ്നയായിരുന്നതുകൊണ്ട് എന്നെ ദർശിച്ചില്ല. ഞാൻ ഒന്നു തിരിഞ്ഞുനോക്കി. അല്പം ലജ്ജയോടും എന്നാലൊരു പുഞ്ചിരിയോടും കൂടേ അവൾ എഴുന്നേററു. ലീലയോടു സംസാരിയ്ക്കണമെന്ന് ആഗ്രഹിച്ചിട്ടും എൻെറ നാവ് അനങ്ങിയില്ല. ശബ്ദം പുറപ്പെട്ടില്ല. അവൾ പോകുവാൻ തുടങ്ങുകയുമായി. ഞാൻ വിഷമിച്ചു. ലീലേ !—ഞാൻ വിളിച്ചു. അവൾ വീണ്ടും ഉന്മുഖിയായി. കുറച്ചുനേരത്തെ മൌനത്തിനുശേഷം ഞാൻ തുടന്നു—"ഒരു കാര്യം അറിയിയ്ക്കാനുണ്ട്." സ്നിഗ്ദ്ധമായ ഒരു വീക്ഷണത്തോടുകൂടി അവൾ പറഞ്ഞു. "അച്ഛൻ ഇവിടെ ഇല്ല."

"എനിക്ക് ലീലയോടാണ് പറയാനുള്ളതു"

"എന്നോടോ, ഗൗരവമുള്ള സംഗതിയാണോ ?"

"പക്ഷേ, ഗൌരവമുള്ളതായിരിയ്ക്കാം"

"എന്നാൽ പറയൂ"

"എനിയ്ക്കു തുറന്നു പറവാൻ മടിയുണ്ട്. എന്നാലും പറയാം" വീണ്ടും നിറുത്തി. ഒന്നുകൂടെ ലീലയെ കടാക്ഷിച്ചു ആ മുഖത്തിൽ ഒരു മധുരസ്മിതം കളിയാടുന്നുണ്ടായിരുന്നു. എനിയ്ക്ക് അല്പമാശ്വാസമായി. "എൻെറ ഈ താൽകാലിക വിഷമതകളെപ്പററിയാണ് എനിയ്ക്കു പറയാനുള്ളത്. അന്നു നാം തമ്മിൽ കണ്ട ദിവസംമുതൽ തന്നെ ഏതൊ ഒരു മായികശക്തി എന്നെ ഇങ്ങോട്ട് ആകർഷിക്കുന്നു." "ഇങ്ങനെ പറഞ്ഞാൽ മനസ്സിലാവുകയില്ല. അങ്ങയെപ്പോലെ അതിനുള്ള സാമത്ഥ്യവും എനിക്കില്ല. ഞാൻ പലദിവസമായി അങ്ങയെ കാണണമെന്നു വിചാരിച്ചിരിക്കുകയായിരുന്നു."

പെട്ടെന്ന അവഠം നിവൃത്തി. ആ മുഖത്തിൽ പല വികാരങ്ങളും പ്രതിഫലിച്ചതായി എനിക്കു തോന്നി. മുഴുവൻ കേഠക്കാൻ ഞാൻ കതുകിയായിരുന്നു. പക്ഷേ, അവിടെ ഒരു നിശ്ശബ്ദത പ്രത്യക്ഷപ്പെട്ടു. എൻെറ ക്ഷമ തീരെ അസ്തമിച്ചു. ഞാൻ പറഞ്ഞു. "ഞാൻ....ഭവതിയെ.......കരുതുന്നു. ഇതു് ഒരു കുററമാണെങ്കിൽ ഭവതി ക്ഷമിക്കണം. അല്ലെങ്കിൽ ഇവനെ ചരിതാൎത്ഥനാക്കണം." അവളുടെ ശിരസ്സ് വീണ്ടും നമ്രമായി; വീണ്ടും ഒരു നിശ്ശബ്ദത. അല്പസമയത്തിനുശേഷം അവ്യക്തസ്വരത്തിൽ "ഞാൻ എന്താണു പറയേണ്ടതു്" എന്നു് അർദ്ധസ്വഗതത്തിൽ അവഠം ഉച്ചരിച്ചു. എനിയ്ക്കു് കാൎയ്യം മനസ്സിലായി. ഞാൻ സന്തുഷ്ടനായി. എന്നാലും അവളെക്കൊണ്ടു പറയിക്കണമെന്നു് ഞാൻ ഉറച്ചു. അതിനായി "എന്തു്, ഞാൻ ചെയ്തതു് കുററമാണെങ്കിൽ ഭവതി ക്ഷമിയ്ക്കുയില്ലയോ ?"

"അങ്ങു ചെയ്തതു് കുററമല്ല." അവഠം പറഞ്ഞു. "ഞാൻ എങ്ങിനെ പറയും. അങ്ങയെ സ്നേഹി........."

x x x x x x x x

അലാറം അടിയ്ക്കുന്ന ശബ്ദം കേട്ടു് ഞാനുണൎന്നു. വിളക്കു് അപ്പോഴും എരിഞ്ഞുകൊണ്ടു തന്നെ ഇരിക്കുന്നു. എന്തു് ? അതു് വെറും സ്വപ്നമായിരുന്നുവോ ? ഞാൻ വിശ്വസിച്ചില്ല. കണ്ണു തിരുമ്മി നാലുപാടും നോക്കി. ഈ തിരക്കി നോട്ടത്തിൽ പ്രകൃതിതന്നെ ഹസിച്ചിരിക്കണം. താളമേളങ്ങളോടെ കാഹളം മുഴക്കി പള്ളിയുണത്തുന്ന കുക്കുടക്രൂജനമാണു് അപ്പോഠം ഞാൻ കേട്ടതു്.

---

## "ഭൃംഗത്തിൻെറ ജീവഗീതി"

(കേക)

---

SIVASANKAR (MAHOPADHYAYA, CLASS III)

എമ്പാടം രജഃകീൎണ്ണം, ഉദരം മധുപൂൎണ്ണം,
ഗന്ധധൂപികാകീൎണ്ണം, സൂനസങ്കേതം തുൎണ്ണം,
ഉത്സുകം പക്ഷ്മായാസം, ഉന്മത്തം ഗാനോല്ലാസം,
ഉത്സവ"മാത്മോൽഭാസം", ഹ്ആ ഹ്ആ ഹൈ !!! **മധുമാസം.**

---

# ॥ साहित्यसमाजचरितम् ॥

स्थिराध्यक्षः :—**एन्. गोपालपिळ्ळ M. A.**, कलाशालाध्यक्षः ।

उपाध्यक्षः :—**ए. परमेश्वरशास्त्री महोपाध्यायः** ।

कार्यदर्शी :—**एन्. राघवन् (महो. तृतीयभागः)**

साहित्यसमाजस्यास्यैतद्वत्सरीयः समुद्घाटनयोगः कटके मासि द्वितीये दिने प्राचलत् । विज्ञाननिधिर्न्यायाधिपतिः श्रीशङ्करसुब्बार्यः तदाध्यक्ष्यमवहत् । आदौ तत्र सन्निहितानुद्दिश्य पाठशालाध्यक्षः श्रीगोपालपिळ्ळ महाशयः सरसमधुराणि गैर्वाणीमयानि स्वागतवचनानि प्रावोचत् । अनन्तरं समाजाध्यक्षः संस्कृताध्यायिनां प्रोत्साहनं ललितमुपक्रमोपन्यासरूपं प्रभाषण मभाषिष्ठ ।

तदनु महोपाध्यायः के. शिवरामकृष्णशास्त्रिमहाशयः (Sanskrit Lecturer, Arts College) "तस्मादध्येयं संस्कृतं" इति विषयमधिकृत्य सरसं सारगर्भं च प्रभाषणमकरोत् । ततश्चाध्यक्षस्योपसंहारोपन्यासरूपमसाधारणचातुर्यमतिसरसं वचनजातमखिलानपि सामाजिकानानन्दकल्लोललीलापराधीनानतानीत् । अथ च कार्यदर्शी कृतज्ञतां प्राकाशयत् । वञ्चीशमङ्गलगाने च निर्वर्तिते स योगः परिपूर्णतामयासीत् ।

ततश्च साहित्यसमाजस्य सप्त योगाः सम्मेलिताः । तेषु क्रमेण श्रीयुताः— **एन्. कृष्णपिळ्ळ B. A. (Hons.), ए. परमेश्वरशास्त्री, एन्. गोपालपिळ्ळ M. A., एन्. पद्मनाभप्पाणिक्कर्, रविवर्मत्तम्पान्, एन्. गोपालपिळ्ळ M. A., एस्. परमेश्वरशर्मा** इत्येते महोदया आध्यक्ष्यमावहन् ।

एतेषु प्रथमचतुर्थसप्तमेषु योगेषु क्रमेण "കോമളകലകം" "യുവകവികൾ" "സ്നേഹവും സ്വാതന്ത്ര്യവും" इत्येतान्विषयानधिकृत्य **के. शिवशङ्करः** (महो. तृतीयभागीयः) **एन्. परमुनायर्** (महो. द्वि. भागीयः) **जे. कुञ्ञुलक्ष्मि अम्म** (महो. प्र. भागीया) च कैरलीभाषायां, द्वितीयपञ्चमयोर्योगयोर्यथाक्रमं **"भवभूतिकालिदासौ" "ईश्वरः"** इत्येतौ विषयौ पुरस्कृत्य **एम्. आर्. केशव-**

गणकः (म. तृ. भागीयः) के. पि. बालकृष्णः (म. प्र. भागीयः) संस्कृतभाषाया-श्चैकैकं प्रभाषणमकुर्वन् ।

इतरौ च समाजौ क्रमेण, अस्मदीयपाठशालीयांगलभाषाध्यापकस्थानात् Arts College संस्कृतपण्डितपदवीमधिरोपितं M. A. उपपदालंकृतं श्रीमन्तं सी. के. नारायणकुरुप् महाशयं, श्रीचित्राकायिकविनोदप्रकटने धावनमत्सरे (800 Meters Race) प्रथमं पारितोषिकं सम्पादितवन्तं म. द्वि. भागाध्येतारं पि. दामोदरं चानुमोदितुं प्रावर्तेताम् ।

---

## SANSKRIT COLLEGE DRAMATIC ASSOCIATION

---

*President*: —N. GOPALA PILLAI M. A., *Principal.*
*Vice President*: —K. RAMAKRISHNA SASTRI, *Pandit.*
*Convener*: —S. NILAKANTA SASTRI, *Pandit.*
*Secratary*: —GOPINATHAN (*Student*)

महाव्रतमहामहिमशालिनां श्रीचित्रानक्षत्रजातानामस्मन्महाराजानां महनीये जन्मर्क्षमहोत्सवावसरे, तदनुबन्धितया राजकीयसंस्कृतमहापाठशालीयनाट्यकलासमिते-रङ्गैः, तदध्यक्षेण श्रीमता एन्. गोपालपिळ्ळ एं. ए. महाशयेन, सुप्रसिद्धात् मृच्छ-कटिकाख्यप्रकरणात् संगृह्योपनिबद्धं वसन्तसेनानामकमभिनेयवस्तु "Victoria Jubilee Town Hall" नाम्न्यां शालायां $\frac{१९४०-११-८}{१११६-३-२३}$ तमे दिने समुचितेन नैपथ्यविधानेन सम्यगभिनीतम् ॥

तदात्वे श्रीमन्तः वि. शङ्करय्यर्. एं. ए. एल्. टि. (Lecturer, Arts College) महाशयाः सन्निहितानभिनयचातुरीसमाकृष्टस्वान्तान् सामाजिकान् संस्कृतनाटकाभिनयसमितेरस्या उत्तरोत्तरमुत्कर्षाधायकं सार्वजनीनं सर्वविधं च प्रोत्साहनादिसाहायकं प्रार्थयमानाः नटानां समितेश्च श्रेयःपरम्परामाशंसन्त ॥

एवं नाटकाभिनयो यथापूर्वं वश्रीशमङ्गलेन समङ्गलं निर्वृत्त इत्यावेदयामः ॥

---

# ATHLETIC ASSOCIATION

## SANSKRIT COLLEGE, TRIVANDRUM.

This year in the field of Athletics, there was allround activity. The following are the office bearers for the year.

*President*:—N. GOPALA PILLAI, M. A., Principal.

*Captain*:—K. N. PADMANABHA PILLAI.

*Joint Secretaries*:—(1) P. DAMODARAN (Maho. II)

(2) ANANTARAMA SUBRAMONIA IYER (Maho. I)

M. 958
9848

In spite of the want of proper play-ground, Badminton, Volley, and Tenniquoit are being played in the College and very keen interest is being evinced by most students in Volley Ball.

The College has a fairly trained Volley Ball Team. One or two Volley Ball matches were played during the year. On 14th Chingom, 1116, a friendly Volley Ball Match was played between Y. M. A. Volley Ball Team, Pettah and the College Team in which the College Team won.

The College also was able to compete in the Inter-Collegiate Volley Ball Tournament. On 16th October, the College Team met the Training College Team and came out victorious. But in the semi final owing to the ill health of some of the members of the Team, the College was beaten.

Mr. P. Damodaran, a student of the College was sent to compete in the Sri Chitra Sports for 800 Meters Race. It is a matter of pride that he stood first and won the Silver Cup. Mr. P. Damodaran is an excellent sportsman and he deserves every encouragement. Mr. P. Damodaran was congratulated over his victory in a meeting held under the Presidency of the Principal, the President of the Athletic Association.

Indic Digital Archive Foundation
gpura.org